प्रवेश सं० ५५६६ विषयः ऋग्वेद (सायण) क्रम सं० १३७

ग्रन्थकार

नाम अपर्णा:

पत्र सं० (१-१८ = ८८+१७) २५७ गणना

श्लोक सं० १०५, २-७४, ७८-१२६ अक्षर सं० (पंक्ती) ४३ पंक्ति सं० (पृष्ठे) १४

आकार १२.३.४६. लिपिः दे. ना. आधारः का.

12408

वि० विवरणम् अपू.

पी० एस० यू० पो०—७७ एस० सी० डी०—१६५१—५० ०००

अ. पु. ८१

वसायित्वेश्वरगुणानेतान्यैश्वरान् प्राप्नोत्यसौ नरश्चाव्यपरनिर्वाणसूचकान् सूक्ष्मात्सूक्ष्मतरोणीया
न्त्रीव्रत्वाद्व्रीमागुणः महिमाशेषपूरणत्वात्प्राप्तिश्चाप्राप्यमस्यास्ति प्राकाम्यमस्यास्ति वशित्वादीश्वित्व
चेश्वरोयतः वशित्वाद्वशितानामयोगिनः सप्तमोगुणः यत्रेच्छास्यानभिघातोयत्रकामावसायिता
ऐश्वर्यकारणैरनियोगिनांप्रोक्तमष्टधाऽणिमादिसंसूचकैरयंपरनिर्वाणवेतसइति एवंचाणिमादिगुण
परएवायमीश्वरशब्दः तयोतोगीचासावीश्वरश्चयोगीश्वरयदप्रयोगवैयर्थ्यप्रसंगाच्च नहितदा
योगजन्यमणिमादिलक्षणमैश्वर्ययाज्ञवल्क्यप्रयोक्तृनवति किंतुयोगिनःसनकादीन्प्रतिस्वा
मित्वम् ततश्चप्रकृतानुपयोगिकर्मधारययंहेतुयोगिनिमित्तमणिमादिलक्षणमैश्वर्ययंयथकारस्यगम्य
ते ततश्चयोगिविरोधिनोज्ञानरागद्वेषायोगियदेनार्थानिरस्ताःउक्तंच योगस्यतन्निरासकत्वपु
राणेप्राणायामैर्दहेद्दोषान्धारणाभिश्चकिल्बिषम् प्रत्याहारेणसंसर्गान्ध्यानेनानीश्वरान्गुणान्
इतिईश्वरपदेनचयथावस्थितसकलवेदवेदांतवेद्यत्वंपरमकारुणिकत्वंसूच्यतेइतितत्र
णीतग्रंथस्यप्रामाण्येनिश्चितेकथमप्रामाण्यशंकोदियात् यज्ञवल्क्यापत्यंयाज्ञवल्क्यः तंसपू
ज्यसमान्यगुणयोगमहर्षियोवर्णादिधर्मानशेषतोनिरवशेषतोनोस्मान्ब्रूहिबोधयेत्यब्रुवन्
वर्णाब्राह्मणादयः आश्रमशब्देयद्यपिब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजककर्मसुप्रवर्त्तते

Indira Gandhi National Centre for the Arts

तथापितत्संबधिनोधर्माणामन्यावादाश्रमशब्देनाश्रमिणोवदंते अतएवाहवसिष्ठः चत्वार
आश्रमाः ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाइति केवलाहणत्वात्केवलाह्याश्रमित्वादतिरिक्ता
निविशेषरूपाणितद्विशेषणस्थानेवक्ष्यमाणधर्माधिकारिणस्तद्धेतवे तानिचविशेषणानि येषां
तांवक्ष्यत्पूर्वनिंद्याचर्याविधौब्राह्मणत्वसहितंब्रह्मचर्यं एवंनवन्यधादित्यत्रविधौतदेवत्व
त्रियाद्ययेत्तविवाहविधौवनिनारागः स्नातकत्वंचजायोपगमविधौऋतुमद्भार्यत्वंसंयोगकामदा
रवत्त्ववा स्त्रीधर्मेसुक्तचित्स्त्रीत्वंक्तचिज्जायात्वंक्तचित्प्रोषितभर्तृकात्वंक्तचिद्विधवात्वं द्रव्यशु
द्धिविधौशोध्यद्रव्यत्वंप्रतिषेधेतुप्रतिषेध्यक्रियाप्रवर्त्तकयोस्तत्वंश्राद्धविधौश्राद्धकालावच्छिन्न
जीवनवतःप्रमीतपितृकत्वं विनायकल्पनविधौविनेयकोपसृष्टत्वं ग्रहयज्ञविधौक्रियादि
कामित्वं राजधर्मविधौक्षत्रियत्वानियक्तत्वम् निर्हरणादिविधौमृतसपिण्डत्वम् आयुर्धर्मवि
धोदुर्गतत्वम् वनस्थत्वविधौवलीपलितत्वंचजातेयोत्रत्वंच पारिव्राज्यविधौवेदाध्ययनसुतोत्पा
दनयागानुष्ठानवतःसंसारवैराग्यवत्त्वं प्रायश्चित्तविधौपापवत्त्वमित्यादीनि एतद्विशिष्टायेतद्इ २
तरे वर्णाश्चआश्रमाश्च इतरेचेतिवर्णाश्रमेतराः तेषांवर्णाश्रमेतराणांच अत्रेतरशब्दस्यहे
चेतिसर्वनामसंज्ञाप्रतिषेधः शास्त्रप्रमेयोनिःश्रेयसकरोधर्मः कर्त्तव्यंनगप्रतिषेध्यमधर्मः वदंते

माणशास्त्रार्थनिरवद्यनिरवद्योदीरणक्रियांप्रति अशोषतइतिधर्मसामान्यानिप्रायंवचनम्
विशेषाणिप्रायेणास्मिन्नुपनयनादेःप्रोक्तेरोमादिलवार्यत्वात् वर्णाश्रमेतरसंबंधोयाधिकाः
नित्रीणिधर्मसामान्यानिधर्मान्ब्रूहीतिप्रार्थितस्यचधर्मसंहिताकरणेतदध्येतृसमवायिधर्मज्ञा
नमेवप्रवर्त्तकम् ततश्चाध्येतृणामध्यापनप्रयोजकमपितदेव नहितेषामप्रयोजकमध्ययनम्न
विलुप्तमर्हतितस्माद्धर्मशास्त्राध्ययनंधर्मशास्त्रज्ञानप्रसूतमेव यास्नवल्क्यप्रणीतेष्यत्रश्लोकेयास्नव
ल्क्यंसपूज्येतिवचनंतथोत्तरश्लोकेयोगीन्द्रेतिप्रयोगःबौधायनेनच सहस्माहबौधायनइति नच
मनुरब्रवीदिति नगोर्वचनमिदमनोरितिवाच्यम् यतएतदुत्तरकालमेवमनुराह एतद्धीयन्नुः
शास्त्रंश्रावयिष्यत्यशेषतः एतद्धिमत्तोधिजगेसर्वमेषोखिलंमुनिरिति अधिजगेधीतवान् अस्मा
च्छास्त्रादितायाज्ञवल्क्यःप्रणेतेतिव्याख्यातृणांस्मृतिरेवप्रमाणमितिनचार्थमेवयाज्ञवल्क्यीयनया
स्मरतीतिवाच्यम् ग्रन्थेहिप्रणेतृतयातस्यासाधारण्यायसंभवति नचार्थदृष्टतयामुन्यंतरेरपि
तत्संदृष्टत्वात् असाधारणेनचव्यपदेशेनसाधारणेछटते असाधारणेनहिव्यपदेशान्भवति
मिथिलास्थःसयोगीन्द्रःज्ञाणध्यात्वाब्रवीन्मुनीन् समुनिर्निर्धर्मान्ब्रूहीतिप्रार्थितोपिमिथिला
स्थत्वेनचविशेषतःप्रज्ञातःज्ञाणमात्रवक्ष्यमाणशास्त्रार्थमुनीनांतश्रवणायोपतोध्यात्वाचित

या० व
अ० १ प
२

यित्वावस्थमाणान्धर्मानब्रवीत् याज्ञवल्क्यप्रणीतंशास्त्रस्यवक्तुंसइत्युक्तम् नपुनरहमिति
नपुनरहंशब्दाद्याज्ञवल्क्येसप्रत्ययः सइतिशब्दात्तुप्रकृतवाचिनोयाज्ञवल्क्यएवप्रकृतेबुद्धि
रुपैतीतितमेवप्रयुक्तवान्ततस्मान्नाधिकरणाच्चात्रवीदिति प्रथमपुरुषएवप्रयुज्यते नपुन
रष्ठुवमित्युत्तमः तत्रधर्मानुष्ठानस्यदेशपरिग्रहपूर्वकत्वाद्धर्मकथनात्प्रागेवदेशमाह यस्मि
न्देशेऽसौ कृष्णस्तस्मिन्धर्मान्निबोधत २ कृष्णशब्दोहरिणवचनः कृष्णजिनेकृष्णविशेषणोयाव
त्कृष्णोविचरतीतिप्रयोगदर्शनात् सयस्मिन्देशेस्वभावाद्विचरति तत्रधर्मश्रोतस्मात्तं
नुष्ठेयतयाहेतुनयोनिबोधतश्रवणध्यानयोः कृष्णशब्दादर्थानन्तरमान्दितिमत्वोकृष्णगइति
कृष्णमृगोपलक्षितश्चदेशोब्रह्मावर्त्तादिदेशासंज्ञयधर्मानुष्ठानंगमितिमंतव्यम् यदाहमनुः
सरस्वतीदृशद्वत्योर्देवनद्योर्यदंतरम् तंदेवनिर्मितंदेशंब्रह्मावर्त्तंप्रचक्षते कुरुक्षेत्रंचमत्स्या
श्चपंचालाःशूरसेनजाः एषब्रह्मर्षिदेशोवैब्रह्मावर्त्तादनंतरः हिमवद्विन्ध्ययोर्मध्यंयत्प्रा
ग्विनशनादपि प्रत्यगेवप्रयागाच्चमध्यदेशःप्रकीर्त्तितः विनशनात्कुरुक्षेत्रात् आसमुद्रात्तु
वैपूर्वादासमुद्रात्तुपश्चिमात् तयोरेवांतरंगीर्यार्यावर्त्तंप्रचक्षते कृष्णसारस्तुचरतिमृगोयत्र
स्वभावतः सज्ञेयोयज्ञियोदेशोम्लेच्छदेशस्त्वतः परम् अत्रचपूर्वः पूर्वउत्तरोत्तरतःश्रेष्ठः यतु

पुराणम् ब्रह्मावर्त्तःपरोदेशऋषिदेशस्त्वनंतरः मध्यदेशस्ततोन्यश्चार्यावर्त्तस्त्वनंतरः विद्धि
सु चातुर्वर्ण्यव्यवस्थानंयस्मिन्देशेनविद्यते तंम्लेच्छदेशंजानीयादार्यावर्त्तमनंतरमिति
आर्यावर्तस्यलक्षणंनंतरमाह तत्रश्चयत्रचातुर्वर्ण्यव्यवस्थाकृष्णमृगश्चविचरतिनोसम्लेच्छ
देशः तदन्योधर्मदेशः तत्रश्चब्रह्मावर्त्तादिदेशचतुष्टयानेयत्रचातुर्वर्ण्यव्यवतिष्ठते कृष्णमृग
श्चविचरति तत्रधर्मेनिःस्थातव्यं तदसत्वेचातुर्वर्ण्यव्यवस्थावतिकृष्णमृगयुक्तेवादेशेधर्मं
निबोधतेतिधर्मग्रहणाद्धर्मपरिहारेदेशविशेषनियमोनास्तीतिमंतव्यम् शूद्रस्यावृत्तावनुप्र
श्नमाहमनुः एतान्द्विजातयोदेशान्संश्रयेरन्प्रयत्नतः शूद्रस्तुयस्मिंस्तस्मिन्वानिवसेद्वृत्तिकर्षितः
इति ज्ञानपूर्वमनुष्ठानंधर्मस्येति धर्मज्ञानोपायंसावदाह पुराणन्यायमीमांसाधर्मशास्त्राग
मिश्रितः वेदास्थानानिविद्यानंधर्मस्यचचतुर्दश पुराणंब्राह्मादिन्यायस्तर्कःमीमांसावेदवाक्यवि
चारःधर्मशास्त्रंमन्वादिस्मृतिः अंगानिषड्विधिकरणादिनिः सहितास्चत्वारोवेदाःऋग्वेदादयः ए
तानिचतुर्दशज्ञानानांनिमित्तानिधर्मस्यचस्वाध्यायद्वारेणएतदुत्पन्नस्यैवज्ञानस्यधर्महेतुत्वा
त्ततश्चप्रयोगपरत्वादिसमुत्थंज्ञानंधर्महेतुरितिसिद्धं एवंचतुर्दशैतानिविद्यास्थाना
निसत्यथाः वेदांतेयंचदशमविद्याषोडशिकाचवेदिति ब्रह्मपुराणे यद्वेदांतविद्ययोर्ग्रह

Indira Gandhi National Centre for the Arts

पा० व
अ० १ प
४

णंतन्मोक्षसाधनविद्यास्थानानिप्रायम् वेदांतः शारीरकंविष्णुहृदारण्यकादिरहस्यं यतुवि
ष्णुपुराणम् अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः पुराणंधर्मशास्त्रंचविद्याह्येताश्चतु
र्दश आयुर्वेदोधनुर्वेदोगांधर्वश्चेतितेत्रयः अर्थशास्त्रंचतुर्थंतु विद्याह्यष्टादशस्मृताः तत्के
वलंविद्यास्थानानिप्रायम् नधर्मस्थानानिप्रायम् आयुर्वेदादीनांधर्मस्थानत्वानावात् चतुर्द
शग्रहणादृतेथर्ववेदोनस्यात् इदानींधर्मशास्त्रंणंतदानीमेवोविवेकायतत्प्रणेतृनाह मन्व
त्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः यमापस्तंबसंवर्त्ताः कात्यायनबृहस्पतीपराशरव्यास
शंखलिखितदक्षगौतमौ शातातपोवसिष्ठश्चधर्मशास्त्रप्रयोजकाः प्रयोजकाः प्रणेतारः अति
रोक्तमन्यत् अत्रगौतमः स्मृतिःधर्मशास्त्राणितेषांप्रणेतारः मनुविष्णुयमदक्षांगिरोत्रिबृह
स्पतुशना आपस्तंबगौतमसंवर्त्तशंखलिखितकात्यायनशंखलिखितपराशरव्यासशातातपप्रचेतो
याज्ञवल्क्यादयः इत्यादिशब्दप्रयुक्तवान् वेदमूलग्रन्थप्रणेतारआदिशब्देनात्रगृह्यंते तथा
चमनुः वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदामिति अतएवाहवशिष्ठः श्रौतेनिरंतरोनिधा
व्यापारः स्मृतिवाक्येकविशेषः अंगिरःशब्दपर्यंतः समाहारद्वन्द्वोनपुंसकलिंगएकवचनांतः
अतएवचवन्नविष्णुपुराणेयुशेश्वरवादेस्मृतयः षड्विंशादेवानिहिताः मन्वादिस्मृतयोयास्तु

४

षड्विंशत्परिकीर्त्तिताः तासांवाक्यानिक्रमशः समासेनोच्यंत्रवीमितइति तासु मनुविष्णुदक्षांगिय
मांगिरोत्रिबृहस्पतुशनआपस्तंबवसिष्ठकात्यायनपराशरव्यासशंखलिखितसंवर्त्तगौतमशाता
तपहारितयाज्ञवल्क्यप्रचेतोबुधदेवलसोमजमदग्निविश्वामित्रप्रजापतिनारदपैठीनसिपि
तामहबोधायनहागलेयजाबालिच्यवनमरीचिकश्यपाइतिस्मृत्यंतरेषड्विंशादेवपरिपठिताः
एवंबृहन्मन्वादयश्चवयोवस्थादिनेदेनमन्वादिप्रणेतारएवद्रष्टव्याः श्रुतिविरोधित्वात् स्मृति
स्तुत्यर्थेपवदरुत्वात् शिष्टपरिगृहीतत्वात् आप्तोक्तत्वाच्च चतुर्विंशतिमतपरिशिष्टादयोपि
धर्मशास्त्रत्वेनैवज्ञेयाः संप्रतियच्छास्त्रंशास्त्रांतरनिरपेक्षंसमग्रमर्थंनशक्नोत्यवगमयितुम्
तस्माद्बृहत्स्मृतिसापेक्षमेवधर्मेप्रमाणमितिदानमुदाहरत्यादि देशे कालेउपायेनद्रव्यंश्रद्धास
मन्वितम् पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणम् देशेऽरुक्षेत्रादौ कालेउपरागादौ उपायेन
कर्त्तव्यतयाद्रव्यंगवादिश्रुत्यात्तयेतिप्रत्ययेनसमन्वितं पात्रेवक्ष्यमाणलक्षणेप्रदीयते स्वा
त्याद्यनपेक्षित्वरूपेणप्रकर्षेणयात्रस्वीकारपर्यंततयात्यज्यतेइत्येतत्प्रतिपादकरूपंवाक्यं
सकलेसर्वसाधनेपितस्मिंपर्यंतविशेषवतोधर्मस्यबोधकंसर्वधर्मलक्षणंधर्मप्रमाणंवे
दितव्यम् नपुनःसर्वप्रकारयुक्तस्यधर्मस्यबोधकंधर्मलक्षणम् तथाचशंखः देशःका

Indira Gandhi National Centre for the Arts

त्तउपायोद्रव्यश्रद्धात्यागइतिसमस्तेषुधर्मोदयः साधारणोन्यायोन्यथाविपरीतइति साधा
रणोदानेनसमानोन्येषांयागादिकर्मणांन्याय्यः अन्यथासामस्यान्नावेविपरीतोधर्मस्यानुदय
इत्यर्थः सतिसामर्थ्येसर्वंगानुष्ठानं असतितुकाम्यं हेयम् आवश्यकंयथाशक्तिकार्यम् यतु
कात्यायनवाक्यम् बहुत्वंवास्वर्गलोक्यस्यकर्मप्रकीर्तितम् तस्यतावतिशास्त्रार्थेकृतेसर्वः
कृतोभवेत् इतितन्निरपेक्षार्थनिधायकस्वशास्त्रविषयंसापेक्षेण तत्स्वशास्त्रेशास्त्रांतरोक्तं
ग्राह्यमितिसएवार्थः यन्नाम्नातंस्वशास्त्रव्यापारकर्मविरोधियत् विद्वद्भिस्तदनुष्ठेयम् अग्निहोत्रा
दिकर्मवत् इति संग्रहतिधर्मप्रमाणान्यारुश्रुतिस्मृतिः सदाचारःस्वस्यचप्रियमात्मनः सम्यु
क्संकल्पजः कामोधर्ममूलमिदंस्मृतम् श्रुत्यादिकंप्रत्येकंधर्ममूलंधर्मनिश्चयस्यकारणं पुरा
णन्यायेन्यत्रश्रुतिस्मृत्योः सामान्यतोधर्ममूलत्वम्अन्यत्रतुनिवार्यतन्मूलत्वमुच्यते अर्थी
दन्येषांविद्यास्थानानांवेदानुरोधकत्वं स्मृतेर्नव्याकरणादिवद्वेदानुरोधकत्वम् किंतुतदनु
गमकत्वमितिपथयुक्तिः आचारादेःपुनस्त्रैवधर्ममूलत्वोक्तिरितिनपुनरुक्तता श्रुतिर्वेदःस्म
तिर्धर्मतोवेदमूलंशास्त्रंसदाचारः शिष्टाचारः स्वस्यस्वकीयस्यात्मनः मनसः प्रियंतुष्टिकरं ५
आत्मशब्देनात्रमनोलक्ष्यते प्रियशब्देनचतुष्टिः तेनमनस्तुष्टिरत्रचिकीर्षोपरमोनिर्दिश्य

ते समीचीनःशास्त्रार्थविषयोऽनेनेदंसाधयामीतिमनःकर्मसंकल्पस्तज्जः कामः धर्मचिकीर्षा
एतत्सर्वंधर्मनिश्चयेमूलंकारणमित्यर्थः धर्मेणतन्निश्चयोलक्ष्यते तत्राग्निहोत्रादेर्निश्चयमूलंश्रु
तिः वर्णाश्रमधर्मादेः स्मृतिः शैलिकादेः सदाचारः यत्कर्ममनस्तुष्टिपरिच्छिन्नतयाविधीयतेतस्य
मनस्तुष्टिः यथायस्मिन्कर्मण्यस्यकृतेमनसःस्यादत्राद्यवेतस्मिंस्तावत्तपः कुर्याद्यावत्तुष्टिर्न
स्यवेदितिकालविशेषेसंकल्पजः कामः यथा यदैवैनंश्रद्दधीतेतियथावा श्राद्धं
प्रतिरुचिश्चैवेतिव्यासःधर्मशुद्धिमतीप्सद्भिर्नवेदादन्यदिष्यते धर्मस्यकारणंशुद्धमिश्रम
न्यत्प्रकीर्त्तितमिति श्रुद्धिरसंकीर्णताधर्मस्यधर्मनिश्चयस्येत्यर्थः शुद्धमदुष्टम् मिश्रसन्ना
वितदोषम् अतःसपरमोधर्मोयोवेदादधिगम्यते अवरःसतुविज्ञेयोयःपुराणादिषुस्मृतः॥
वेदार्थवित्त्वमेःकर्मयत्स्मर्तंसुनिभिःपुरातद्यत्नेनसमातिष्ठेत्तन्निषिद्धंविवर्जयेत् तेहिवेदार्थ
तत्त्वज्ञालोकानांहितकाम्यया प्रदिष्टतोयंधर्मंतंधर्मंनविचारयेत् वेदार्थयः स्वयंज्ञानस्त
त्राज्ञानेनवेदपि ऋषिभिर्निश्चितंतस्मात्काश्यकास्यान्मनीषिणामूलंतेन्योपियदन्यत्स्यात्तं
चिद्धर्मनिधायकम् तद्धरतरतोविद्धिमोहस्तस्याश्रयोमतः नविचारयेन्नाप्रमाणतयाशंकेतातां
तेन्योयदन्यत्पौरुषेयंतद्धेयम् ननुच श्येवपाशुपतंपांचरात्रशास्त्रंदिव्यंपौरुषेयमेव ततश्च

Indira Gandhi National Centre for the Arts

तदर्थानुष्ठानाचरणेऽप्युदयएवनतुदोषःकश्चित्तत्स्यनिःश्रेयसनिमित्तत्वात् मैवम् आचम्यचपु
राञ्जलीनजेत्संध्याहिणश्रमी इत्तरस्तुविरक्तात्मालौकिकार्थपराङ्मुखः ब्राह्मीउर्य्यान्नवाऊर्य्याछोवी
मेवनियोगतः श्रेतः शौवंबर्हिःकौलकालोचारेतु वैदिकम् सारमादायतिष्ठेत्तु सारिकेवफलंय
था इतिस्वायंनुवादिवचनेनाननुरूपलोकानुरञ्जनायादरत्वेनप्रतिपादितवैदिकंकर्म वैफ
ल्यदोषत्वात्सर्वात्मनाश्रुतिस्मृतिविहितधर्मानुष्ठानेकपरमार्थस्त्रैविद्यवृद्धान्प्रतिशौवाद्यात्राय
स्यानुष्ठानेनिःश्रेयसनिमित्तत्वासिद्धेः नापितेषांशौवादिशास्त्रानुष्ठानेक्वाचिद्विहतिः यावज्जीवम
ग्निहोत्रंजुहुयात्अग्निहोत्रंचजुहुयादास्तेद्युनिशोः सदा इतिश्रुतिस्मृत्युक्तैर्हितेषामाश्रम
कर्मनिःप्रयोजनेनान्यैः श्रुतिस्मृत्यर्थातिक्रमेप्रतिबायापतेः तथाचश्रुतिःवीरहावाएषदेवा
नांयोयिमुत्सादयत्तेइति स्मृतिरपि अग्निहोत्रंत्रयोविद्याग्नीन्ब्राह्मणःकामकारतः चाङ्गायणं
चरन्मासंवीरहत्यासमंलिप्तदिति नचाननुष्ठानमात्रेणैवार्थसिद्धेदूषणमितिवाच्यंकुतेन
त्रपुणःपूर्णवक्त्रासिद्धेतिदुःखिताः हेश्वरःशिवशास्त्राणांयेचवेदविदूषकाः सांख्ययोगः पा
शुपत्तवेदाःपाशुपत्तंतथा श्रुतिप्रमाणान्येतानिहेतुनिर्नविचारयेत् इत्यदृष्टत्वेनहेत्व
विचालनीयत्वेनचदेवीपुराणयोगियाज्ञवल्क्ययोरदृष्टत्वेनतत्स्मरणान्नचैतावतात

दनुष्ठानेनदोषःकश्चिदितिवाच्यम् यावद्वचनंवाचनिकमितिन्यायेन ऊनस्याधिकस्यवा
परिग्रहस्यस्वोत्प्रेक्षामात्रेणकर्त्तुमनर्हत्वात्सकलादृष्टागमानुष्ठानस्यकर्त्तुमशक्यत्वात्दी
क्षितस्यचवेदोक्तंश्राद्धकर्मातिगर्हितम् इत्येवंवैदिकंश्राद्धक्रियानादीक्षितैरपि दीक्षितान्प्रति
कर्त्तव्याद्ययोर्निरयदायिनी इत्यादिनाशैवशास्त्रप्रतियोगस्यवैदिककर्मकरणेनरकादानादि
दोषप्राप्तेश्चश्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात् स्वधर्मेनिधनंश्रेयःपरधर्मोभयादपि
इत्यादिनाभारतादौविकल्पस्यापिस्वानुष्ठानेत्कर्षदर्शनेसत्यपिसकलादृष्टागमानुष्ठानस्य
चपरस्परमविरुद्धार्थत्वेज्ञाननिष्ठाप्रयोजनावश्च तथाचशैवाःप्रधानपुरुषयोरधिष्ठाताकेव
लंनिमित्तकारणमीश्वरः इतरेतरवैलक्षण्याःप्रधानपुरुषेश्वराइतिनैश्वरवादिनःसांख्यानि
रीश्वराःयोगास्तुजगतामकर्त्तारंक्लेशकर्मविपाकाशयैरपरामृष्टःसर्वज्ञस्यवेत्तत्वात्सर्वज्ञःपु
रुषविशेषईश्वरइतिसेश्वराःपांचरात्राःपुनःशांतोदितवदव्यूहाव्यपदेशान्नित्ततयाचोत्तरात्पे
नावस्थितःपरमाप्रकृतिर्नगवान्वासुदेवइत्यहैतत्वेनेश्वरंमन्यंते पाशुपताःपुनःकार्यका
रणयोगविधिदुःखान्ताःपंचपदार्थाःपशुपतिनेश्वरेणपशुपाशविमोक्षायोपदिष्टाइतिनैश्व
रवादमेवांगीकुर्वंतित्तदेवमनवस्थितत्वात्सर्वागमज्ञानस्यसर्वस्वीकारेशशायानिवृत्तेःज्ञा

Indira Gandhi National
Centre for the Arts

नकालोदुर्बटएववैकल्पिकांगीकारेचोन्मत्ततुल्यता ननुयथाशैवाद्यामायस्यैवादृष्यत्वमात्रेणाप्रमाणम् तथैवादृष्यत्वस्मरणाविशेषाद्वेदस्यापीति सत्यं हुतेनत्रपुणेत्यादिनावेदस्यशैवाद्यागम सदृशमेवादृष्यत्वमात्रेणप्रामाण्यम् पित्रदेवमनुष्याणांवेदश्चक्षुःसनातनम् अतर्क्यचाप्रमे यंचवेदशास्त्रमितिस्थितिरित्यादिनामन्वादिभिरैहिकामुत्रिकार्थप्रकृष्टसाधकंतुवेदस्योक्तम्न शैवादिशास्त्रस्यप्रत्युत येवेदबाह्यनिर्मुक्तास्तेषांमोहार्थमेवचसिद्धांतसंज्ञकंपूर्वमयाशास्त्रप्रदर्शि तम् पश्यतिपश्यतीतिपशुर्जीवस्तस्यायंपाशुपतंशास्त्रंज्ञायतेविश्वमोहकम् म यैवमोहितास्तेहिनविप्रंतोजनाद्विजलोलार्थिनस्तुशास्त्राणिकरिष्यंतिकलौनराःनिःश्वाससं हितायाहिलक्षमात्रंप्रमाणतःशैवपाशुपतयोर्योगोनेदःपाशुपतात्ततःएवंयावेदमार्गादियदत दृश्यते तदुद्रकर्मविज्ञेयंरौद्रंशौचविवर्जितम् इत्यादिनागस्यंप्रतिरुद्रवचनेनवराहपु राणेतस्यविमोहकत्वेनविप्रलंभकत्वमेवप्रतियादितम् सर्वजनविप्रलंभकत्वाद्विप्रलंभमेव शैवादीति नयश्चतत्रैवरुद्रंप्रतिजनार्दनवाक्यम् एषमोहंसृजाम्पाशुयोजनंमोहयिष्यति त्वंरुद्रमहाबाहोमोहशास्त्राणिकारयस्वत्प्रायासान्दर्शयित्वाफलंदीर्घंप्रदर्शय ऊर्ध्वकां श्चिद्रजात्मानिविरुद्धाचरणानिच दर्शयित्वाजनंसर्वंमोहयाशुमहेश्वरेति अतएवत्वमनुः

उद्यंतेव्ययंतेचयान्यतोयानिकानिचित् तान्यर्वाक्कालिकतयानिष्फलान्यनृतानिचेति अत एवचशैवादिशास्त्रोक्तस्याचारस्यप्रामाण्यमाशंक्यतन्नःवेदःप्रमाणमितिनिष्ठातत्रयानिश्रूयंते व्रीहियवश्चाज्यंवयःकृपात्रयन्नीसंबद्धानि उच्चैर्नीचैःकार्याणितेविरुद्धाआचारेप्रमाणमिति मन्यंतेइति ननुचश्रूयतेवेदमंत्राणांपंचरात्रोदितेनहि आचारेणप्रवर्त्ततेतेषांप्राप्यतिमान वाःब्राह्मणक्षत्रियविशांयांचरात्रंविधीयतेशूद्रादीनांनतत्रोक्तंयदवीमुपयास्यति इत्यादिना वराहपुराणेनगवह्नाकेनपंचरात्रस्यवेदप्रतिनिधित्वेनस्मरणाद्वेदेनाविशेषःपंचरात्रस्य सत्य मविशेषःकिंतुविषयविशेषाद्विशेषःतथाहि अस्यवाक्यस्यऊर्ध्वश्चिद्वेदयोगादकृतप्रायश्चित्ता त्यविषयत्वादविप्लुतब्राह्मणाद्यनाश्रयत्वम् एवंहिसत्यत्रात्मानंपदमुपयास्यतिमत्स्यात् ताद ज्ञानोब्रात्यानांवेदपरिसमाप्तेरभावात् तथाचमानवम् नतैरपूतैर्विधिवदापद्यपिहिकर्हिवि त्रब्राह्मण्योनांश्वसंबंधानाचरेद्ब्राह्मणःसहेति एवंचयांचरात्रेद्विजात्यधिकारोपि अक्विचित्तए वस्यात् तस्माद्विधिवशाल्लुप्तप्रायश्चित्तंविषयत्वादस्यवाक्यस्यास्तिविशेषोवेदयांचरात्रयोः अतएवयोगयाज्ञवल्क्येपांचरात्रस्यपाशुपतादिसमानंसिद्धांतत्वेनानिधानंवेदब्राह्मत्वप्रती तिरुद्देव एकमेवतुविज्ञेयंप्रमाणंयोगसाधनम् गृहीतसप्तसिद्धांतैरन्यैर्व्रतैर्विदैस्तथा हिरण्य

Indira Gandhi National Centre for the Arts

गार्ग्यैः कपिलैरपांतरतमेस्तथा सानऋुमारैर्धर्मिष्ठैस्तथापाशुपतैरपि पांचरात्रैश्चइत्येतैःसिद्धांतैश्चै
वसप्तनिरिति एवंहिपंचरात्रस्याद्दष्यत्वेनैव प्रामाण्येनानुष्ठेयत्वेनेति ननुच यथैवनियतान्कां
श्चिदधिकृत्यवेदादिशास्त्रंप्रवृत्तंतथैवजातिमतः शैवादीन्मृतिशैवादिशास्त्रमस्तु ननिषेकादिः
श्मशानांतोमंत्रोयस्योदितोविधिःतस्यशास्त्रेधिकारोमिन्नेयोनान्यस्यकस्यचित् इत्यादिनाम
न्वादिनिः स्वशास्त्रेष्वधिकारस्यद्विजानामेवदर्शितत्वात् नशैवादिशास्त्रेशैवब्राह्मणादीनांश्र
स्तुतिर्शैवादीशास्त्रेषुशूद्रोधिकृतएवनस्मृत्यादिशास्त्रेषुतथानभ्युपगमात् अपिचशैवोनाम
जात्यानकश्चिद्दसि यंप्रतिशैवादिशास्त्रंस्याअपितुतेनप्रोक्तमिति अणिकृतेशिवेनप्रोक्तेशास्त्रे
शैवमपुनश्चशैवशब्दात् तदधीतेवेद्वेतीति उत्पन्नस्याणः प्रोक्तात्लुगित्युक्तिकृते शैवं वेत्त्यधी
तेवाशैवः एवंयाशुपत्तादिःयस्मादेवंस्वभावतोनियतान्कांश्चिदनाश्रित्यैवशैवादिशास्त्रंप्रवर्त्तत
स्मात्तदाकाशचित्रमिवप्रतीतम् तथासत्यनुष्ठानेतद्ज्ञेयमेव नचादृष्टागमप्रसिद्धेश्रमवतां
तदनुष्ठानंस्यादितिवाच्यम् नह्यदृष्टत्वमात्रेणतेषांश्रुतिवत्त्वार्थानुष्ठायकसामर्थ्यम् यावेद
बाह्याःस्मृतयोयाश्चकाश्चिदुदृष्टयःसर्वास्तानिष्फलाःप्रेत्यतमोनिष्ठाहिताःस्मृताःइत्यादिनाम ८
न्वादिनितदनुष्ठानस्यामुत्रवैफल्यापादकत्वादिनानिषिद्धत्वात् ततश्चदेवपूजादौनरसिंहमु

राणप्रसिद्धैवैतिकर्त्तव्यताग्राह्यएवंदीक्षायामप्यवगंतव्यम् नहिपुराणादिप्रसिद्धायांदीक्षायां
जातिशोधनमस्ति शैवाद्यागमेषुप्रथमंस्यावरजातिस्ततःसारीसयामता यद्विजातिस्तृतीयातु
चतुर्थीमृगजातिका पंचमीपशुजातिस्तुषष्ठीचैवांत्यजास्मृता सप्तमीशूद्रजातिस्तुवैरूपजगति
स्तथाष्टमी नवमीक्षत्रजातिस्तुदशमीविप्रसंज्ञिता एतासुजातयःशोध्याजातीशेनशिवेनवा
इत्यादिनातच्छोधनदशनात्श्रौतकर्मनधिकारप्रसक्तिः ब्राह्मणोग्नीनादधीतराजाराजसूयेन
यजेतवैरूपोवैरूपसोमेनयजेतेत्यादिनाजातिंनतमेवप्रकृत्यवैदिकेकर्मप्रवृत्तं तत्कथंचतन्निर्द
शोस्यात् एवंप्रतिष्ठायामपिपुराणाद्युक्तैवेतिकर्त्तव्यताग्राह्यानान्या तेषामेवमिश्रधर्मप्रमाण
त्वेनत्रविष्णुपुराणेपरिज्ञातत्वात् तथाचत्रविष्णुपुराणम् अष्टादशपुराणानिरामस्यचरितंत
था विष्णुधर्मादिशास्त्राणिशिवधर्माश्चनारदकाणिश्चपंचमोवेदोयन्महानारदस्मृतम् सौराश्च
धर्मराजेंद्रमानवोक्तामरीपते जयेतिनामचैतेषांप्रवदंतिमनीषिणइति तत्रापिमद्यवर्जंसुरा
नृपनीनयेत्यादिस्मृतेःकलियुगादन्यत्रमंतव्यम् दीर्घकालब्रह्मचर्यधारणंचकमंडलोःसगोत्रा
द्वासपिंडाद्वाविवाहोगोवधस्तथा नराश्वमेधौ मद्यंचकलौवर्ज्यंहिजातिनिरित्यादिनामद्यादेर्बल
पुराणादौसामान्यतोवर्ज्यत्वेनानिहितत्वात् एतेनचण्डिकाद्युपरारावाख्याताःयद्यप्यंजन

Indira Gandhi National Centre for the Arts

(+)

विद्योकालिकापुराणे कपालसंपुटेकत्वामहातैलह्रतेतथा चंद्रसूर्योपरागेचकज्जलंगलशुद्धि
मान् अंजयेद्दक्षिणीतेनवशीकुर्यात्पुरंदरमित्यादितदर्थशत्रुमारयितुकामः ग्रमज्ञानकाष्टैरग्निं
प्रज्वाल्यविषरुधिरमिश्रमाकृतिसहस्रंजुहुयात् सद्यः शत्रुमारयतीतिवत् श्येनेनाभिचरन्यजे
तेतिवद् अधर्मएवहिंसादिवद्वशीकरणादेरपितत्रतत्रनिषिद्धत्वात् तथाच हिंसौषधीनां
स्त्रीणांजीवेनिचारोमूलकर्मचेतिमनुनावशीकरणमुपपातकमध्येपरिगणितम् यदपिदेवीपुरा
णे वामदक्षिणवेत्तायोमात्तवेदार्थपारगः सत्तवेत्स्थापकः श्रेष्ठोदेवीनांमातरासुच पंचरात्रा
र्थज्ञोमात्ततंत्रविशारदः विष्णोर्गृहेसदाशास्त्रोब्रह्मचारीचशांतिदः शिवशास्त्रवेत्तायोग्रहमात्र
गणार्थवित् गृहस्थोब्रह्मचारीवास्थापकः कीर्त्तितः शिवे सौरार्थवेदकः सूर्यस्थापकः पूजकः स्मृत
इति एतदपिनवामागमानुष्ठानलिंगम् तदनुष्ठानस्यचमत्स्यपुराणेनिषिद्धत्वात् तथाच
मत्स्यपुराणम्स्थापकस्यसमासेनलक्षणंशृणुतद्विजाःसर्वावयवसंपन्नोवेदमंत्रविशारदःपु
राणवेत्ताधर्मज्ञोदंभलोभविवर्जितःकुलसारचरेदेशेयज्ञोत्पन्नःशुभाकृतिः शौचाचारयुतोनित्यं
पाषंडकुलनिस्पृहःसमः शत्रौचमित्रेचब्रह्मोपेंद्रहरप्रियःऊहापोहार्थतत्त्वज्ञोवासुशास्त्रस्य
चारगः आचार्यस्तुनवेत्युक्तःसर्वदोषविवर्जितः मूर्त्तिपास्तद्विधाश्चैवऋत्विजस्तथेति ९

यथाचपांचरात्रसंहितायाम् चतुर्दशविद्यास्थानानिवेदितव्यानिभवंति तद्यथा ऋग्वेदोयजु
र्वेदःसामवेदोथर्ववेदइतिहासःपुराणन्यायोमीमांसाशिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषामय
नंछंदोविचितिरित्यत्राप्यनधिकारः किंतुभगवत्येवाधिकारः इतिकेवलंत्रय्यापिज्ञानमेवोपादेयं
तथात्रापिवामदक्षिणज्ञानमात्रमेवोपादेयम् तथाचयोगयाज्ञवल्क्यः आत्मज्ञाननिमित्तंहिसि
द्धानिविचिंतयेत् केवलानियदाधीयतेवेदवाक्योनवेद्विजइति केवलाध्ययनंस्वधर्मपरित्या
गेनपरधर्मसेवनताद्दशस्यानुष्ठानस्यस्वधर्मत्यः समुत्सर्जपरधर्मरुचिर्नवेत् चकोरनयनेचौ
रः सशूद्रश्शूद्रसन्निभेइत्यादिनास्कंदपुराणादौनिंदितत्वात् वामदक्षिणादिज्ञानंचत्वशास्त्रा
येक्षितस्यतच्छास्त्रोक्तस्याविरुद्धस्यागस्यकस्यचित्स्वीकारार्थम् तच्चाहुः सापेक्षत्वेप्यपेक्षैवमा
नंयावदपेक्षते तावदेवान्यतः कार्यमन्यत्रैवानवस्थितेः विरुद्धस्यतुत्यागएवेति अतएवचध
र्मसंकरपरिहरणनिप्रायेणराजधर्मेषुमतानारतम् चातुर्वर्ण्यस्यधर्माश्चरक्षितव्यामहीक्षितांय
र्मसंकररक्षाहिराज्ञोधर्मःसनातनइतिनचवाच्यम् स्वधर्मप्रतिष्ठादित्रोपस्कारकर्त्तुःस्थाय
कादेर्वामदक्षिणाद्याम्नायज्ञानंतदुक्तदीक्षायहणपूर्वकमेव स्मृत्यादिशास्त्रेतथानंगीकारा
त् वामदक्षिणादिशास्त्रंचयथोक्तस्थापकत्वादिसिद्धेः वामदक्षिणादिशास्त्रस्यतन्निवरणे

Indira Gandhi National
Centre for the Arts

दर्शनादिपूर्वत्वात्मनानिरौद्दाणेनानेकविद्यास्थानोपस्कारोपस्कृतमतित्वादस्यनिःश्रेषावबोधे
नहेलामात्रेणास्वप्रतिष्टातंत्राद्युपस्करोमात्रनिर्वहणाच्चयदपिनारतादौदक्षंप्रतीश्वरवाक्यम् हू
यश्चतेवरंभिरवातंगह्लीष्वसुव्रत प्रसन्नवदनोनूत्वातदिहैकमनाःशृणुवेदात्षडंगादुच्चत्पसं
माद्योगाच्चयुक्तितःतपःसुतप्तंविमलंदुश्चरंदेवदानवैः अपूर्वंसर्वतोभद्रंविश्वतोमुखमव्य
यम् अर्थैर्दशार्धैः संयुक्तंगूढमप्राज्ञनिन्दितम् वर्णाश्रमकृतैर्धर्मैर्विपरीतंकचित्समम् गता
त्रैरध्यवसित्तमत्याश्रममिदंस्मृतम् मयापाशुपतंपूर्वंयोगमुत्पादितपरम् अस्पचीर्णस्पस
म्यग्यत्कल्पनवतिपुष्कलम् तच्चासुतेमहाभागत्यजंतोमानसोज्वरः इतितत्राश्रमिणांपाशुप
तशास्त्रापकत्वेलिंगंतत्फलसामान्यात्रविवक्षितत्वात् संतिहियाश्रुपत्याद्यागमेषु अग्निष्टो
मफलंत्वनेदित्येवमादीनिवाक्यानि नचैतावतातेषातदधिकारःसिध्यति नापितदेतद्भूते
स्मनांगानिसंस्पृशेत्स्नात्रतमेतत्पाशुपतंपशुयाश्चविमोक्षणायेति अथर्वशिरउपनिषत्पाशु
पतशास्त्रानुष्टापकत्वेलिंगंत्वस्नांगसंस्पर्शमात्रस्य नियमस्यात्रश्रवणात् नचस्मृत्तोपाशु
पताद्विस्पर्शेसचैलस्नानश्रवणात्तच्छास्त्रस्पदृष्यत्वमाश्रमिणामनिप्रेतमित्याशंकनीयम् कृतेसोम
यागादावनेकमंत्रसंस्कृतेष्टकाचित्रचित्पसंस्पर्शनेपि स्नानदर्शनात् नचचित्पस्पकिंदुष्टवा

दुतरुद्रस्पनिर्मात्पवदत्पर्हितत्वादपस्पशत्वमितिएतावतीविचारयदवीमवगाहितुंशास्त्रेकृतो
त्सवेयंस्माद्दशामतिःक्रमतेइतिकेचित् वस्तुतस्तुयथाचतुर्वेदोपियोविप्रोदीक्षितोनशिवाध्वरे सतु
शूद्रःप्रमंतव्योनदेयंतस्पशासनम् इत्यादिनाशैवादयोदीक्षाविहीनानोत्रैविद्यवृद्धानामचर
वर्णाविद्विजुगुप्साऊचंति तथा कापालिकःपाशुपतःशैवाश्चसहकारुनिःदृष्टाश्चेद्विमोदेतस्प
र्शाश्चेत्स्नानमाचरेत् इतिस्मृत्यंतरदर्शनादंत्यावसायिवद्दर्शनस्पर्शनयोर्दुष्टाःशैवादिशास्त्र
प्रतिपन्नाःशैवादयस्त्रैविद्यवद्धर्मन्पते एतदेवोपपन्नं शास्त्रंहितथा तस्मात्पुराणादिवुक्षिय
र्यालोचनेनेवानुष्ठानमादर्त्तव्यम् नचकचित्कचिद्दाषागमानुष्टेयसामान्येनबाधागमेरेक
र्वत्वमाशंकनीयम् यत्रापिबाधागमानुष्टेयसाहश्यमेव अनुनूयामनूपावासुनगांदुर्नगात्त
पा संत्रीवाप्यसतीवापित्रंगमानजुगुप्सयेदिति तत्रापिदेवीपुराणाद्यक्तदशादीक्षितस्यवैतैनि
यमाद्दत्पनुसंधेयमृतस्मादृष्यत्वेनैवशैवादिप्रमाणमनुष्टेयत्वेनत्वंगत्वेनकेनचित्कचि
देवोनादेयम् साकल्पेननानुष्टेयम् इतिस्थितम् तत्रापियत्पोरुषेयंनकेवलमनुष्टेयंतया
वदप्रमाणमपीतिहेतोर्हेयमितिस्थितम् अतएवाहुरावार्याः अनुष्टेयंनत्ववतियच्छास्त्रंपुरु
षैःकृतम् तदप्रमाणंविज्ञेयंपुंवुद्धिप्रत्नवंस्तित्वत् इति अलमतिप्रसंगेनेति सदाचारःशिष्टा

National Gallery of Canada National Centre for the Arts

चारइत्युक्तम् तत्र शिष्टस्वरूपमाह बौधायनः शिष्टाः खलु विगतमत्सराः अनीधा न्याय्यतेऽनुपः
दंभदर्पलोभमोहक्रोधविवर्जिताः धर्मेणाधिगतो यैश्च वेदः सपरिबृंहणः शिष्टास्तदनुमानज्ञाः
श्रुतिप्रत्यक्षहेतवइति अनीधा न्याइति वृत्तिसंकोचोयल्लक्षणम् इतिहासपुराणाभ्यां वेदं समु
पबृंहयेत् इतिमनुवचनादितिहासपुराणादिवेदस्यपरिबृंहणान्न विनानावाच्यव्याकरणा
दीनितदनुमानज्ञास्मृतिज्ञाः स्मृतिर्हितस्यवेदस्यानुमानंलिंगंश्रुतिप्रत्यक्षहेतवःश्रुतिः प्रत्य
क्षहेतुर्येषामत्तस्तेतथोक्ताः स्मृतिवचनमाचारश्चप्रत्यक्षागम्यत्वात्प्रत्यक्षम् ब्रह्मावर्त्तादिषु
वाकुल्येनवेदमूलआचारइतिमत्वामनुराह यस्मिन्देशेय आचारःपारंपर्यक्रमागतः वर्णानां
सांतरालानांससदाचारउच्यतेइति ननुब्रह्मवर्त्तएवसदाचारइतिमत्वातथासतिहिलोका
दिमूलेपिब्रह्मावर्त्ताचारोधर्मप्रमाणंस्यात् वेदमूलकोपिचदेशांतरवर्त्तीनस्यात् चशिष्टो
पि आर्यावर्त्ते प्रागादर्शात्पर्वतात्प्रत्यक्कालकाद्दनादुदक्यारियात्राद्दक्षिणेनहिमवंतमुत्त
रेण विध्यया वद्येधर्मायेआचारास्तेसर्वप्रत्येतव्याः नत्वन्येप्रतिलोमकधर्माणइत्याह अत्रा
पिसर्वशब्दोबाकुल्यान्निप्रायेण नत्वन्येप्रतिलोमेत्यत्रापिदेशांतरीयाः सर्वेधर्मा आचाराश्चा
नुप्रत्येतव्याः यतस्तेषुवाकुल्येनलोकादिपूर्वकाआचाराः केचिदेवश्रुतिपूर्वकाइतितस्यार्थेनु

संधेयाः अन्यथादेशांतरावर्त्तसंनवाद्ब्रह्मावर्त्तादिमूलआचारोनिर्मूलः स्यात् मनुः श्रुतिस्मृतिविरोधेतुश्रुति
रेवगरीयसी अविरोधेतुकर्त्तव्यस्मार्त्तवैदिकवत्सदा वसिष्ठः श्रुतिस्मृतीविहितोधर्मस्तदलाभेशिष्टा
चारः प्रमाणमिति ननुयदिश्रुतिस्मृत्योर्धर्मएवप्रमाणंकथंतर्हिआत्मज्ञानप्रधानयोर्धर्मज्ञानप्र
माणनिर्वाहः नह्यात्मज्ञानेधर्मोननुष्ठेयत्वात् तत्त्वमसीत्यादिवाक्यार्थावधारणंतत्तत्रज्ञायते
ननुवाक्यार्थमवधार्ययागादिवदनुष्ठीयतेइत्याशंक्याह इज्याचारदमाहिंसादानस्वाध्यायकर्म
णाम् न्यायतुचरमोधर्मोयद्योगेनात्मदर्शनम् ८ इत्यादिधर्माणामितिकर्त्तव्यतात्मनोसंबंधीप
रमःप्रधानन्तुयोयंधर्मःयद्योगेनसमाधिनात्मदर्शनंनाम आत्मशब्दोयंपरमात्मनिवर्त्ततेन
जीवात्मनि तस्येज्यादिकमंतरेणसमाधिर्विनैवचप्राप्तत्वात् आत्मावाअरेद्रष्टव्यइतितत्रोत्प
त्तिविधिः ब्रह्मविदाप्नोतिपरमित्याधिकारविधिः अत्रहिपरशब्देनपरमात्मानिधीयते तदाप्तिश्च
तदात्मनेवद्वौब्रह्मस्यावस्थानं तत्रब्रह्मविदितीयदीपात्राब्रह्मविद्याकारणंविविदिषतियज्ञे
नदानेनतपसानाशकेनेत्यादि तत्रचयज्ञेनेत्यादिश्रुतिःसकलनित्यनैमित्तिकवर्णाश्रमधर्म
मोयल्लक्षणार्थं अतएवविष्णुपुराणम् आराध्यतेस्ववर्णोक्तधर्मानुष्ठानकारिणा तस्मात्तत्प्राप्त
येयत्नःकर्त्तव्यःपण्डितैर्नरैःतत्प्राप्तिहेतुर्ज्ञानंचकर्मचोक्तंमहामुने तथाचवसिष्ठःयथात्रम

Indira Gandhi National
Centre for the Arts

धुसंयुक्तंमधुचान्नेनसंयुक्तमएवंतयश्चविद्याचसंयुक्तंनेषजंहितत्र इतिएवमादिमत्वोक्तवान्
इज्याचारदमाहिंसेतिरागप्राप्तंकर्माश्रित्यशास्त्रेणपुरुषान्प्रुदायाविधीयमानौर्थआचारःयथाप्राङ्
मुखोन्नानिनुंजीतत्तत्स्वीमित्यादि मनसोदमनंदमःरागप्राप्तहिंसानिवृत्तिरहिंसासत्त्वनिवृत्तिःषरस्व
त्वापत्तिर्दानंत्वाध्यायोध्ययनं कर्मशब्दःकाम्यव्यतिरिक्तानामन्येषामपिचोदितकर्मणांपरिग्रहा
र्थः यद्योगेनात्मदर्शनंनचतद्वाक्यार्थावधारणादिवसिद्ध्यति किंतुश्रवणमननंनिदिध्यासनेत्वइ
तिकर्माधिकारिणोपिविदुषःऊर्ध्वरेतस्त्वादिकारणाद्धर्मसंशयेपर्षदधीनोनिर्णयइतितात्पर्यवदाह
चत्वारोवेदधर्मज्ञाःपर्षत्त्रैविद्यमेववा साङ्गतेयंसधर्मःस्यादेकोवाध्यात्मवित्तमः ९ वेदप्रसि
द्धोधर्मःधर्मशास्त्रंतदर्थज्ञाश्चत्वारःधर्मनिर्णयरूपकार्यकर्त्तारःपर्षदितुच्यते ऋग्यजुःसाम
वेदास्त्रैविद्यमितितेनचात्रतदध्येतारस्त्रयोब्राह्मणाउच्यंते सैषाऋक्वरापर्षदित्याहमनुः ऋग्वेदवि
द्यजुर्विच्चसामवेदविदेवचऋक्वरापर्षद्विज्ञेयाधर्मसंशयनिर्णयेइति अथवाध्यात्मविदांश्रेष्ठए
कोपिधर्मंतयायमर्थंब्रूतेसएवधर्मः आत्मानमधिकृत्यप्रवृत्तंशास्त्रमध्यात्मंबहूनांतद्विदांमध्येसा
तिरेकज्ञानोध्यात्मवित्तमःपरिषत्त्वंब्राह्मणानामेवप्रायमकल्पिकम् यदाहमनुःश्रुतिद्वैधंतुयत्रस्या
धर्मेषुकथंस्यादितिचेद्वेदेषु यत्रिशिष्टाब्राह्मणाब्रूयुःसधर्मःस्यादतर्कितइतिश्रुतिषुवाक्य १२

पाढादेवानिर्णीतेष्वित्यर्थः अंगिराःचातुर्विद्योवितर्कीचअंगविद्धर्मपाठकःत्रयश्चाश्रमिणोवृद्धाः प
र्षदेषादशावरा चतुर्णामपिवेदानांपारगोयोद्विजोत्तमः यथाक्रमंविनोपांगैश्चातुर्विद्यमितिस्म
तिःधर्मस्यपर्षदश्चैवआर्याश्चत्तक्रमस्यच त्रयाणांयःप्रमाणज्ञःसवितर्कीनवेद्विजः ऋग्वेदयजुर्वेद
कल्पेचछिक्षायाचसुनिष्ठितः ज्योतिःशास्त्रेचकुशलःसनिरुक्तोगविद्वेत्तवेदावेधाव्रतस्नातः
सत्यसंधोजितेंद्रियः अनेकधर्मशास्त्रज्ञःप्रोच्यतेवेदपाठकः ब्रह्मचर्याश्रमादूर्ध्वंवृद्धाश्चाश्रमिणस्त्र
यःवेदेयुस्तस्यतेधर्मंयेमयापरिकीर्त्तिताः मनुस्तु त्रैविद्योहैतुकस्तर्कीनिरुक्तोधर्मपाठकःत्रयश्चाश्र
मिणाःपूर्वपर्षदेषादशावराइत्याहहेतुकोनुमानज्ञःतर्कोस्यास्तीतितर्की संशयकोटौप्रमाणिकत्वा
रोपेकतेबाधकादर्शनाद्विचित्यमात्रप्रमाणेनेतिप्रत्ययस्तर्कः सचवेदोविरोधीग्राह्यःइत्युक्तंतेनैव
आर्षंधर्मोपदेशंचवेदशास्त्राविरोधिनायस्तर्केणानुसंधत्तेसधर्मंवेदनेतरइति आर्षंस्मृतिपुराणादिः
उपदेशोवेदः अनुसंधानमुपपादनापूर्वंगृह्यस्यादयःवृद्धत्वात् वृद्धोपेताहिदशावरेतिदशा
न्योनन्यूना अंगिराःचत्वारोवात्रयोवापिवेदवंतोग्निहोत्रिणःब्राह्मणाःसमवायस्थाःपर्षदित्युपि
धीयते अनाहिताग्नयोयेचकेवलवेदपारगाःपंचैतेवेदशास्त्रज्ञाःपर्षत्संज्ञात्वुदाहृताः येतुध
र्मविदोविप्राःकार्याकार्यविचक्षणाःप्रायश्चित्तप्रणेतारःसप्तैतेपरिकीर्त्तिताःएकविंशतिसंख्या

Indira Gandhi National Centre for the Arts

कैः श्रुतिमन्यायपारगैः वेदांगऊहालैश्चैवषर्षदंतुप्रकल्पयेत् यतीनांसत्ततयंज्ञानविज्ञान
वेदिनांशिरोव्रतेनस्नातानामेकोपिपरिषद्वेत् येतुपूर्वंमयाप्रोक्ताः स्थितायावरेपथि त्रयो
पिपरिषज्ज्ञेयाः सर्वकायपरारकाः एषातुल्यक्रियेषुमध्यमेषुतुमध्यमामहापातकिशोधेषु
ज्ञातशोनूनएवचेति यतिशास्त्रप्रसिद्धंशिरोव्रतम् एकोपिपरिषत्कार्यकरइत्यर्थः यायावरोग
ह्स्यविशेषः महापातकिनश्चतेशोध्याश्च महापातकिशोध्याः इत्यपोद्धातप्रकरणः धर्मानुक्रीतद
धिकारिणोवर्णान्द्विजांश्चाह ब्रह्मक्षत्रियविट्शूद्रावर्णाश्चत्वारोद्यास्त्रयोद्विजाः ब्राह्मणक्षत्रियवैश्यशूद्राः
प्रत्येकंवर्णसंज्ञानवति ब्राह्मणक्षत्रियवैश्यास्तुप्रत्येकंद्विजसंज्ञाज्ञेयाः निषेकाद्याः श्मशानांतास्ते
षांवैमंत्रिताः क्रियाः तेषांद्विजानांगर्भाधानाद्याः प्रेतकर्मपर्यंताः क्रियामंत्रैः कार्याः शूद्रस्यतुयाव
दुक्तं उपनयनांतसंस्कारानुवृत्तौ यमः शूद्रोप्येवंविधः कार्योविनामंत्रेणसंस्कृतः नकेनचित्स
मसज्छंदसातंप्रजापतिःसृष्टवानुपवीतवान् अतोनुपनेयइत्यर्थः यत्श्रुतिः गायत्र्याब्राह्म
णमसृजतत्रिष्टुभाराजन्यंजगत्यावैश्यं नकेनचिच्छंदसाशूद्रमतोसंस्कारोविज्ञायते असंस्का
र्योनुपनेयः ब्रह्मपुराणम् विवाहमात्रंसंस्कारंशूद्रोपिलभतेसदा मात्रशब्दान्मंत्राणांव्यावृत्तिः
पूर्वसंस्काराणांवा तदाचविकल्पोविहितत्वादपितेषामुजातकर्णः ऊर्ध्वंतौद्विजातीनांधर्मौ १३

सामासिकौमतौ अधिकारीनवेत्शूद्रः पूर्त्तधर्मेणवैदिकेमहानारतम् एकाग्निकर्महवनंत्रेतायांय
श्चहूयते अंतर्वेद्यांचयदानमिष्टमित्यभिधीयते वापीकूपतडागादिदेवतायतनानिच अन्नप्रदा
नमारामः पूर्त्तमित्यभिधीयतेअन्नदानंग्रहणमयज्ञांगोपलक्षणम् तथाचजातकर्णः ग्रहोपरा
गेयद्दानंसूर्यसंक्रमणेषुच द्वादशादौचयद्दानंपूर्त्तमित्यभिधीयते गर्भाधानादीन्संस्कारान्वृद्ध
शस्त्रविहितानपिकालविशेषसंबंधित्वयासार्धश्लोकत्रयेणाधुनाविधत्ते गर्भाधानमृतौपुं
सःसवनंस्पंदनात्पुराषष्ठेष्टमेवासीमंतोमास्येतेजातकर्मच अष्टमेकादशेनामचतुर्थेमासि
निष्क्रमःषष्ठेन्नप्राशनंमासिचूडाकार्यायथाकुलम् १२ एवमेनः शमंयातिबीजगर्भसमुद्भवम्
गर्भआधीयते नेनकर्मणागर्भाधानम् तद्दृतौकार्यमित्यन्वयतःसिद्धम् एवंप्रागर्भचलनात्पुंसः
सवनंपुंसवनाख्यंकर्मषष्ठमेवागर्भमासेसीमंतः सीमंतोन्नयनम् एतेप्रागेतेजातकर्म अष्टमे
कादशेनामाधेयमितिशेषः एकादशादिसंख्याजन्मनस्तस्यप्रकृतत्वात् चतुर्थेमासिनिष्क्रमण
म् सूर्याचंद्रमसोर्दृष्टंवह्निः प्रसरणम् षष्ठेमास्यन्नप्राशनम् चूडाशिरवासायेषांकुलेयस्मिन्व
र्षेतथायत्संख्याकार्यतयास्मर्यते तदनतिक्रमेणकर्त्तव्यंयथाकुलधर्मंकेशवेशान्कारयेद्दिज
लप्रसिद्धः एवंकृतेषुसंस्कारेषुएनः पापंबीजगर्भोत्थंशाम्यति बीजंशुक्रशोणितम् गर्भोजठरांतर

Indira Gandhi National Centre for the Arts

वस्थितोदेहः तेनजठरेवासोलब्धपते एनोत्राप्रायत्यंमातुःपानाशनादेरुत्यवमित्यर्थः एतच्चवातुर्वर्ण्यनिप्रायम् नहिजातिमात्रविषयम् तथासत्युपनयनंविधायवाच्यंस्यात् देवलः चित्रकर्मयथानेकैरंगैरुन्मीत्यतेशनैः त्रास्त्रएपमपितद्वत्संस्कारैर्विधिपूर्वकैः अतएवमनुर्द्विजात्यनिप्रायेणोपनयनंविधायाह गार्भैर्होमैर्जातकर्मचौडैर्मौंजीनिबंधनैः वैजिकंगार्भिकंचैनोद्विजानामपमृज्यते एवमेनः शांत्याप्रदुज्यमानाएतेसंस्काराः पुंसवनांत्यरेपित्रनांवेपितस्थानीयेनपितव्यादिनाकार्यइतिसिद्धम् अत्रचगर्भाधानवद्वत्वादयःकालविशेषाश्रप्पनूद्यंतइति शास्त्रविहितानांकालोत्तरणांननिवर्त्तकाःकिंतुतदुपलक्षकाः तत्रशास्त्रांतराणिविशेषानिधायकानिगृह्यंते तत्रहारीतः सकृत्संस्कृतसंस्काराः सीमंतेनद्विजस्त्रियः ययंगर्भेप्रसूयंतेससर्वः संस्कृतोनवेत्त सीमंतोन्नयनेबैजवापगल्पमापूर्यमाणपक्षेयदापुसानक्षत्रेणचंद्रमायुक्तःस्यात् देवलः सकृच्चसंस्कृतानारीसर्वगर्भेपुसंस्कृता अतएवपारस्कारः अथपुंसवनवत्सीमंतोन्नयनंप्रथमगर्भेइतिसीमंतोन्नयनंप्रथमगर्भेनिधत्तेपुंसवनेनतुप्रतिगर्भमावर्त्तनेअथपुंसवनानवलोभनंतत्रश्वत्थायनगृह्यं उपनिषदीगर्भालंबनंपुंसवनमनवलोभनंच यदिनादेयात्तृतीयेगर्भमासितिष्यणोपोषितायाःस्वरूपवत्सायागोः दधिनिद्वौह्यौमाषौयवंचदधिप्रसतेनप्राश्नीयेत् किंपिवसिद्धि

१९

पिवसीतिपृष्ट्वापुंसवनंपुंसवनमितिप्रतिजानीयात् एवंत्रीन्प्रसूतान् अथास्यमंडलागारछायायांदक्षिणस्यांनासिकायांमजिताओषीधपूर्वानसःकरोति प्रजापतिर्जीवपुत्रान्योवैहेतुकप्राजापत्तस्यस्थालीपाकस्यहुत्वाहृदयदेशमस्पाआलभेत यत्तेसुसीमेहृदयेहितमतःप्रजायतोमन्येहमतर्विद्वांसमाहपौत्रमघन्नियामिति अथरूपंत्वामनसादीध्यानेत्यादिप्रजावान्मंत्रः अग्निरेतुप्रथमइत्यादिजीवपुत्रामंत्राः तृतीयेमासिसीमंततिष्येणश्रवणेनवेतिसांख्यायनम् जातकर्मणित्रह्मपुराणोक्तोविशेषः देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनाम् प्रायांतियस्मात्तदहः पूज्यंपुण्यंचसर्वदातत्रदद्यात्सुवर्णवन्मिंगतुरगरथम् छत्रंछागंचमाल्यंचतिलान्वेश्मधनंबकुजातश्राद्धंनदद्याच्चपक्वान्नंब्राह्मणेष्वपि इति एतच्चप्राङ्नाभिछेदातु नोर्ध्वम् तथाचहारीतः जातेकुमारेपित्रेणामोदत्तुण्यंतदहः तस्मात्तिलपूर्णानिपात्राणिसहिरण्यानिब्राह्मणानाह्वयपित्रत्यः स्वधाऊर्यात्त प्रजायतयेच्च प्राङ्नाभिछेदात्संस्कारपुण्याहंऊर्वेति छिन्नायामग्रौचमितिज्योतिःशास्त्रेध्रुवचरक्षिप्रनेषुवारत्रयेशुभे गुरौशुक्रेथवाकेंद्रेजातकर्मवनामच नामनिनक्षत्राणि नविष्यपुराणम् नामधेयदशम्यांचकेचिदिच्छंतिपार्थिव द्वादश्यानयरेरूपंमासेपूर्णेतथापरे अस्मादशोदनितथावदंत्यन्येमनीषिणः पुण्येतिथौमुहूर्तेचनक्षत्रेवगुणान्विते इतिगृह्यपरिशिष्टम् जननाद्

Indira Gandhi National Centre for the Arts

त्रात्रेस्नुरेत्रात्तरात्रेसंवत्सरेवानामधेयकरणम् अशौचेतुव्यतिक्रांतेनामकर्मविधीयते नायंनिय
मः नामधेयंदशम्यामित्यादिवचनविरोधात् अतोविकल्पएव स्वगृह्यापेक्षाचतद्व्यवस्था एवंचाहरे
कादशेद्वादशेवास्कारयेदित्यादिविवक्षितार्थमेव नाशौचोक्तोयत्नक्षणम् तेनाशौचेपितत्कार्य
म् त्रांखलिखितोदशम्यामुत्थाप्यपिंडवर्धनेपित्र्यंतत्रसंनिध्यमितिश्रुतेः ब्राह्मणोग्राहुतिंदत्वापि
तृनन्नुमान्यतदहरेवनामधेयकरणंकुर्यात् अन्योवाकुलवृद्धःवतुरक्षरंवाह्रस्वंवादीर्घांतरंत
स्यंपुंसामीकारांतंस्त्रीणाम् एवंकृतेनामनिश्चितंकुलनवतिसंतिकांपूर्वंशय्यायाउत्थाप्यदशम्यांतिथौ
दशमेहनीत्यर्थः पिंडवर्धनंपूजातत्स्वरूपंच ब्राह्मणः पूर्वमाहुतिंदत्वापितृननुमान्यान्नुदयश्राद्धे
नपूजयित्वाकवर्गादीनांतृतीयादयोवर्णायरलवह्राश्चद्वीर्घवंतस्तेषांमध्येयकारादयश्चतस्रोत
स्याः तेनाम्नोत्तमंध्येकार्याः शेषास्तुह्रस्वांतोनामादौवैजवायः पितानामकरोत्येकाक्षरंह्रस्वंक्रूर
रंचतुरक्षरंमपरिमितंवाकृतेऽर्थान्नतद्धितम् ईकारांतस्त्रियै यमः शर्मादेवश्चविप्रस्यवर्मात्रातावै
श्यस्यगुप्तिर्दत्तश्चैवशूद्रस्यकारयेत् एतान्युत्तरपदानिसमासनृपस्यनाम्नःकार्या
णिपूर्वपदानियममाहमनुः मंगल्यंब्राह्मणस्यस्यात्क्षत्रियस्यबलान्वितम् वैश्यस्यधनसंयुक्तंशू १५
द्रस्यतुजुगुप्सितम् तथा स्त्रीणासुखोच्यमक्रूरविस्पष्टार्थमनोहरं मंगल्यदीर्घवर्णांतमाशीर्वादा

निधानवत् निष्क्रमणेयमोक्तोविशेषः ततस्तृतीयेकर्त्तव्यंशिशोः सूर्यस्यदर्शनम् द्वादशेऽनिरा
क्रेद्वशिशोर्निष्क्रमणंनवेत् चतुर्थमासिकर्त्तव्यंतथान्येषामतंत्रिनो अन्नप्राशनेविशेषमाह्य
मः तत्तोन्नप्राशनंषष्टमासिकार्य्यंयथाविधि अष्टमेवापिकर्त्तव्यंयथेष्टंमंगलंकुले ऋक्षः सव
त्सरेन्नप्राशनमर्धसंवत्सरइत्येकेतौगादिःषष्टेमासेन्नप्राशनंदंतेषुजातेषुवा मार्कंडेयः देव
तापुरतः स्थाप्यधान्युत्संगगतस्यच अलंकृतस्यदातव्यमन्नंयात्रेत्यकांचने मध्याह्नकन्नके
पेतंप्राशयेत्प्रथमंशिशुम् कृतप्राशनथोत्संगाद्धात्रीबालंसमुत्सृजेत् देवायतोथविन्यस्य
शिल्पनोडानिसर्वशः शास्त्राणिचैवशस्त्राणितत्रःपश्येत्कुलक्षणम् प्रथमंयत्स्पृशेद्बालस्तत्तो
नोडंस्वयंतदा जीविकातस्यबालस्यतेनैवतुनविष्यति सर्वैः स्वजन्मदिवसेस्नातैर्मंगलवा
रिभिः गुरुदेवाग्निविप्राश्चपूजनीयाविशेषतःस्वनक्षत्रंचपितरस्तथादेवःप्रजापतिः प्रतिसंव
त्सरयन्नात्कर्त्तव्यश्चमहोत्सवः पित्रूजाग्राह्यम् विष्णुधर्मोत्तरेषुजन्मनक्षत्रंगेसोमेशिरःसा
तोनयन्नतः पूजासोमस्यकर्त्तव्यानक्षत्रस्यतथात्मनः श्राद्धंकुर्यात्प्रयत्नेनवह्निब्राह्मणतर्प
णम् सुरणामर्चनंकार्यंकेशवस्यविशेषतः सर्वस्वालंकृतस्तिष्ठेत्तवासाश्चमानवः निर्मलं
निधार्याणिदंतकेनानखानिचकृंतयेत् प्राकूडाकरणाद्वालः प्रागन्नप्राशनाद्भिषुः

Indira Gandhi National Centre for the Arts

कुमारः सतुविज्ञेयोयावन्मौंजीनिबंधनम् शिशोरनुद्गतेप्रोक्तंबालस्याचमनंस्मृतम् रजस्व
लादिसंस्पर्शेस्नातवस्तुकुमारकः ब्रह्मपुराणे मातापित्रोरथोद्विष्टंबालोचुंजन्नवेत्सुखीति द
न्तजातमात्रःशिशुस्तावद्यावद्दंतोसमागताः सहिताश्चसमोज्ञेयोव्यक्तिमात्रेप्रकाशितः नदानदेपे
तथापेयेवाच्यावाच्येतथानृते अस्मिन्कालेनदोषः स्यात्सयावन्नोपनीयते एतदन्नदानद्य
णापेयपानानुमननंमातपित्रुच्छिष्टविषयम् नतुजातिन्नेत्राकाराद्यनदानीयेयपानविषयम्
संस्काराद्यनर्हत्वप्रसंगादृश्यतेहिस्मृतिषुप्राचुर्येण वसंतेद्विजातीनामुपनयेतग्रीष्मेराज
न्यमृशरदिवैश्यमित्यादिनानुपहतजात्याद्याश्रयेणैवोपनयनादि इति चौलेविशेषमाह
यमः तथासंवत्सरेपूर्णे चूडाकर्मविधीयते द्वितीयेवातृतीयेवाकर्तव्यंश्रुतिचोदनात् शाख
लिखितौ तृतीयेवर्षे चूडाकर्मलौगाक्षिः तृतीयस्यब्दसंपन्नयिष्टगतेषुचूडाःकारयेत दक्षि
णतः कपुजावसिष्टानाम् उपनयनेत्रिकरपपानांमुंडानगवः पंचचूडाअग्निरसःवाजिमेके
मंगलार्थंशिखिनोन्येयथाकुलधर्मवाश्रुत्यपक्षस्यपुण्याहेयर्वणिवाकपूजाचूडावाजिःकेश्रा
पंक्तिः व्यासःनक्षत्रेपिनकर्तव्यंयस्मिंजातोनवेत्तरः नन्दपदयोः कार्यंनैवाग्नेयेषुनारद दा
रुणेषुचसर्वेषुदुष्टतारांवर्जयेत् ज्योतिष्येयानिचोक्तानितानिसर्वाणिकारयेत् चारंशानेश्च

रादित्यनौमानोरात्रिमेवच तिथिंप्रतिपदंरिक्तांविष्टिंचैवविवर्जयेत् अश्विनीश्रवणस्वातीचित्रा
तिष्यपुनर्वसुधनिष्ठारेवतीज्येष्ठामृगहस्तेषुकारयेत् मूलेश्लेषार्कवैद्रेषुमूलेषुकरणेषुचदो
षंप्रातःप्रकुर्वीतआसुर्वलविधंवनम्हस्तात्रयंमृगशिरःश्रवणात्रयंचपूषाश्विनाकमृगरूपानि
पुनर्वसुश्च दौरेतुकर्मणिहितानुदयेक्षणेवायुक्तानिचोडुपतिनाथदिनास्तताराःतद्दमीमे
ताःक्रियास्त्रीणांविवाहस्तुसमंत्रकः १२ एताहिजातकर्माद्याःक्रियाःस्त्रीणाममंत्रकाःविवाहः
पुनःसमंत्रकःगृह्यविहितानांसंस्काराणांमिहयरामर्शात्मंत्रवतदंगानामप्युपदेशात्सांग
नांतत्स्त्रीत्वावेदितव्यःअतएवचमनुःअमंत्रिकातुकार्ययंस्त्रीणामावदृशेषतःसंस्कारा
र्थंशरीरस्ययथाकालंयथाक्रमम् आवत्क्रिया अशेषतःसांग यथाक्रममितिवचनात्सक
लेषुक्रमानतिक्रमोविधेयइतिदर्शयति तदतिक्रमेसर्वप्रायश्चित्तंकार्यम् कालानतिक्रमेका
त्यायनआह देवतानांविपर्यासेजुहोतिषुकथंचनवेत् सर्वप्रायश्चित्तत्वात्क्रमशोजुहुयात्तु
नःसंस्काराश्चनिसुज्येरन्स्वकालाच्चेत्कथंचन हुत्वातदेवकर्तव्यं ------पत्तयेदतःस
र्वप्रायश्चित्तेलौगाक्षिराह सर्वाणिप्रायश्चित्तानिमनोज्योतिरितिसप्तभिःगोभिलश्चौलाधिका
रे एतयैवाद्यतयात्रियस्त्रीमंत्रेणहोमः मार्कंडेयः प्राहेथपंचमेवर्षेप्रप्रसूतेजनार्दनेष

Indira Gandhi National Centre for the Arts

ष्टीप्रतिपदं चैववर्जयित्वातथाष्टमीम् रिक्तांपंचदशीं चैवसौरभौमदिनंतथा एवंसुनिश्चिते
काले विद्यारंभंप्रकल्पयेत् पूजयित्वाहरिंचैवलक्ष्मीदेवीसरस्वतीम् स्वविद्यासूत्रकारांश्चस्वां
विद्यांचविशेषतः एतेषामेवदेवानांनामानुज्ञुत्यायतम् दक्षिणांनिर्दिजेद्राणांकर्त्तव्यं
चात्रपूजनम् प्राङ्मुखोगुरुरासीनोवाग्यतांशास्त्रमारंभेत् अध्याययेत्तप्रथमंद्विजाग्र्यैः
सुपूजितम् ततःप्रन्त्पनध्यायान्वर्जनीयान्विवर्जयेत् अष्टमीद्वितयंचैवचतुर्दशीतथैवच दिनद्वय
म् अश्रौचइंद्रयात्रायांनूकंयेराहुदर्शने चतीयातेचाहोरात्रमुल्कायातेतथैवच स्मृत्यंतराम्नात
कान्यासगणितंचऊमारशिक्षापयेत् गर्भाष्टमेष्टमेवाब्देब्राह्मणस्योपनायनं राज्ञामेकादशेसै
केविशामेकेयथाऊलम् १४ उपनेतारंप्रत्युपनेयस्यप्रयोजकव्यापारउपनायनम् तत्तश्चो
पनयनादनंतदेव अतएवाहबुधः गर्भाष्टमेवर्षेब्राह्मणआत्मानमुपनाययेदिति इममेवत्र
विधिमाश्रित्यशौनकोमंत्रविधत्ते जानुनुपसंगृह्याधीहिनोः सावित्रीमनुब्रूहीति गर्भाद्
ष्टमोगर्भाष्टमः गर्भसहचरितोवः गर्भः तदपेक्षाष्टमेइतिकपञ्चोपेपंचमी उपनयनस्या
प्ययमेवकालः शौनकेनोपदिष्टः अष्टमेवर्षेब्राह्मणमुपनयेद्गर्भाष्टमेच एकादशेक्षत्रियं
द्वादशेवैश्यमिति अथकाम्याउपनयनकालः तत्रमनुः ब्रह्मवर्चसकामस्यकार्यविप्रस्य

पंचमेराज्ञोबलार्थिनःषष्ठेवैश्यस्येहार्थिनोष्टमे इतिईहाचेष्टाः गौतमः उपनयनमष्टमेपंचमे
नवमेवा कांप्यगर्भादिसंख्यावर्षाणामुपनयनस्याष्टमंवर्षनित्यःकालः नवमंपंचमंचकाम्यः
आपस्तंबः सप्तमेब्रह्मवर्चसकाममष्टमेआयुष्कामंनवमेतेजस्कामंदशमेन्नाद्यकामंमेकाद
शेइंद्रियकामंद्वादशेपशुकाममन्नोपनयतेत्यनुषंगः पुराणात् नष्टेचंद्रसगोश्रुक्रेनिरंशोचै
वनास्करे कर्त्तव्यंनोपनयनं नानध्यायेगलग्रहेराहोः प्रथमनागस्थितःसूर्योनिरंशःचतुर्थी
सप्तमीनवमीत्रयोदशीगलग्रहः हस्तात्रयेपुष्यधनिष्ठयोश्चयोस्माश्विसौम्यादितिविष्णुनेषु
रास्तेतिथौचंद्रबलोपपन्नेकार्योद्विजानामुपनायनेविधिः गोभिलः यदहरुपोष्यमाणवको
नवतिप्रगेएवैनंतदहर्नोजयंति ऊशत्कारयंति आप्नावयंत्पलंऊर्वंति अहतेनवाससाच्छा
दयंतिप्रगेप्रात्तरेवेत्यर्थः शंखःपयोयवक्वामिद्वाहारः क्रमशास्त्रयाणामुपनयनाद्विगर्भाधानादि
संस्कारेषुदर्शादर्शविप्रानेज्याः यदाहकात्यायनः गर्भाधानादिसर्वेषुब्राह्मणान्भोजयेद्दशः उपनी
यगुरुः शिष्यंमहाव्याहृतिपूर्वकम् वेदमध्याययेदेनंशौचाचारांश्चशिक्षयेत् १५ यथाविधि
उपनयनकर्मणाशिष्यमनुशासनीयंप्रत्यासन्नंकृत्वागुरुराचार्योव्याहृतिपूर्वकंवेदमध्याय
येत् शौचाचारांश्चशिक्षयेत्तद्ग्राहयेत् गुरुग्रहणात्पितेवोपनयनादिकंकुर्यादितिगम्यतितस्य

Indira Gandhi National Centre for the Arts

योगपतावरहेचान्यआचार्यः स्यात् उपनयनेनचशिष्यस्याचार्यप्रतिसंबंधविशेषात्मिकाप्रत्यासत्तिः
क्रियतेनतुदेशसन्निकर्षात्मिकैव उपनेत्युणानाहापस्तंबः तमसोवाएषतमः प्रविशतियदविद्वा
नुपनयते यश्चाविद्वानितिब्राह्मणानाम् तस्मादनिजनविद्यासमुपेतंसमाहितंसंस्कर्त्तारमीप्सेत
यश्चाविद्वानुपनयेत्तसोपितमःप्रविशतीत्यर्थः गायत्र्यादिप्रधानंचोपनयनम् यदाहकात्याय
नः गायत्र्याब्राह्मणमुपनयेत त्रिष्टुभाराजन्यं जगत्यावैश्यमिति सर्वेषांवागायत्रीमितिच अनु
ब्रूयादितिशेषः लौगाक्षिः तत्सवितुर्वरेण्यमितिब्राह्मणस्य तांसवितुरितिराजन्यस्य विश्वारूपा
णीतिवैश्यस्य ओन्नूर्नुवः स्वरित्युक्तात्सवितुर्वरेण्यमितिसावित्रीत्रिरन्वाह यत्तोर्ध्वंऋात्सर्वा
मततः महाव्याहृतिसंख्यामाहमनुः ओंकारपूर्विकास्तिस्रोमहाव्याहृतयोव्ययाः त्रिपदाचैवसा
वित्रीविज्ञेयंब्रह्मणोमुखम् मुखमारंभः ततश्चमहाव्याहृतयएवाध्यायनारंभेप्रयोक्तव्याः किं
गा तुप्रणवोव्यस्तोपिचैतच्चप्रथममध्यापनप्रारंभेनवरारंभः मुखमितिव्यपदेशात् प्रणवमहा
व्याहृतित्रिकंचस्वरूपतोमनुराह अकारंचापुकारंचमकारंचप्रजापतिः वेदत्रयान्निरदुहद्भूर्भु
वःस्वरितीतिच गायत्रीमपिविशेषतआह त्रिभ्यएवतुवेदेभ्यःपदंयदमदूहत् तदित्यृचो २८
स्याः सवितुरितिपरमेष्ठीप्रजापतिः तथा अध्येष्यमाणंतुगुरुर्नित्यकालमतंद्रितः अधीष्वभोरि

तिब्रूयाद्विरामोस्तितिचारमेत् अध्येष्यमाणस्त्वाचांतोयथाशास्त्रमतंद्रितः ब्रह्मांजलिकृतोध्या
य्योल्लघुवासाजितेंद्रियः ब्रह्मांजलिलक्षणंसएवाह संहत्यहस्तावध्येयंसहिब्रह्मांजलिःस्मृतः
शौचात्प्रचीनमाचारंतावदाह दिवासंध्यासुकर्णस्थ ब्रह्मसूत्रउदङ्मुखःकुर्यान्मूत्रपुरीषेतु
रात्रौचेदक्षिणामुखः ४९ अहनिसंध्ययोश्चोदङ्मुखोरात्रौदक्षिणामुखःवामकर्णोपवीतीमूत्रपुरीषेउत्सृजेत्तत्र मनुः तिरस्कृत्योच्चरेत्काष्ठंपत्रंलोष्टंतृणानिचनियम्यप्रयतोवा
चंसंवीतागोवमुण्ढतःकाष्ठादिनिर्मुमंतर्धायमलमुत्सृजेदित्यर्थः संवीतांगःप्रावृतांगःअ
वगुण्ढतःप्रावृतशिराः यमः शिरःप्रावृत्यऊर्वीतश्चकृन्मूत्रविसर्जनम् अयज्ञियैरनार्द्रैश्चृत्त
णैरात्मच्छायमेदिनीम् प्रत्यङ्मुखस्तुपूर्वाह्णेपराह्णेप्राङ्मुखस्तथा मनुः छायायामंधकारेवारा
त्रावहनिवाद्विजः यथासुखमुखःकुर्यात्प्राणबाधभयेषुच अंगिराः उत्थायपश्चिमेयामेरात्रे
राचम्यचोदकम् अंतर्धायतृणैर्भूमिंशिरः प्रावृत्यवाससा वाचंनियम्ययत्नेननिष्ठीवोछुवा
सर्वर्जितःकुर्यान्मूत्रपुरीषेतशुचौदेशेसमाहितः गृहीत्वशिश्नंश्लोत्थायमृद्भिरमुद्भस्तेजलैः गं
धलेपक्षयकरैश्चोचंकुर्यादतंद्रितः ७ यथामूत्रसंसर्गोनभवति तथावामहस्तेनशिश्नंगृ
हीत्वोत्थायदेशांतरेउपविश्यकमंडल्वादिनोद्धृतैर्जलैर्मृद्भिश्चगंधलेपक्षयकरंमृल्लगंधर

Indira Gandhi National Centre for the Arts

रशौचमनलसः ऊर्यात् नारद्वाजः अथापकृष्यविण्मूत्रंकाष्ठलोष्टतृणादिनाशौचंयथार्थव
कुर्याद्दृढंविदत्तमेहनः मेहनंलिंगम् पुराणात् मार्जनंवामहस्तेनवीरणाद्यैरयत्नियैः देवलः
आशौचान्तेत्सजेत्क्षिप्रंप्रसावोच्चारयोः स्वयम् विवस्वान् रात्रिमात्रंजलेत्पत्काऊर्यात्शौचमनु
द्धृते पश्चात्तछौधयेत्तीर्थमन्यथानशुचिर्नवेत्ययनः नाहरेन्मृत्तिकांवप्रान्नदीकूलात्सैकतात्तथा
वापीकूपतडागेषुनाहरेद्वालतोमदम् आहरेज्जलमध्यात्तुपरेतांमणिबंधनात् पुराणात् व
ल्मीकान्मूषकोत्खातान्मृदमंतर्जलात्तथा शौचावशिष्टंगेहाच्चनादद्यात्लेपसन्नवाम् अंतः प्रा
ण्यवपन्नांच स्तोत्खातांनकर्दमात् वापीकूपादिव्यतिरिक्तविषयोतर्जलमृत्तिकाप्रतिषेधः
नारद्वाजः नोषरात्रश्मशानान्नमदंमूषकस्थलात् नमार्गात्रजलाज्जातुनादद्यात्ऊर्ध्वतः
क्वचित् देवलः धर्मविद्वत्तिणंहस्तमधःशौचेनयोजयेत् तथैववामहस्तेननाभेरूर्ध्वंनशोधये
त् ज्ञातात्तपः आर्द्रमल्लकमात्रास्तुग्रासाइंदुक्षयेस्मृताः तथैवाहुतयः सर्वाः शौचार्थेचैवमति
काः एकालिंगेकरेसप्तेतिस्रोद्वेहस्तयोर्द्वयोः मूत्रशौषसमाख्यातंशुक्रेतुद्विगुणंस्मृतम् मनुः
एकालिंगेगुदेतिस्रस्तथावामकरेदश उभयोः सप्तदातव्यामृदः शुद्धिमभीप्सता एतच्छौचंगृह
स्थानांद्विगुणंब्रह्मचारिणाम् त्रिगुणंतुवनस्थानांयतीनांतुचतुर्गुणम् दक्षः अर्धप्रसृतिमा

त्रातुप्रथमामृत्तिकास्मृताद्वितीयाचतृतीयाचतदर्धेनप्रकीर्त्तिताएवमपिच गंधलेपक्षयकरी
यदिनश्यवेत् तदामदोधिकायाश्चः परिमाणतः संख्यातोवा तत्रांगिराः प्रथमाप्रसृतिर्ज्ञेयाद्वि
तीयातुतदर्धिका तृतीयामृत्तिकाज्ञेयात्रिनागकरपूरणी वसिष्ठः पंचपाणौदशैकस्मिन्नयोः
सप्तमृत्तिकाः शंखः मेहनेमृत्तिकाः सप्तलिंगेद्वेपरिकीर्त्तिते एकस्मिन्विंशतिर्हस्तेद्वयोर्ज्ञेयाश्चतु
र्दश मेहनःपापुःब्रह्मचारीविषयमेतत् हारीतः दशसप्तैषडष्टैसप्तैकानांतिसृणांपादोप्रक्षा
लयेत् वक्ष्यमाणाराः उपविष्टस्तुविण्मूत्रंकर्त्तुंयस्तंनविंदति सऊर्यादर्धशौचंतुस्वस्यशौच
स्यसर्वदा गंधलेपक्षयेसत्यप्यर्धमितासंख्यापूरणीया यदाहदक्षः न्यूनाधिकंनकर्त्तव्यंशौ
चंसद्भिमनीषिता प्रायश्चित्तेनयुज्येततविहितातिक्रमेकृते यथाविधिकृतेपिशौचेगंधश्चेन्ना
पगच्छति तत्राहमनुः यावन्नापैत्यमेध्यात्ताद्गंधोलेपश्चतत्कृतः तावन्मृद्वारिचादेयंसर्वासु
द्रव्यशुद्धिषुमनस्तुष्टाना वेतुदेवलआह यावन्नशुद्धिमन्येततावच्छौचंविधीयते ब्रह्मांड पु
राणात् आद्यंतयोस्तुशौचानामद्भिःप्रक्षालनंस्मृतम् अशेषलेपनाशायन्नावश्यंक्रियएवच
आदिपुराणात् स्त्रीशूद्रयोरर्धमानेशौचंप्रोक्तंमनीषिभिः दिवाशौचस्यनिरूपधेयधिपादोवि
धीयते आर्तः ऊर्याद्यथाशक्तिस्वसयः ऊर्याद्यथोदितम् अंतर्जानुभुचौदेशेउपविष्टउदङ्मु

Indira Gandhi National Centre for the Arts

खः प्राग्वाब्राह्मेणतीर्थेन द्विजोनित्यमुपस्पृशेत् १८ अनुपवीतेदेशेप्राङ्मुखउदङ्मुखोचोपविश्य
तर्जानुपाणिना ब्राह्मेणतीर्थेनद्विजन्मासर्वदाचमेत् गौतमः शुचौदेशेआसीनोदक्षिणंवाऽजा
न्वंतराकृत्वायज्ञोपवीत्यामणिबंधात्पाणीप्रक्षाल्यवाग्यतः हृदयंस्पृशन्त्रिरुदकमुपस्पृशेत् द्वि
र्वासुदक्षेत् खानिचोपस्पृशेत् शीर्षण्यानिमूर्धनिचन्यसेत् आचमेदित्यनुवर्त्तोसमंतंतरमूर्ध्व
तः करौकृत्वाप्राङ्मुखोवाप्युदङ्मुखःपाणीचसंस्पृशन्नद्भिःप्रकृतिस्थानिरवेचऊर्परेजानुनी
वरूपरावारःकृत्वाथशौचंप्रक्षाल्यपादौहस्तौचमज्जलैः निबद्धशिखआसीनोद्विजआचमन्
चरेत्कृतोपवीतंसर्वेसेवाङ्मनःकायसंयतः देवतः प्रथमंप्राङ्मुखःस्थित्वापादौप्रक्षाल्य
येद्बाहूनुदङ्मुखोवादेवत्येपैत्यकेदक्षिणमुखःशिखाबद्धावसित्वाद्येनिर्णिक्तेवाससीशुचे
तूष्णीन्यस्तासमाधायनऊर्ध्वन्नविलोकयन् नगच्छन्नशयानश्चनहृष्टोन्नपरामृशन्नहसन्नै
वजल्पंश्चनात्मानमवलोकयन् केशान्नीवीमधःकायमस्पृशन्धरणीमपि यदिस्पृशतिचै
तानिन्यूयःप्रक्षालयेत्करम् इत्येवमद्भिराजानुप्रक्षाल्यचरणौपथक् हस्तावामणिबंधान्याप
श्यादासीतसंयतःअथाऽनुप्रथमात्तीर्थाद्दक्षिणात्रिःपिवेत्समम् अशब्दमनवस्रावमबहि
र्जानन्बुबुदम् नक्षलन्नूचन्न मणिबंधःब्राह्मतीर्थमूलेप्रथमेतीर्थेब्राह्मतीर्थम् दक्षिणा

२०

दक्षिणात्करादित्यर्थः नारद्वाजः संहतांगुलिनातोयंगृहीत्वाणिनाद्विजः मुक्तांगुष्ठकनिष्ठेतु रो
धेणाचमनंचरेत् माषमज्जनमात्रासुसंश्लक्ष्णाः पिवेदयः आयतेपूर्वतःकृत्वागोकर्णाकृतिवत्क
रम् हारीतः आर्द्रवासास्थलस्थस्तुयद्याचामेन्नराधमः वस्त्रनिष्पीतनंतस्यदेहात्प्रेताः पिबंतिहिकर्म
दाचमननित्यंप्राङ्मुखोवाप्युदङ्मुखः जलस्थोवास्थलस्थोवाहृद्योर्वासमवस्थितः जलस्थोज
लकार्येषुस्थलस्थः स्थलकर्मसु उन्नयोत्तन्नयस्थस्तुकर्मस्वधिकृतोन्नवेत् गोबिलः जानुन्या
मूर्ध्नाचमंजलेतिष्ठन्नदुष्यति तान्यामधस्तथातिष्ठन्नाचमेन्नविचक्षणः लिखितः उद्धृतपरीक्षि
तानिरन्ध्राणिरमलानिरबुबुदानिरश्नद्राण्यध्येकपर्णावर्जितानिराचमेत् अद्भिरितिशेषः आय
तंतनःन्नमिगतास्वप्नाचम्यप्रयतोन्नवतियवाप्रयतआचामयेत् नवर्षधारास्वाचमेत्तन्नप्रद
रोदकेअपआचमेदितानुवर्त्तौ वसिष्ठः प्रदरादपियोगेसर्पणसमर्थाः नगंधरसदुष्टानिर्यास्रि
स्रुस्रुनागमाः प्रदरोगर्त्तः प्रचेताः अनुसाफेनशीतानिःपूतानिर्वस्त्रेणुषा ऊष्मानिरफेनानि
स्त्रिश्चत्रुर्वाद्विराचमेत् ब्राह्मतीर्थस्पर्शेनमाह प्रसंगात्तीर्थांतराणांच कनिष्ठादेशिन्पंगु
ष्ठमूलान्पर्यंथकरस्यच प्रजापतिपित्र्यब्रह्मदेवतीर्थान्यनुक्रमात् १९ कनिष्ठामूलंप्रजापतितीं
र्थम् प्रदेशिनीमूलंपित्र्यतीर्थम् अंगुष्ठमूलंब्राह्मतीर्थम् हस्ताग्रंदेवतीर्थमजानीयात् कनिष्ठा

Indira Gandhi National Centre for the Arts

द्वस्वांगुलिः देवि दानीनर्जनीअंगुष्ठः प्रसिद्धः हारीतः ब्राह्मणस्तीर्थेनाचमेत् आवपनहोमतर्पणा
निप्राजापत्येनऊर्ध्वात् मार्जनाचमनबलिकर्मनोजनानिदेवेनपित्र्यर्थानिपित्र्येण प्रतियहप्रा
जापत्येन आग्नेयंपाणिमध्यंआवपनंनिर्वायःकेशानांमार्जनेनप्रोक्षणम् मार्कंडेयपुराणात् नां
दीमुखानांऊर्वीतःप्राज्ञः पितृोदकक्रियाम् प्राजापत्येनतीर्थेनयज्ञकिंचित्प्राजापत्यः नविष्यतु
राणे कमंडल्वर्स्यस्पर्शनंदधिप्राशनमेवच सोमतीर्थेनराजेंद्रसदाऊर्ध्वाद्विचक्षणः लाजाहोमं
तथादोहंप्राजापत्येनकारयेत् योगयाज्ञवल्क्यः अंगुष्ठमूलेब्राह्मस्यादैवंत्वंगुलिमूर्ध्वनि प्राजापत्यं
तुमूलेस्यान्मध्येसौम्यंप्रतिष्ठितम्मध्येतलमध्येइत्यर्थः त्रिःप्राश्यापोद्विरुन्मृज्यखान्यद्भिःसमु
पस्पृशेत् त्रीन्वारानपःपीत्वावारद्वयंमुखंसंमृज्यछिद्राण्यद्भिःसंस्पृशेत् देवलः द्विस्तथायुष्य
मूलेनपरिमृज्यात्ततोमुखम् नाग्रेणांगुल्यानपृष्ठैर्वापरिमृज्यात्कथंचन अद्भिस्तुप्रकृतिस्थानिहीं
नानिःफेनबुद्बुदैःहृत्कंठतालुगानिस्तुयथासंख्यंद्विजात्तयः २० शुद्ध्येरन्स्त्रीचशूद्रश्चसकृत्स
ष्टानिरंततः अद्भिरविकृतानिःफेनबुद्बुदरहितानिःहृदयकंठतालुगानिर्यथासंख्यंब्राह्मणक्ष
त्रियवैश्याःशुध्यंति स्त्रीशूद्रौतुमुखस्यांतेनौष्ठद्वये नैकवारंस्पृष्टानिःतथाचाचमनीयंयथाह २१
दयंगमानवंति दक्षःप्रक्षाल्यहस्तौयादौचत्रिःपिबेदंबुवीदितम् सकृत्पांगुष्ठमूलेनद्विःप्र

मृज्यात्ततोमुखम् अतोमकौचोष्ठौसंहत्येत्यर्थः यमः रात्रावनीक्षितेनैवशुद्धिरुक्तामनीषिणाम्
उदकेनातुराणांचतथोष्णेनोष्णयायिनाम् उष्णयायिनोदीक्षिताःपुराणात् दक्षिणंतुकरंकृत्वा
गोकर्णाकृतिवत्पुनः त्रिःपिबेदीक्षितंतोयमास्यंद्विःपरिमार्जयेत् आदौशिरस्तथान्युत्पतिसंनि
मुखमात्मनेत् यथोक्तविधिनाखानिततः स्पृष्ट्वाविशुद्ध्यति तिसृभिरंगुलिभिरित्यर्थः मनुः त्रिरा
चमेदयः पूर्वंद्विःप्रक्षाल्यततोमुखम् खानिचोपस्पृशेदद्भिरात्मानंशिरएवच दक्षः मध्यमानिर्मु
खंपूर्वंनिसृभिःसमुपस्पृशेत् अंगुष्ठदेशिनीन्योचनासिकेतदनंतरम् अंगुष्ठानामिकाभ्यांच
चक्षुषीसमुपस्पृशेत् कनिष्ठांगुष्ठयोःश्रोत्रंनाभिमंगुष्ठकेनतु तलेनहृदयंस्पृष्ट्वासर्वानिः
शिरएवतुबाहूचाग्रेणसंस्पृशेत्ततःशुद्धोभवेन्नरः अंगुष्ठानंतराप्रदेशिनीअनामिकाउपकनिष्ठि
कातलंपाणिमध्यं वैयाघ्रपद्यः स्रोतस्थानानिसर्वाणिस्पृष्ट्वास्पृष्ट्वाविशुद्ध्यति आचमन्ब्राह्मणो
नित्यमिहजगवान्नन्दयुः अंगुष्ठेनस्पृशेन्नासिंसंयुक्तेनकनिष्ठया उरसालेनांगुलिभिःशिरः प
श्चान्नुपंचभिःअंसौस्पृष्ट्वाकराग्रेणतोयंस्पृष्ट्वासमाहितः संस्मरत्पयनाभंचविप्रः सम्पविशु
द्ध्यति भविष्यपुराणे अंगुष्ठेग्निर्महावाहोप्रोक्तोवायुःप्रदेशिनी अनामिकातथासूर्यःकनिष्ठा
चंद्रमास्मृतः प्रजापतिर्मध्यमातुज्ञेयान्नरतसत्तम यमः तावन्नोपस्पृशेद्विद्वान्यावद्धामेनसंस्पृ

National Centre for the Arts

शेत् जलमितिशेषःवामेसिद्धादशादित्यावरुणस्त्रिदशेश्वरः व्यासःअनुद्धृतानिराचमेत्कामंतिष्ठ
न्नपिद्विजःआतुरश्चेच्चाद्यानोपिपश्यन्भीतोदिशास्था स्मृत्यंतरम्ताम्रात्रमनारिकेलाज्ववेणुदळा
लावुचर्मनिःस्वहस्तेनापिवाचामेत्सर्वदाशुचिरेवसःनकेवलमनिदितहस्तेनेत्यपिशाद्यार्थःवै
धायनःपादप्रक्षालनाळेषेणनाचमेत् यद्याचमेद्भूमौस्रावयित्वाचमेत्नसवुद्बुदानिर्नसफे
नानिर्नोष्मानिनक्षाराःनिर्नविवर्णानिर्नकलुषानिर्नहसन्नजल्पन्नतिष्ठन्नवित्रोकयन्नप्रेक्षे
नप्रणतोनमुक्तशिखोनाबद्धकक्षोनवहिर्जानुर्नवेष्टितशिरानबद्धकक्षोनत्वरमाणोनायज्ञो
पवीतीनप्रसारितपादःशब्दमकुर्वन्स्त्रियोहृदयंगमःपिवेत्त देवलःसोपानत्कोजलस्थोवा
मुक्तकेशोथवाद्विजःउष्णीषीवापिनाचामेद्वस्त्रेणावेष्टयवाशिरःआपसंनःनवर्षधारास्वाच
मेत् यमःअपःकरनखस्पृष्टायआचामतिवैद्विजःसुरांसपिवतितस्यकृंयमस्यवचनंयथाब्र
ह्मंडपुराणात् कंठंशिरोवाप्रावृत्यरथ्यायाणगतोपिवा अकृत्वापादयोःशौचमाचांतोप्यशुचिर्न
वेत् मरीचिःनयाडुकास्थोनाचक्तःशुचिःप्रयतमानसः उपस्पृश्यद्विजोनित्यंशुद्धएवनवेत्तु
सःचुल्कासनस्थोप्याचामेन्नान्यकालेकदाचन प्रचेताःनोत्तरीयानिर्वसानास्रुक्कूर्चन्नाचामे
त् आपस्तंनः नाग्युदकशेषेणयथाकर्माणिकुर्वीतआचामेद्भूमौस्रावयित्वावाचामेत्

विष्णुःनस्पृशन्नहसज्जल्पन्नश्चंडालदर्शने नापवित्रकरःकश्चिद्ब्राह्मणोपउपस्पृशेत् अपूतं
तस्यतत्सर्वंनवत्याचमनंतथेति यमःवामहस्तास्थितेदर्भेदक्षिणेनाचमेद्यदि स्कंदतेवेत्तो
यंपीत्वाचोद्वायणंचरेत् उपनीतस्यक्रमप्राप्तमध्यंदिनसंध्यास्नानादिसहितमाह स्नानमद्धे
वतैर्मंत्रैर्मार्जनंप्राणसंयमः २१ सूर्यस्यचाप्युपस्थानंगायत्र्याःप्रत्यहंजपः स्नानमाप्लवनम् अ
द्धैवत्यैरापोहिष्टेत्येवमादिभिर्मंत्रैर्मार्जनंस्वशिरःप्रोक्षणंप्राणायामःसूर्योपस्थानंगायत्रीजपश्चे
तिप्रत्यहंमध्यंदिनेकार्यम् ब्रह्मचारिप्रकरणेविष्णुःअप्सुदंडवन्मज्जनम् कात्यायनःरक्षार्थंवारि
णात्मानंपरिक्षिप्यसमंततःशिरसोमार्जनंकुर्यात्कुशैःसोदकविंदुभिःतत्रापोहिष्टीयानंमार्षी
दिकमाहयोगयाज्ञवल्क्यःसिन्धुद्वीपोब्रह्मवेदार्षगायत्रंछंदएवचआपस्तुदैवतंप्रोक्तंविनियोग
स्तुमार्जनेव्यासःविपुषोष्टौक्षिपेदूर्ध्वमधोयस्यक्षयायजित्र आपोहिष्टेतित्रर्चेनअतियादंमा
र्जनंकार्यम् तत्रयस्यक्षयायजिन्वथेत्यधोमुखंक्षिपेत् तथामार्जनंजलमध्येतुप्राणायामोयत
स्तःजलेवास्थलेवेत्यर्थःअथपवित्रकरणम् तत्रकात्यायनःअनंतर्गर्भिणंसाग्रंकोशद्विद
लमेववाप्रादेशमात्रंविशेषेयंपवित्रंयत्रऊर्ध्वंवित्र एतद्देवकपिंजल्यालक्षणंसमुदाहृतम् आ
ज्यसंस्कारनार्थंयत्तदप्येतावदेवतुएतत्प्रमाणमेवैकेकोशीमेवार्द्रमंजरीम् शुष्कांवाशीर्णकुसु

Indira Gandhi National Centre for the Arts

मांपिंजलीयरिचक्षते मार्कंडेयः चतुर्निर्दर्भपिंजूरैर्ब्राह्मणस्यपवित्रकम् एकेनन्यूनमुदिष्टंवर्णावर्णो
यथाक्रमम् त्रिनिर्दर्भैः शांतिकर्मपंचभिः पौष्टिकंतथा पिंजूलैः सप्तभिः सर्वदैवेपित्र्यंविधीयते
नीवीमध्येतुयेदर्भाब्रह्मसूत्रेक्षयेकताः पवित्रांतान्विजानीयाद्यथाकायस्तथाऊर्णाः जपेहोमे
तथादानेस्वाध्यायेपित्तर्पणे अश्नूनंतुकरंऊर्यात्सुवर्णरजतैः कुशैः जपेहोमेतथादानेस्वा
ध्यायेपित्ततर्पणे सव्यापसव्यौऊर्वीतसवित्रौकरौबुधः ग्रथिर्यस्यपवित्रस्यनतोनाचमनंच
रेत् आर्षंछंदोदैवतंविनियोगविधिंस्मरेत् स्मृत्वोंकारंचगायत्रीनिबध्नीयाच्छिखांततः पु
नराचम्यहृदयंनासिकेधोचसस्पृशेत् तथा प्रणवाद्याव्याहृतीश्चसावित्रींचजपेत्ततः तथानि
मंत्र्यसलिलंसंध्योपासनमाचरेत् प्राणायामस्वरूपमाह गायत्रीशिरसासार्धंजपेद्व्याहृति
पूर्विकाम् २२ प्रतिप्रणवसंयुक्तांत्रिरयंप्राणसंयमः तत्सवितुरितिगायत्र्याअस्याएवतैत्तिरीय
कारणेप प्राणायाममंत्रत्वेनाम्नात् ओंआपोज्योतिरित्यादिकेनशिरसासार्धंव्याहृतिपूर्विकांप्रति
प्रणवसंयुक्तांत्रिःपरिजपेत् एषप्राणसंयमः प्राणायामइत्यर्थः भूराद्याव्याहृतयः सप्तसत्यं
तांपूर्वायस्याः सात्पूर्विकाप्रतिमंत्रंप्रणवः प्रतिप्रणवः मंत्राश्चव्याहृतयः सावित्री शिरश्चशि
रसोमतेयःप्रणवः सशिरोंतर्मंत्रांतर्गतएव संवर्त्तः प्रणवेणतुसंपुक्तान्व्याहृतीःसप्तनित्यशः

२३

सावित्रीशिरसासार्धंमनसात्रिःपठेद्द्विजः मनुःसव्याहृतिंसप्रणवांगायत्रीशिरसासह त्रिःपठेदा
यत प्राणः प्राणायामःसउच्यते वह्नयतिः वह्नासनेनियम्यासुंसमत्वाचार्षादिकंतथा सन्निमी
लितदृङ्मोनीप्राणायामसमन्वसेत् योगयाज्ञवल्क्यः ओंकारः परमंब्रह्मसर्वमंत्रेषुनायकः प्रा
जापतेर्मुखोत्पन्नस्यः सिद्धस्यवैपुरा तेनोपात्तमतत्सस्यब्रह्मार्षंचस्वयंभुवः गायत्रीचन्नवेच्छं
दश्चाग्निर्दैवतमुच्यते ग्रादौसर्वत्रयुंजीतविविधेष्वेवकर्मसु विनियोगः समुद्दिष्टःश्वेतवर्णउ
दाहृतः व्याहृतीनांचसर्वासामृषिर्ब्रह्माप्रकीर्त्तितः ततश्छंदांसियान्यासांतानिसम्यक्प्रदर्शयेत्
गायत्र्युष्णिगनुष्टुब्बृहत्तीपंक्तिरेवच त्रैष्टुब्बविश्वेदेवाश्चदेवताःसमुदाहृताः प्राणायामप्र
योगेचविनियोगउदाहृतःतथासवितादेवतायस्यामुखमग्निस्त्रियाऋचाविश्वामित्रऋषिश्छंदो
गायत्रीसावित्रिष्यते विनियोगउपनयेप्राणायमेतथैवच गायत्रीवाइदंसर्वंब्राह्मणंब्राह्मणा
नित्तु वेदेष्वन्यान्यनेकानिगायत्रगकीर्त्तितानितु ओंआपोज्योतिरित्येषमंत्रोयस्तुप्रकीर्त्यते त
स्यप्रजायतेरार्षंयजुश्छंदोविवर्जितम् ब्रह्माग्निवायुसूर्याश्चदेवताःसमुदाहृताः प्राणस्यायम
नेचैवविनियोगउदाहृतः पूरकऊनकरेवकैः प्राणायाम स्त्रिलक्षणोज्ञेयः यथा नासिकाहस्त
उच्छ्वासोयंतःपूरकउच्यते ऊनकोनिश्चलश्वासोमुच्यमानस्तुरेचकः नीलोत्पलउपमनिभेना

Indira Gandhi National
Centre for the Arts

निदेशेप्रतिष्ठितम् चतुर्भुजंमहात्मानंपूरकेणैवचिंतयेत् ऊंनकेनहृदिस्थानेध्यायेच्चकमल
सनम् ब्रह्माणंगौरसर्वांगंचतुर्वक्त्रंपितामहम् रेचकेनेश्वरंविद्याल्ललाटस्थंमहेश्वरम् शुद्ध
स्फटिकसंकाशंनिर्मलंपापनाशनम् प्राणायामत्रयंकार्यंसंध्यास्वथतिसृष्वपि प्राणस्यायम
नंकृत्वाआचमेत्प्रयतोपिसन् ओंतरत्स्विद्यतेयस्मादाचमनंस्मृतम्सायमग्निश्चमेपुत्काप्र
तः सूर्यश्चमापिवेत् आपःपुनंतु मध्याह्नेततश्चाचमनंचरेत् आपःपुनंत्वितिसिंधुद्वीपस्यृषिः
ब्राह्मणस्पतिर्देवताअनुष्टुप्छंदःसूर्यश्चमेत्यग्निरृषिःसूर्यमन्युपतयोदेवता स्पृष्ट्वाचाग्निंसुतं
तोयंमूर्धिब्रह्मसुखेनतु आपोहिष्टेतिसूक्तेनदैर्मार्जनमाचरेत् प्रणवोव्याहृतिःसावित्रीब्रह्मसु
खम् तेनतोयंस्पृष्ट्वा तेनतोयेनमूर्धिंदैर्मार्जनंचायोहिष्टेतिसूक्तेनऊर्यादित्यर्थः आपोहिष्टे
त्यस्यसूक्तस्य अंबरीषःसिंधुद्वीपऋषिरापोदेवतानवम्याउत्तरावर्त्तस्याग्निः आद्यानांसप्तानाग
यत्रीछंदः उत्तरयोरनुष्टुप्मार्जनेविनियोगःकात्यायनः उत्थायार्कंप्रतिप्रेक्ष्यत्रिकेणांजलिमं
नसः प्रणवोव्याहृतयः सावित्रीतित्रिकम् अथस्वशाखाधीतैः सूर्यदैवत्यैर्मन्त्रैः सूर्यमुपतिष्ठे
ततस्तः सावित्रीजपेत् तत्रव्यासः आवाहयेत्तुगायत्रींसर्वपापप्रणाशिनीम् आगच्छवरदे
देविजपेमेसन्निधौभवगायंतंत्रायसेयस्माद्गायत्रीत्वमतःस्मृता योगयाज्ञवल्क्यः श्वेतव

२४

र्णांसमुद्दिष्टांकौशेयवसनांतथा श्वेतैर्विलेपनैः पुष्पैरलंकारैश्चभूषितांआदित्यमंडलांतःस्थां
लोकनिवासीनि ब्रह्मसूत्रधरांदेवींयज्ञासनगतांशुभ्रां आवाह्ययजमानोहितेजोसीतिविधा
नतः आवाह्यपूजयित्वातुनमस्कृत्यविसर्जयेत् ओंकारःपूर्वमुच्चार्योभूर्भुवःस्वस्तथैवच गाय
त्रीप्रणवश्चान्तेतपेद्येवमुदाहृतः यमः सहस्रपरमांदेवींशतमध्यांदशावरांगायत्रींतुजपेन्नि
त्यंसर्वपापप्रणाशिनीम् ऊर्वीदित्यनुवृत्तोयोगयाज्ञवल्क्यः गृहेत्वेकगुणंजप्यंनद्यांतुत्रियु
णंस्मृतम् गवांगोष्ठेशतगुणमश्वागारेशताधिकम् सिद्धक्षेत्रेषुसर्वेषुदेवतायाश्चसन्निधौ
सहस्रशतकोटीनामनंतविष्णुसंनिधौतथाच तिष्ठंश्चैवंजपन्ऊर्यात्समाहितःअ
न्यथाप्राङ्मुखःऊर्यादृश्यमाणश्चमेणतु प्राङ्मुखेषुकुशेष्वेवमासीनश्चासनेशुभे नात्युच्छ्रितेना
तिनीचेदर्भपाणिःसुसंयतः स्फटिकैर्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैःअक्षमालांतुकर्त्तव्याउत्तमा
त्त्वक्तरोत्तरःकोद्याधिकान्तवेदृश्यमालाविशेषतः जपस्यक्रियमाणस्यतस्मात्श्रेष्ठापराप
राब्रह्मवेत्वक्षमालायाःऊर्ध्वंप्रोथ्यपाणिना जपंवहिकर्त्तव्यंएकाग्रमनसासदाशिवः ऊ
र्ध्वास्यासमासीनःऊर्ध्वोत्तरायांवाऊर्ध्वापवित्रपाणिरुदङ्मुखःसर्व्वानिमुखोवाक्षमालामा
दायदेवतांध्यायन्ऊर्यादिति वर्सीआसनम् ऊर्ध्वोत्तरासुशोभना सुवर्णमणिमुक्ताफलस्फ

Indira Gandhi National Centre for the Arts

टिकपञ्चादशरुद्रादपुत्रजीवकानामन्यतमामन्त्रमातंऊर्यात् ऊर्ग्रंथिकर्त्तावाहस्तोपयामेर्वा नत
थान्येनजप्येन पापंनिर्दहतिद्विजः यथासावित्रीजप्येनसर्वपापैः प्रमुच्यते योगयाज्ञवल्क्यः ध्या
येत्मनसामंत्रंजिह्वोष्ठौनचचालयेत्नकपयेच्छिरोग्रीवंदन्तान्नैवप्रकाशयेत्नचक्रमन्त्रचक्षस
त्रंसन्त्रविचालयन् नायाश्रितेनजल्पंश्चनाप्रावृत्तशिरास्तथा नपदापदमात्रस्पन्चैवहितथास
मम् नचासमाहितमनानचसंश्रावयञ्जपेत्नक्लिन्नवासास्थलमोजपादीनाचरेद्बुधः व्रताद्दतेना
द्रवासोनैकवासाःसमाचरेत् नजीर्णेननीलेनपरिक्लिष्टेनवाजपेत् यद्रात्रसंकृतानिसिद्ध वि
द्याधरागणाः हरंतिप्रसन्नयस्मात्तस्माद्धृत्तुद्धारयेत् जप्यकालेनन्नाषेतव्रतहोमादिकेतथा एतछे
वावसक्तस्तुयद्यागछेद्विजोत्तमः अनिवार्यततोविप्रयोगदोषंन्च कीर्त्तयेत्अवसक्तोवहितः त्र
ह्मीमासीतवजपंश्चंडालपतितादिकान् दृष्ट्वातान्कार्युपस्पृर्शनाप्यस्नात्वापुनर्जपेत् उपस्पृश्य
चम्य आनाप्यसंनाप्येत्यर्थः आचम्यप्रयतोनित्यंजपेदश्रुचिदर्शने सोरान्मंत्रान्यथोत्साहंयाव
मानीश्वरोक्तितः उपांशुजपथसुरुत्रंस्यात्तयुणोनवेत् साहस्रोमानसःप्रोक्तोयस्माद्ध्यानसमोहि
सःत्रंस्यउच्चैर्जपःउोष्ठस्पन्दनमात्रंतुयत्रोपांशुतथाध्वनिः जिह्वांकृत्वानिर्विकल्पांचितयेत्तद्धिमो २५
नसम् नीचैर्जपंबुधःऊर्यात्सावित्र्यास्तुविशेषतइति सायंसंध्योपासिमाह प्राणानायम्यसंप्रो

क्ष्यक्षचेनात्मानंसंप्रोक्ष्यप्रत्यङ्मुखःसावित्रीपूर्ववज्जपंस्तारकोदयंयावन्नद्यादावासीतउदयोद
र्शनयोग्यता उपासीतेत्यनुवृत्तौ शौनकः अर्धास्तमितमंडलआनक्षत्रदर्शनादिति तत्राग्निश्चमाम
नश्चेत्यग्निरृषिरग्निमन्युयत्तयोर्देवताप्रकृतिश्छंदः अपामूर्ध्वंविद्वेषेविशेषोव्यासोक्तः करान्यांतोय
मादायगायत्र्याचाग्निमंत्रितमूर्ध्वंआदित्यानिमुखवत्तिस्रेत्रिरूर्ध्वंसंध्ययोःक्षिपेत् इतिमध्यदिनसंध्यया
समानमन्यत्तत् सायंसंध्याजपांतेरात्र्युपस्थानंबोधायनआह इममेइतिवारुणीन्यारात्रिमुपति
ष्ठतेइति ओंइममेवरुणश्रुधीहवमद्याचवंउद्यत्वामवस्युराचकेतत्त्वायामिब्रह्मणाचन्दमानात
दाशास्तेयजमानोहविर्भिःअहेडमानोवरुणेहबुध्योरुशंसमानआयुःप्रमोषीरितिश्रुतःश्रेयस्सिद्धिः
रात्रिर्देवतापूर्वागायत्री उत्तरात्रिष्टुप् प्रातःसंध्योपासिविधिमाह संध्यांप्राक्प्रातरेवहितिष्ठेदासूर्य
दर्शनात् २८ प्राणायामप्रोक्षणागायत्रीजपाएवंत्रादेनगृहीताःप्राङ्मुखःसावित्रीजपेत्प्रातः सेश्य
सूर्यदर्शनाकालेयावत्सिद्धेदिति संध्यामितिकालाध्वनोरत्यंतसंयोगेइतिद्वितीयातेनसकलसंध्या
कालेजपेनवापनीयः अत्रचओंपूर्वागायत्रीजपेदितिश्रुतिविरोधपरिहारार्थेजपएवप्राधान्येनवि
धेयः स्थानासनेतुतदंगतयातेनजपन्नासीतेति आसीनोजपेदित्यर्थः संवर्त्तः प्रातःसंध्या
मुपासीतसनक्षत्रोयथाविधि सादित्योपश्चिमांसंध्यामर्धास्तमितनाक्षरामितियोगयाज्ञवल्क्यः

Indira Gandhi National Centre for the Arts

क्रासवर्जीवुसत्ततंदिवसानांयथाक्रमम् संध्यामुत्कर्त्तमान्नुक्रासेवर्जोवुसाम्पूर्वासंध्यातुगा
यत्रीसावित्रीमध्यमात्सतायान्नवेत्पश्चिमासंध्यासाविज्ञेयासरस्वतीरक्तान्नवतिगायत्रीसावित्री
श्वेतवर्णिका कृष्णासरस्वतीज्ञेयासंध्यात्रयमुदाहृतम् संधौसंध्यामुपासीतनासागोनोदूतेरवौ
संध्यात्रकंतुकर्त्तव्यंद्विजेनात्मविदासदा उनेसंध्येवकर्त्तव्येब्राह्मणोश्नुगतेष्वपि अतश्चवाग्य
न्मध्याह्नसंध्यागृहेनकार्येतिगम्पते वसिष्ठः अनृतंमद्यगंधंचदिवामैथुनमेवच पुनातिष्ट
षत्तस्यान्नसायंसंध्याह्युपासिता बहिः संध्यादशगुणागर्त्तप्रस्रवणादिषुख्यातत्तीर्थेशतगुणा
साहस्त्राजाह्नवीजले मनुः एतदक्षरमेतंचजपन्व्याहृतिपूर्वकाम् संध्ययोरुभयोर्विप्रो
दपुण्येनयुज्यते एतदक्षरप्रणवः यमः यदह्नाक्रियतेपापंकर्मणामनसागिरा आसीनः य
श्चिमांसंध्यांप्राणायामैश्चहंतितत् यद्रात्र्याक्रियतेपापंकर्मणामनसागिरा पूर्वांसंध्यामुपा
सीनः प्राणायामैर्व्यपोहति संध्यामुपासतेयेवुसत्ततंसंशितव्रताः विधूतपापास्तेयांतिब्रह्म
लोकंसनातनम् ऋषयोदीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुवन्प्रजांयशश्चकीर्त्तिंच प्रलवर्चसमे
वच विष्णुपुराणम् सर्वकालमुपस्थानंसंध्ययोर्यार्थिवेष्यते अन्यत्रसूतकाशौचसंभ्रमा
त्तुरन्नीतितः पुलस्त्यः संध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत् सूतकेमृतकेचैवसंध्याकर्म

नसंत्यजेत् मनसोच्चारयेन्मंत्रान्प्राणायाममतेद्विजः यमः अनागतातुयेपूर्वामतीतांयेचपा
श्चिमाम् विप्राः संध्यानतिक्रमंतासउदाहृताः दक्षः उपासतेनयः संध्यांब्राह्मणोहि विशोषतः
सजीवन्नेवशूद्रत्वमृतः श्वाचैवजायते संध्याहीनोशुचिर्नित्यमनर्हः सर्वकर्मसु यदन्यकृ
तेकर्मनतत्फलमवाप्नुयात् अग्निकार्यंततः कुर्यात्संध्ययोरुभयोरपि तारकोदयात्पूर्वंदर्शे
नाऊर्ध्वंसंध्याकालेप्रत्यासन्न एवकालेरवगृह्योक्तविधिनासमिद्धोमंकुर्यात् नविष्णुपुराणात्
दूरादाहृत्यसमिधःसन्निदध्याद्धोपूरिसायंप्रातश्चजुहुयान्नानिरग्निमतंद्रियतः दूरादाहृत्यस
मिधःसन्निदध्याद्धोमकर्मणि अग्निकार्यंहोमादिकंप्र
तीयते सायंप्रातश्चशब्दात्पारात्रेऽहनीउपलक्ष्येते वैजवापःपुरासमयात्प्राग्उदीचीदिशाग
त्वाहिसन्नरण्यान्समिधआहरेत् शुष्काब्रह्मवर्चसकामः आर्द्रान्नाद्यकामः उभेउभयका
माः कात्यायनः नांगुष्ठादधिकाकार्यासमित्स्थूलतयाक्वचित् नविशुष्कात्वचावैवनसकीटान
पाटिताप्रादेशान्नाधिकानोनातथानस्याद्विशाखिका नसपर्णानिनिर्वीर्याहोमेषुचविजान
तांविशीर्णद्विदलात्रस्वावक्रासशुषिरातथा नयात्याचक्षुषोर्जुष्टाकर्मसिद्धिविनोशका वायु
पुराणात् पालाशःसमिधः कार्याः खादिर्यस्तदलाभतः शमीरोहितकाश्वत्थास्तदलाभेर्कवेत

Indira Gandhi National Centre for the Arts

सः कात्यायनः यत्रोपदिश्यतेकर्मकर्त्तुरंगंनशोच्यते दक्षिणस्तत्रविज्ञेयः कर्मणांपारगः करः
यत्रदिङ्नियमोनास्तिजपहोमादिकर्मसु तिलस्तत्रदिशःप्रोक्तोद्रौसोमापराजिता आसीनःप्र
कुर्य्याद्यानियमोयत्रनेदृशः तदासीनेनकर्त्तव्यंनप्रद्वेषेणनतिष्ठताशातातपः नानिवाद्या
स्तुविप्रेणक्षत्रियाद्याःकथंचन ज्ञानकर्मगुणोपेतायद्यप्येतेबहुश्रुताः ब्राह्मणाः सर्ववर्णानां
स्वस्तिऊर्यादितिश्रुतिः सवर्णासुसवर्णानांकार्यमेवानिवादनम् अंगिरः अप्रणामंगतेशूद्रे
स्वस्तिऊर्वतियेद्विजाः शूद्रोपिनरकंयातिब्राह्मणास्तदनंतरम् यमः यत्सुखंत्रिषुलोकेषुव्या
धिव्यसनवर्जितम् यस्मिन्सर्वेस्थिताःकामाःसरस्वत्यभिसंज्ञिता तथाक्षत्रियस्त्रियुगंहंति
वैश्योहंतिचतुर्युगम् हत्येकविंशतियुगंशूद्रोब्राह्मणमब्रुवन् नविष्यत्पुराणात् अभी
तिगदितोविष्णुर्वादहत्पिशाकरः द्वावेवपूजितौतेनयः करोत्यभिवादन
म् सव्यापसव्यादिविधिर्यत्रनोविद्यतेक्वचित् यज्ञोपवीतिनातातत्रनार्घंसर्वेषुकर्मसु अ
थाभिवादनविधिमाह ततोभिवादयेद्रुद्रोनसावहमितिब्रुवन् २५ ततोग्निकार्यंकृत्वा असा
वहमितिब्रुवन् ज्यायसोभिवादयेत् असावित्यस्यस्थानेप्रथमांतंनामकीर्त्तयेत् तथाभिवा
दयेदित्युक्त्वा मनुः अभिवादात्परंविप्रोज्यायांसमभिवादनम् असौनामाहमस्मीतिस्वनाम २७

परिकीर्त्तयेत् नोः शर्मकीर्त्तयेद्देवस्यनाम्नोभिवादने अतश्चैवंप्रयोगोभवति अभिवादयेचैत्र
नामाहमस्मिनोःइत्यभिवादितेतच्चप्रत्यभिवादनंयथाकार्यंतथाह सएव आयुष्मान्भवसोम्येतिवा
चोविप्रोभिवादने अकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःप्लुतः अत्रचाभिवादकनामसन्निविष्टमि
त्यस्वरोपलक्षणार्थमकारग्रहणम् ततश्चयएवास्यस्वरोत्यःसप्लुतःकार्यःपूर्वाक्षरइतिवचनात्पूर्व
मक्षरंयस्यसःपूर्वाक्षरःपूर्वमभिवादकनाम्नोतर्वर्त्तिनःतच्चसामर्थ्याद्व्यंजनंस्वरस्पृग्व्यंजनमवस्थितपूर्व
मक्षरंयस्यसःपूर्वाक्षरइतिविशेषणेपादानाद्व्यंजनसहितएवस्वरःप्लावनीयःनपुनरपूर्वोकारोनामांते
विधीयतेइतिनिश्चीयते तथाचवसिष्ठः आमंत्रितेस्वरोत्यस्यप्लवतेसंध्यक्षरमप्रगृह्यमायातना
वंचेति आमंत्रितविभक्तेरंतस्यनाम्नोतेयःस्वरःसप्लवतेत्रिमात्रोभवति तथाप्रगृह्यसंज्ञावर्जितं
यत्संध्यक्षरमेकारैकारूपमाइनावस्तस्यकार्यः ओकारौकारूपंवेदात्तस्यउत्वावःकार्यःअत्रो
दाहरणानि आयुष्मान्भवसोम्यदत्तावत्सशर्माव यज्ञभूताव चित्रायाव ज्यायांसमभि
वादयन्नित्युक्तेतत्रकियताकालेनज्यायान्भवतीत्यपेक्षितेमनुराहदशाब्दाख्योरसंपंचाब्दा
ख्यकन्यातम् श्रुत्वपूर्वंश्रोत्रियाणामत्येनंपितृयोनिषु पुरवासिनोदशनिर्वर्षैःपूर्वः सखेव
भवति ततोधिकवर्षासुज्यायान्कन्यातमूत्रित्यिनागायनादीनांपंचाब्दः पूर्वःसखातताधि

Indira Gandhi National Centre for the Arts

कोज्यायान् ऋग्वदापेक्षमत्वम् श्रोत्रियाणां ऋग्वदपूर्वः सखा ततोधिकोज्यायान् तस्यचतारता
म्यगुणातारतम्यापेक्षम् अपिशब्दएवकारार्थः स्त्रियः कर्त्तव्यप्रत्यभिवादनानभिज्ञा सुरुषाश्वप्र
ति तदाहमनुः नामधेयस्ययेकेचिदभिवादनजानते तान्प्राज्ञोहमितिब्रूयात्स्त्रियः सर्वास्तथैव
च आपस्तंबः त्रिवर्षपूर्वः श्रोत्रियोभिवादनमर्हति ज्ञानमानेचवायोर्विशेषेबहुतरायाभिवाद्य
म् तथाचसमानग्रामेवसतामन्येषामपिबहुतरागांप्राङ्प्रातराज्ञादभिवादयीतस्वर्गमायुष्ये
ण्यं दक्षिणंबाहुंश्रोत्रसमंप्रसार्यब्राह्मणोभिवादयीत इतरःसमराजन्यः मध्यसमंवैश्यः नीचैः
शूद्रः प्राञ्जलिस्तथा विषमगतायणुरवेनाभिवाद्यमन्वारुह्याभिवादयीत सर्वत्रप्रत्युत्थायाभिवा
दनम् अप्रयतेननाभिवाद्यम् तथाच अप्रयत प्रयतायनाभिवादयेत् पतिवयसः स्त्रियश्च
वहितशिराअवहितपाणिर्वाभिवादयति सर्वनाम्नास्त्रियः राजन्यवैश्योसचनाम्नामातरमार्यदा
रंश्चेत्येके सांख्यायनःअहरहराचार्यायाभिवादयेत् गुरुन्यश्चसमोत्यश्रोत्रियस्य मनुः लौकिकं
वैदिकंवापि तथाध्यात्मिकमेववाआदधीतयतोज्ञानंतंपूर्वमभिवादयेत् गुरोर्गुरौसन्निहित्ते
गुरुवद्वृत्तिमाचरेत् नचाभिसृष्टेगुरुणास्वानुगूनभिवादयेत् अभिसृष्टः अननुज्ञापितः स्वा
मातुलादीन् इदंत्वेवाप्युपासीतस्वाध्यायार्थंसमाहितः गुरुंचैवाभिवादयेत् वदंत्वादेवगुरो

रभिवादनेसिद्धेपथावचनंशास्त्रांतरोक्तेनोपसंग्रहणेनविकल्पार्थम् उपसंग्रहणमाहमनुः विप्रस्तपा
णिनाकार्यमुपसंग्रहणंगुरोः सव्येनसव्यः स्प्रष्टव्योदक्षिणेनतुदक्षिणः सव्यदक्षिणाभ्यांपाणिभ्यास
व्यदक्षिणौपादौगुरोः स्पृशेदित्यर्थः श्रोत्रेसंस्पृशेदुपमन्युः समाधानार्थमध्यस्याज्ञान्वोरायुक्षम् गौतमः
गुरोःपादसंग्रहणंप्रातर्ब्रह्मानुवचनेवाद्यंतयोर्ब्रह्मवेदअनुवचनमध्यायनम् आद्यंतयोरुपक्रमो
वसानयोः आपस्तंबः उदितेत्वादित्येआचार्योपसंग्रहणम सदैवाभिवादनमुपसंग्रहाचार्यइत्ये
केगुरुरत्राचार्यः पितावाः अत्रिः दक्षिणंपाणिमुद्धृत्यप्रकाममभिवादयेत् श्रोत्रियेत्वजानिः कार्यगु
रोः पादोपसंग्रहम् अथप्रकृतमुच्यते गुरुंचैवाप्युपासीतस्वाध्यायार्थंसमाहितः अप्युपासीतस्वाध्या
यार्थंपरिचरेत् गुरुमित्यनुवर्त्तते समाहितोनन्यमनाआहूतश्चाप्यधीयानश्चैवास्मैनिवेदयेत्
गुरुणाहूतःपठेत्तल्लक्षयद्व्यंगुरवेनिवेदयेत् उपसंग्रहणानंतरम् गौतमः आज्ञातउपविशेत्
प्राङ्मुखोदक्षिणतःशिष्यउदङ्मुखोवा एतत्प्रत्यहमध्ययनारंभेकार्यम् प्रथमाध्ययनेतुपाणि
नासव्यमंगुष्ठमुपसंगृह्याधीहिनोइतिब्रूयात् तत्रचक्षुर्मनःप्राणोपस्पर्शनंदर्शनैः प्राणायामास्त्रयः
पंचदशमात्राः प्राक्कूलेक्षासनंच ओंपूर्वाव्याहृतयःसप्तसत्यांताः प्राणः शीर्षण्यानिखानिद्वेस्वद्वा
दशमात्रा तयाकालोलक्षपतेकूलमयम् हितंचास्यचरेन्नित्यंमनोवचनकर्मभिः हितमायतावनुकू

तमस्पगुरोराचरेत् सर्वदामानसवाचिककायिकव्यापारैरतिहितकारीगुरोरप्रतिलोमयन्वाचेति
चकारः शास्त्रोक्तवचनसमुच्चयार्थः तत्रमनुः शरीरंचैववाचंचबुद्धीन्द्रियमनांसिच नियम्यप्रा
ङ्मुखस्तिष्ठेदीप्समाणोगुरोर्मुखम् नित्यमुद्यतपाणिः स्यात्साधाचारः सुसंयतः आस्यतामितिचोक्तः
सन्नासीतानिमुखोगुरोः हीनान्नवस्त्रवेशः स्यात्सर्वदागुरुसन्निधौ उत्तिष्ठेत्प्रथमंचास्यचरमंचैवसं
विशेत् प्रतिश्रवणसंभाषेशय्यानोनसमाचरेत् प्रतिश्रवणमङ्गीकारः नासीनोनचभुंजानोन
तिष्ठन्नपराङ्मुखः आसीनस्यस्थितः कुर्यादभिगच्छंश्चगच्छतः प्रत्युद्गम्यत्वाव्रजतःपश्चाद्धावतु धा
वतःपराङ्मुखस्यानिमुखोदूरस्थस्येत्यवोतिकम् प्रणम्यतुशय्यानस्यनिर्दशेचैवतिष्ठतःनीचं
शय्यासनंचास्यसर्वदागुरुसंनिधौ गुरोश्चबन्धुविषयेनयथेष्टासनोनवेत् नोदाहरेदस्यनाम
परोक्षमपिकेवलम् नचैवास्यानुकुर्वीतगतिभाषितचेष्टितम् गुरोर्यत्रपरीवादोनिंदाचापिप्र
वर्त्तते कर्णौतत्रपिधातव्यौगंतव्यंवातनोन्यतः दूरस्थोनार्चयेदेनंननकुद्धोनांतिकेस्त्रियाः यान
सनस्थश्चैवेनमवरुह्यानिवादयेत् प्रसंगाद्गुरुंप्रत्यध्यापयन्नाह कृतज्ञाद्रोहिमेधाविशुचिक
ल्याणसूचकोः ३७ अध्यायाः साधुशक्तास्तस्वार्थदाधर्मतत्त्विमे कृतज्ञउपकर्तुः स्मर्त्ता अद्रोही २९
अनपराधीमेधावीधारणावान् शुचिःप्रयतः कल्याणसूचकः शुचलक्षणः कल्यानसूयकइ

तितुपाढेकल्पोनीरोगः अनसूयोस्यारहितः गुरोषुदोषाविष्करणमसूया साधुर्धार्मिकः शक्तोग्रहणा
दिसमर्थः आप्तोऽप्रत्सरकः स्वोज्ञातिः अर्थदोगुर्वर्थप्रदाता ज्ञानवित्तदइतियाढेज्ञानदः ज्ञानहेतु
ग्रंथप्रदः एतेधर्मतोधर्मानतिक्रमेणगुरोरध्याप्यानवति अर्थप्रदंप्रत्यनेनाध्यापनंसाधर्मः तस्य
वृत्तित्वेनविहितत्वात्स्तुतिसंप्रतियतिपूर्वकमध्यायनंनिषिद्धम् मनुस्त्वाचार्यपुत्रंप्राह आ
चार्यपुत्रः शुश्रूषुर्ज्ञानदोधार्मिकःशुचिःशक्तार्थदाप्तः स्वसाधुरध्याप्यादशधर्मएतइति यत्तु
नैवोक्तम् धर्मार्थौयत्रनस्यातांशुश्रूषापिनतद्विधा तत्रविद्यानदत्तव्याशुश्रूषाबीजमिवोषरेइति त
द्धर्मानुष्ठानार्थदानशुश्रूषादीनिसतिसामर्थ्येनकरोति अध्याप्यगुणांतरविरहितद्विषयम् उपनी तं
प्रत्याह दंडाजिनोपवीतानिमेखलांचैवधारयेत् २८ दंडादीनिस्वकार्यधारणीयानि तत्रदंडस्यकार्य
मालंबनंगवादिनिवारणंतन्मोवगाहनमप्सुप्रवेशनमित्यादि अजिनोपवीतमेखलानामहस्तम् अ
तस्तानिनित्यधार्याणि उपवीतब्रह्मसूत्रम् मनुः ब्राह्मणोवैल्वपालाशौक्षत्रियोवटखादिरौ पैप्पलौडुंब
रौवैश्योदंडानर्हतिधर्मतःएतेषामप्यलाभेनुसर्वेषांसर्वयाज्ञियाः मनुःऋजवस्तेनुसर्वेसुरव्रणाःसौ
म्यदर्शनाःअनुद्वेगकरानृणामत्वचोनग्निदूषिताः केशांतिकोब्राह्मणस्यदंडः कार्यःप्रमाणतः ललाट
संमितोराज्ञःस्यात्तुनासांतिकोविशः तथाकार्ष्णरौरवबास्तानिचर्माणिब्रह्मचारिणःवसीरन्नानुपूर्व्येण

Indira Gandhi National Centre for the Arts

क्षौमाविकानिच कार्ष्णमगरुरुछागानामजिनानि ब्राह्मणादयो यथाक्रमं वसीरन् आच्छाद
येपुरुत्तरीयाणि ऊर्ध्वमित्यर्थः तथाचपारस्करः ऐणेयमुत्तरियं ब्राह्मणस्यौरवं राजन्यस्य आजंगव्यं
वावैश्यस्यसर्वेषां वागव्यम् यमः सर्वेषांरोक्षाणि क्षौमाविकानिसामर्थ्यादधोवस्त्राणीतराणि गौ
तमस्तु सर्वेषांब्रह्मचारिणांषणादि निर्विकल्पितं शुल्ककार्पासवस्त्रमाह सर्वेषांकार्पासंवासोवि
कृतमिति अविकृतंशुल्कम् वसिष्ठः शुल्कमस्तंब्रो सोब्राह्मणस्य कार्पासमाजिनंक्षौमंक्षत्रियस्य
पीतंकौशेयंवैश्यस्य सर्वेषांवाक्षौतवमरक्तम् शुल्ककार्पासमेवाहतंक्षौमाद्यपि मनुः कार्पा
समुपवीतंस्याद्द्विप्रस्योर्ध्ववृतंत्रिवृत् क्षौमसूत्रमयंराज्ञो वैश्यस्याविकसूत्रकम् त्रयः ऊर्ध्वंवृत्ति
वृतकार्यंतंत्रयमधोमुखम् त्रिवृतंचोपवीतंस्यात्सर्वेषामेकाग्रंथिरिष्यते त्रिवृतंनवसूत्रमित्यु
र्थः एष्टदेशेचनाप्युपचयद्वृतंविदुरेकेदिम् तत्कार्यमुपवीतंस्यान्नाभितंवंनचोच्छ्रितम् सदो
पवीतिनानाव्यंसदाबद्धशिखेनच विशिखोनुपवीतश्चयत्करोतिनत्तत्कृत्यम् उपवीतंवटो
रेकंहेतथेतरयोः स्मृते बौधायनः कौशेसौत्रंवात्रिः त्रिवृच्छ्रोपवीतम् मनुर्मौञ्जीत्रिवृत्समा
श्लक्ष्णाकार्याविप्रस्यमेखलादात्रियस्यतुमौर्वीज्यावैश्यस्यशणतांतवी मुञ्जालाभेतुकर्त्तव्याकु ३०
शाश्मंतकबल्वजैः त्रिवृतायेथिभिर्केनत्रिभिः पंचभिरेववा यथार्षेयंग्रथयः कार्यइत्यभिप्रा

यःपैठीनसिः मौञ्जीमेखलाश्मंतकीब्राह्मणस्यबौधायनः अथैनमौञ्जीमेखलांत्रिवृतंत्रिः प्रदक्षिणं
परिव्ययति मनुः यद्यस्यविहितंचर्मतत्सूत्रंयाचमेखला योदंडोयच्चवसनंतत्तदस्यव्रतेष्वपि
व्रतानिसावित्रादीनि मेखलामजिनंदंडमुपवीतंकमंडलुम् अप्सुप्राप्यविनष्टानिगृह्यीतान्य
निमंत्रतइति ब्राह्मणेषुचरेद्भैक्षमनिंद्येष्वात्मवृत्तये ब्राह्मणेषुनिंद्येषु अननिंद्यासादिषुनैत्यप्राप्तं
चरेत् निंदितमन्ननिंद्यातासांसमूहेनैत्यं आत्मवृत्तये आत्मनएववृत्त्यर्थम् नपरस्यपुरुष्य
तिरिक्तस्य गुरुस्तुशिष्यनिवेदितंनैत्यंसमश्नीयादेव यदाह्यपस्तंभनःनैत्यंहविषांसंस्तुतंतत्राचार्ये
देवतार्थेआहवनीयार्थेचतंनोजयित्वा यदुच्छिष्टंप्राश्नातिहविरुच्छिष्टमेवतदिति मनुःउदकु
मंभसुमानसोगोश्चाकृन्मत्तिकाऊषानुआहरेद्यावदर्थानिनैत्यंचाहरहश्चरेत् वेदयेज्ञैरहीनान्
प्रशस्तान्यास्वकर्मसु ब्रह्मचर्याहरेद्भैक्षंगेहेत्पः प्रयतोन्वहम् गुरोःकुलेनभिक्षेतमज्ञातिकुलंब
धुषु यत्तु मात्तरंवास्वसारंवामातुर्वास्वसारंनीनिजामभिक्षेतभिक्षाप्रथमयाचैनंनविमानयेत्
इतितदुपनयनांगभिक्षाविषयमिति गुरोःकुलेनभिक्षेतेत्यनेनाविरुद्धम् नित्यभिक्षाविषय
त्वादस्य अलाभेत्वन्यगेहानांपूर्वपूर्ववि वर्जयेत् सर्ववापिचरेद्ग्रामंपूर्वोक्तानामसंभवे अ
त्यपूर्वमहाशालेइत्याहभगवान्वसुः अत्यःशूद्रःवाचंनियम्यप्रणतआमिषंचापिवर्जयेत्

Indira Gandhi National Centre for the Arts

चातुर्वर्ण्यं चरेद्वैदमलाभेऽकृतनंदनं अलाभेत्रैवर्णिकानामितिशेषःआदिमध्यावसानेषुनवछा
द्योपलक्षिता स्ट ब्राह्मणक्षत्रियविशांनैदत्चर्यायथाक्रमम् नैदप्रार्थनवाक्यंनैदत्चर्याशब्दे
नलक्ष्यते तदादौमध्येवसानेचस्त्रीलिंगसंबुद्ध्यंतंनवछाब्दयुक्तेब्राह्मणस्यक्षत्रियस्यवैश्यस्य
यथाक्रमंप्रयोक्तव्यम् नवतिनिंदांदेहिब्राह्मणास्यनिंदांनवतिदेहिक्षत्रियस्यनिंदांदेहिनवति
तिवैश्यस्येतिसिद्धम् प्रथमनिंदामधिकृत्यनविष्यपुराणम्मातरंवास्वसारंवामातुर्वा भगिनींनि
जान् निक्षेतनिंदाप्रथमयावैनंनविमानयेत् सुवर्णरजतरत्नंसापात्रस्यविनिक्षिपेत् स्मृत्यंतर
म् निंदार्थंकांचनंवापिपात्रंसव्येनराजतम् पित्राकृतोपनीतेज्योमधुपर्ककरस्ततः यमःहस्तदत्ता
त्तुयानिंदालवणंव्यंजनानिच नोक्त्वाशुचितांयातिदातास्वर्गंनगछति मनुःपरिगृह्येप्सितंदंडमुप
स्थायचनात्करम् प्रदक्षिणंपरीत्याग्निंचरेद्वैदंयथाविधि कृताग्निहोत्रोनुज्ञितवाग्यतोगुर्वनुज्ञयाउ
आपोशानक्रियापूर्वंसत्कृत्यान्नमकुत्सयन् कृतमग्निकार्यंयेनसः कृताग्निकार्यःवाग्यतोमौनी
आपोशानक्रियांकृत्वासत्कृत्यपूजयन् अन्नमकुत्सयन् गुर्वनुज्ञयाभुंक्ष्वेतिगुर्वनुमत्याभुंजी
त उपनयनकालेआपोशानप्रैषोक्ताक्रिया आपोशानक्रिया नैदादेकदेशोहोमोत्राग्निकार्यम्
तदारभेठीनसिःहविषोकृत्वासंतर्प्याग्निंसमिधंदत्वान्नंयदन्नमन्नमतेनदेवायदन्नमग्निवकु

धाविरूपमितिचोत्तानुमंत्रयेति स्विष्टकृतमग्निकार्यंकृत्वानुज्ञातोभुंजीतवाग्यतः तथाचायंसंभ
ोक्षितादैदाद्ग्नौकृत्वाभुंजीतअतश्चाचार्यसन्निधावेवतदग्निकार्यंसन्निहितेत्वाचार्येग्निकार्यंस्या
ने नैदमाचार्योनोजयितव्यइतितेनैवोक्तम् हविषासंस्रुतमित्यादिनाअत्रचमनुःसमाहृत्यतुंत
दैदंयावदर्थममायया निवेद्यगुरवेश्रीयादाचम्यप्राङ्मुखःशुचिःआयुष्यंप्राङ्मुखोभुंक्तेयशस्यं
दक्षिणामुखःश्रियंप्रत्यङ्मुखोभुंक्तेऋतेभुंक्तेउदङ्मुखः अस्यार्थः यत्प्राङ्मुखोभुंक्तेतदायुष्यम्
आयुषेहितम् एवंयशस्यम्यत्प्रत्यङ्मुखोभुंक्तेसश्रियमाप्नोति यदुदङ्मुखः सत्रंक्तेसत्यंज्ञा
प्नोति एवंनोक्तुःप्राङ्मुखतानित्याकाम्याच नोच्छिष्टकस्यचिद्दद्यान्नाद्याद्देनमथांतराः नंचैवात्यश्ना
नंऊर्ध्वन्नचोच्छिष्टःक्वचिद्भुंजेत् संवर्त्तकः सायंप्रातर्मनुष्याणामेशानंदेवचोदितम् नांतराभोज
नंऊर्ध्वादग्निहोत्रसमोविधिः वसिष्ठःअसौग्रासानुनैदांषोऽन्नारण्यवासिनः ह्यत्रिरात्तुगृहस्थ
स्यत्रिमित्तंव्रह्मचारिणःआपस्तंबःभुक्त्वास्वयममंत्रंप्रदाह्यत्रेत्वनवोच्छिष्टंऊर्ध्वात् अशक्तौन्मौ
निरवनेत् असुवाप्रावेशयेत् आचार्यायवापर्यवदध्यात् अंतर्धितेनवाभ्रूह्यत्रह्मवर्यस्थितेनैव
मन्नमाद्यादनापदि ३१ अनापदिव्रह्मचारीएकस्यान्नंनाश्नीयात् ब्राह्मणःकाममश्नीयाच्छ्राद्धव्रत
मपीडयन् व्रह्मचारी ब्राह्मणश्चैत्तदभ्यर्थितःसन् एकान्नमनापद्यपिभुंजीत सचेच्छ्राद्धंभुंजीत

Indira Gandhi National Centre for the Arts

तदाव्रतपीडाकरंमधुमांसादिवर्जयित्वाश्नीयात् ब्रह्मचारीनियमस्थोमा मधुमांसंजनोच्छिष्टंशुक्तस्त्री
प्राणिहिंसमनम ३२ नास्करालोकमाश्लीलपरिवादांश्चवर्जयेत् ब्रह्मचारीमद्यादिकंवर्जयेत् मधु
मांसोच्छिष्टंनोजनीयमपिश्रंजनंकज्जलेउच्छिष्टंयस्यपरस्यचगुरुव्यतिरिक्तस्य तथाचवसिष्ठः उच्छिष्ट
मगुरोरन्नोज्यंस्वमुच्छिष्टमुच्छिष्टोयहतंचेति शुक्रपरुषंवचःअन्नंवायत्कालवणादम्लंनवतिस्त्रीरा
द्वेनस्त्रीविषयेप्रेक्षणालंबनेलक्ष्येते तदाहगौतमः स्त्रीप्रेक्षणावलंबनेमैथुनरोकायामिति प्रा
णिहिंसनंप्राणिवधःनास्करालोकनंप्रसिद्धं अश्लीलंसन्नानर्हवचःपरिवादःपरिनिंदावर्जनेना
ब्रह्मविर्जनविषयः संकल्पोव्रतनियमादिशब्दवाच्योलक्ष्यते अतएवाह आहेव्रतमपीडयन्निति
मनुस्तु सेवेतेमांस्तुनियमान्ब्रह्मचारीगुरोर्वसन् संनियम्येंद्रियग्रामंतपोवृद्ध्यर्थमात्मनः
चकारः स्मृत्यंतरोयात्तानामन्येषांब्रह्मचारीधर्माणामुपसंग्रहार्थः तत्रमनुः नित्यस्नात्वाशुचिः
कुर्याद्देवर्षिपित्तर्पणम् देवतार्च्चनंचैवसमिदाधानमेवच्चवर्जयेन्मधुमांसानि गंधमाल्य
रसान्स्त्रियःअभ्यंगमंजनंचाक्ष्णोरुपानच्छत्रधारणम् कामंक्रोधंलोभंचनर्त्तनंगीतवादि
नम् द्यूतंचजनवादंचपरिवादंतथानृतम् स्त्रीणांचप्रेक्षणालंबनमुपघातंपरस्यतु एकः शयेत ३२
सर्वत्ररेतः स्कंदयतेक्वचित् कामाद्धिस्कंदयन्रेतोहिनस्तिव्रतमेवतुव्रतंब्रह्मचर्यम् यमः

जितनिद्रोजितालस्योजितक्रोधोजितात्मवान् तथाखट्वासनंचशयनंवर्जयेत्तथावनम् स्वयंदे
कःऊर्ध्वरेतोवनरेतःस्कंदयेत्क्वचित् गौतमः वर्जयेन्मधुमांसंचगंधमाल्यंदिवास्वप्नंजनोपानच्छ
त्रकामक्रोधलोभमोहवादनस्नानदंतधावनहर्षनृत्यगीतपरिवादनृतानिगुरुदर्शनेकंठप्रावृ
तावसक्तिकामदप्रसरणानि निष्ठूतहसितविजृंभितावस्फोटनानि स्त्रीप्रेक्षणालंबनमैथुन
रोकायाद्यूतहीनसेवामद्यदानंहिंसामाचार्यतत्पुत्रतदीक्षितानिच श्रुत्यावाचोमद्यनित्यब्रा
ह्मणइति स्नानभोगार्थंन्यायपरंप्रति कंठप्रावृतंकंठप्रावरणानि अवसक्तिकाजानुनोरुपरिपरि
करबंधःअवस्फोटनमंगुल्याद्यंगस्फोटनम् हीनसेवामूत्रपुरीषावमार्जनादिकांतायुरोरपिवर्जये
त् अंगानिप्रक्षालयेताशुचिस्थानियुरोरपीतिदर्शनात् शुक्रावाचःपरोद्वेगकराणिवाक्यानिमद्य
प्रसिद्धं एतानिब्रह्मचारीवर्जयेत् इतिसंबंधः मद्यंनित्यंब्राह्मणः नित्यमितिवचनात् मद्यकृत
युगादावपिब्राह्मणोनवर्ज्यम् क्षत्रियवैश्यापत्तुकल्पावेव यत्तुब्रह्मपुराणम् दीर्घकालंब्रह्मच
र्यधारणंचकमंडलोःसगोत्राद्वासपिंडाद्वाविवाहोगोवधस्तथा नराश्वमेधौमद्यंचकलौवर्ज्यंद्विजा
तिभिरितिनित्यंसर्वकालम्ब्रह्मचार्यपिब्राह्मणोमद्यंवर्जयेदित्यर्थः तथा अधःशय्यासनीपूर्वो
त्थायीजघन्यसंवेशीसर्वत्राप्रतिहतवाक्पौनःपुन्यपातकात् अधःशय्यादिगुर्वपेक्षया आपत्त

Indira Gandhi National Centre for the Arts

नः आत्मप्रशंसांपरगर्हांच वर्जयेत् इतितथाउत्सन्नस्नाद्यः अंगानिप्रक्षालयेत अप्सुचिलिंगानि
गुरोरसंदर्शनेउत्सन्नस्नाद्यः उत्सन्नश्चोन्नवेदितिशेषः यथागुरुनयत्रपतितथाप्रक्षालयीतेत्य
र्थः आपसंन्नः नप्रेक्षेतनग्नांस्त्रियम् ओषधिवनस्पतीनामाछिद्यनोज्जिघ्रेत् नस्मयेत्त यदिस्म
येतापिगृह्यस्मयेतेतिब्राह्मणम् अपिगृह्यमुखंपिधायस्मयेतेतिब्राह्मणम् हारीतः हयगजरथचेत्य
वृक्षविशेषारोहणफलचयनसंधिसर्पणकूपावरोहणमहानद्यर्णवतरणमहासाहसार्जयेत्
मनुः मुंडोवाजटिलोवास्यादथवास्याच्छिखाजटः नैनंग्रामेनिनिर्मोचेत्सूर्योनाभ्युदयेत्कचित्
चोदितोगुरुणानित्यमप्रचोदितएववा ऊर्ध्वंदध्ययनेयोगमाचार्यस्यहितेषुचेति मान्यमान
नंब्रह्मचारिधर्मवक्तुमान्पानात्लक्षणंतावदाह सगुरुर्यःक्रियाःकृत्वावेदमस्मैप्रयच्छति ३३
गर्भाधानाद्याउपनयनांताःक्रियाःसंस्कारिकोयस्करोतिसतस्यगुरुर्भवति एतावदेवगुरुल
क्षणमृतत्वप्रसंगाद्ब्राह्मणोप्रतिवेदमस्मैप्रयच्छतीतिविधंतरम् निषेकादिक्रियानुष्ठानस्यवेद
दानस्यचार्थप्रीत्यपरोद्दार्यावादकःक्वाप्रत्ययःपरमार्थतस्तुद्वैएवैते वाक्ये अन्यथाक्षत्रियादेः
स्वसुतंप्रतिगुरुत्वंनस्यात् अतएवमनुः गर्भाधानादिक्रियाकर्तृत्वंवेददाननिरपेक्षंगुरुल ३३
क्षणमाह निषेकादीनिकर्माणियःकरोतियथाविधि संभावयतिचान्नेनसविप्रोगुरुच्यते त

चाप्यनुसंभावनमौचित्यं प्राप्तमनूद्यते नगुरुरुत्तराणतथाविधीयते विप्रग्रहणंचप्रदर्शनार्थंननिय
मार्थम् तथासतिक्षत्रियादिर्नहिगुरुःस्यात् तथाविधिग्रहणेनचशूद्रादेर्निषेकमात्रकारिणोपिगुरु
त्वंदर्शयति तस्यतावन्मात्रविधानात् एवंक्षत्रियवैश्ययोरपिसुसवनादिकर्मसुकर्तेषुप्रयच्छती
तिवचनाद्ब्राह्मणाःपितैवसंभवेसत्याचार्योनवेदितिगम्यते अतएवबृहस्पतिः एवंदत्तादिनिर्मुक्तं
संस्कृत्यविधिवत्पिता वेदमध्यापयेद्यत्नाच्छास्त्रंमन्वादिकंतथेतिपितुरेवाधिकारमाहपितव्यति
रिक्तानांगुरुत्वंत्वौपचारिकमितिदर्शयितुंलक्षणनिधानम् देवलः उपाध्यायःपिताज्येष्ठोभ्रातात्वै
वमहीपतिः मातुलःश्वशुरस्त्रातामातामहपितामहौवर्णाज्येष्ठाःपितव्यश्च पुंस्येतेगुरवःस्मृताः मा
तामातामहीगुर्वीपितुर्मातुश्चसोदराःश्वश्रूःपितामहीज्येष्ठाधात्रीचगुरवःस्त्रियः इत्युक्तोगुरुवर्गोयंमा
तृतःपितृतोद्विधेतितदुपचारइतिमंतव्यम् अत्रचगुरुवृत्तेषुवर्तितव्यमितिफलम् अतएवा
नुवर्तनमाह अनुवर्तनमेतेषांमनोवाक्कायकर्मभिः इतिगुरोर्नार्यागुर्वी मातृतःपितृतइति
इतिबाहुल्यानिप्रायं महीपतिप्रवृत्तीनांतदनावात् मातुरपिपूज्यमात्रानिप्रायेणाह अल्पं
वाबहुवायस्श्रुतस्योपकरोतियःतमपीहगुरुंविद्यात्श्रुतोपक्रियया तयाइति उपनीयददेद
मिमाचार्यःसउदाहृतः यस्तुशिष्यमुपनीयवेदमध्यापयति सआचार्यउक्तःवेदशब्देनात्रविद्या

Indira Gandhi National Centre for the Arts

तरेणपिसंगच्छंते तथाचमनुः उपनीयगुरुःशिष्यंवेदमध्यापयेद्द्विजः सकल्पंसरहस्यंचतमाचा
र्यंप्रचक्षते कल्पशब्देनेहव्याकरणादीनिमीमांसन्यायविस्तरश्चप्रतिपद्यते कल्पोवेदार्थंकत्स्न
यतित्तथाचव्यासः नवेदपाठमात्रेणसंतोषंकारयेद्द्विजः पाठमात्रावसानस्तुयंकेगौरविदति पाठ
वसानोर्थानभिज्ञइत्यर्थः एकदेशमुपाध्यायः यस्तुवेदार्थैकदेशमध्याययतिसत्तस्योपाध्यायोन
वति मनुः एकदेशंतु वेदस्यवेदांगान्यपिवापुनः योध्याययतिवृत्त्यर्थमुपाध्यायः सउच्यतेइति
ऋत्विग्यज्ञकदुच्यते ३४ योयज्ञाधिकारिणास्वयज्ञसिद्ध्यर्थंपरिक्रीतः सन् यज्ञंकरुवति सत्प
स्यऋत्विगुच्यते मनुः अग्न्याधेयंपाकयज्ञानग्निष्टोमादिकान्मखान्वयः करोतिवतोयस्यसत्तस्यर्त्विगि
होच्यते सचत्रिविधः यथाहहारीतः क्षीरहोताग्राहार्यवत्तोविशेषवतइति लक्षणान्याह योयस्यान्नी
दत्तेसतस्यक्षीरहोता अस्यार्थः अग्न्याधेयसंबंधिनामत्विजामध्येयः कश्चिदग्निहोत्रऋत्विग्व
ति सक्षीरहोतेति तदाहाश्वलायनः स्वयंप्रवर्णिजुहुयात् स्वत्विजामेकइतरकालमिति तस्या
नात्रेयमन्यनित्यार्थंवणतेसग्राहार्यवतः अथयमन्यमुत्तरोत्तरेषुक्रतुषुवणुतेसविशेषव
तः ऋत्विग्लक्षणमिहप्रासंगिकम् ब्रह्मचारिणंप्रति तस्यानुपयोगात् एतेमान्यायथापूर्वम् ए
तेषुकीदयोमान्याःपूज्याः यथापूर्वंपूर्वमनतिक्रम्योत्तरोत्तरेनिवादनोपसंग्रहणादिनिर्मान्या

३४

इत्यर्थः एषोमातागरीयसी एषोगुर्वादिषोत्यर्थंगौरवमातेवार्हतीत्यर्थः गौतमस्तु मातुराचार्यस्यो
रवमाह आचार्यःश्रेष्ठोगुरूणांमातेत्येकेअत्रचगुरुशब्दोगौपचारिकःपुराणात्तु द्वौगुरूपुरुषस्पेहपि
तामाहाधर्मतः तयोरपिपित्ताश्रेयानुरुःसम्पग्विचक्षणः स्वतंत्राः सर्वएवेतेयरतंत्रेषुसर्वदा
अनुशिष्टेविसर्गेवाविप्रयेचेश्वरामताः एवंचसतिपितुर्मातुराचार्यस्यविप्रतिषिद्धार्थविषया
यामाज्ञायांपितुराज्ञागरीयसी तदनावेमातुःतदनावेआचार्यस्याचार्यस्यसुनराज्ञापित्राज्ञा
तोपिगरीयसीत्याहमनुः उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपिता ब्रह्मजन्महिविप्रस्यप्रेत्यवे
हचशाश्वतम् ब्रह्मदः आचार्यः ब्रह्मचर्यकालस्यपरिमाणमाह प्रतिवेदंब्रह्मचर्यंद्वादशाब्दानि
पंचवा २५ ग्रहणातिक्रमित्येके ब्रह्मचर्यंतत्प्रतिवेदंप्रतिशाखंद्वादशवर्षाणिपंचवावर्षाणिवेद
स्वीकरणंतावत्कर्त्तव्यम् मनुःषट्त्रिंशदाब्दिकंचर्यंत्रैविद्यकंव्रतंतदर्धिकंपादिकंवाग्रहणांति
कमेववा आर्धिकपदोषडुर्षाणिपादिकपदेत्रीवर्षाणि एकवेदब्रह्मचर्यमयमः गुरोरप्यवलिप्तस्य
कार्याकार्यमजानतःउत्पथप्रतिपन्नस्यपरित्यागोविधीयते केशांतश्चैवषोडशोषोडशेवर्षे ब्राह्म
णस्यकेशांतोनामसंस्कारः कर्त्तव्यः क्षत्रियवैश्ययोस्वमन्त्रकः केशांतःषोडशेवर्षेब्राह्मणस्यविधी
यते राजन्यबंधोर्द्वाविंशेवैश्यस्याधिकेतत्त इतिजन्मादिरेषा वर्षसंख्यागर्गादिस्मृतिद्विवक्तितास्या

Indira Gandhi National
Centre for the Arts

त्र गर्भषोडशेऽब्दत्यवदत्र यथागर्भाष्टमेऽब्दिकेवलसंख्योपादानेतुजन्मैवाधिः यथाष्टमेचाब्देऽति
आषोडशाच्चद्वाविंशाच्चतुर्विंशाच्चवत्सरात् ३६ ब्राह्मक्षत्रियविशां कालऔपनायनिकः परः जन्मनआ
षोडशाद्वर्षाद्ब्राह्मणस्योपनयनकालः अतऊर्ध्वंतत्कालोनास्तीत्यर्थः एवमाद्वाविंशाद्वर्षात्क्षत्रियस्य
चतुर्विंशाद्वैश्यस्य अनिविधौचायमाकारः यतआह्व्यासः औपनायनिकः कालः परः षोडशावार्षि
कः द्वाविंशतिपरोन्यस्यस्याच्चतुर्विंशतिः परः ब्राह्मणक्षत्रियविशां कालश्चेदत्यगादयन् सावित्री
पतिता व्रात्यानवंत्यार्यविगर्हिताः अतिक्रांतोपनयनकालानांयदुवतितदाहअतऊर्ध्वंत्रयोप्येते
यथाकालमसंस्कृताः ३७ सावित्रीपतित्रात्यव्रतस्तोमाहतत्क्रतोः द्विजातयोपनीता यथासख्यं
षोडशाद्वाविंशतिवतुर्विंशतिवर्षेभ्यऊर्ध्वंव्रात्यस्तोमाख्यंव्रतंविहायसर्वधर्मानधिकारिणोभवं
ति सावित्रीपतिताव्रात्याइतितेषांसंज्ञाव्रात्यस्तोमोनामव्रात्यानांप्रायश्चित्तक्रतुः तेनवोद्वाहक
व्रतादिनाकृतप्रायश्चित्ताउपनीताधर्माधिकारिणोभवंति संव्यवहार्याश्चान्येषाम् मनुर्यदाह्न
तैरपूतैर्विधिवदायद्यपिहिकर्हिचित् व्रात्यायोन्यांस्त्रसंबंधान्चरेद्ब्राह्मणोः सह अपूतैरितिव
चनात्कृतप्रायश्चित्तैः सहसंव्यवहारोनदोषायेतिगम्यते अत्रसर्वधर्मवरिक्तताइतिपाढेधर्मरा
होद्विजातिधर्मनिप्रायः नवर्णधर्मविषयः व्रात्यानांवर्णत्वानयायात् अत्रद्विजातिधर्मवरिक्त ३५

तत्वेहेतुमाह मातुर्यदग्रेजायंतेद्वितीयंमौंजिबंधनात् ३८ ब्राह्मणक्षत्रियविशस्तस्मादेतेद्विजाःस्म
ताः मातृतोब्राह्मणादयः प्रथमंजायंतेद्वितीयंमौंजिबंधनात् तस्मान्मन्वादिभिर्द्विजातेस्मृताः
अत्रद्वितीयमितिक्रियाविशेषणम् अतोनुपनीतत्वाद्व्रात्यानद्विजाः तस्माद्विजातिधर्मानधिकार
तेषामुक्तः यज्ञानांतपसांचैवश्रुतानांचैवकर्णमम् ३९ वेदएवद्विजातीनांनिःश्रेयसकरःपरःय
ज्ञानांयंचयज्ञानांतपसांकृच्छ्रवाद्रायणादीनां अन्येषामपिश्रुतफलानांकर्मणामध्येवेदएवपर
उत्कृष्टोनिःश्रेयसकरोयज्ञादिन्यःकर्मभ्योवेदस्यनिर्धारणमनुपपन्नमितिवेदश्रवेदनवेदाध्यय
नेउच्यते तत्रचयुक्तंयज्ञादीनांमध्येपरत्वंनिःश्रेयसकरत्वात् निःश्रेयसबोधकत्वाच्च तथः
चमनुः आहवैसनखाग्रेभ्यःपरमंतप्यतेपतः यःस्त्रग्व्यपिद्विजोधीतेस्वाध्यायंशक्तितोन्वहम् आ
नखाग्रेभ्यःपरमंतपस्तप्यतेइत्यन्वयः यथा वेदमेवजपेन्नित्यंयथाकालमतंद्रितः तत्रह्यस्या
दुःपरंधर्ममुपधर्मोन्यउच्यतेतत्रहेतुमाह मधुनाययसाचैवसदेवांस्तर्पयेद्विजः पितॄन्मधुघृता
भ्यांचत्रस्त्रोधीतेहियोन्वहन् योद्विजः प्रत्यहमधीतेसमधुपयोभ्यांदेवान्मधुघृताभ्यांपितॄंश्च
तर्पयेत् यजूंषिशक्तितोधीतेयोन्वहंसघृतामतैःप्रीणातिदेवानाज्येनपितॄंश्चमधुनाद्विजः यो
यजूंषियथाशक्तिप्रत्यहमधीतेमघृतामतैर्देवानाज्यमधुभ्यांचपितॄन्प्रीणाति सतुसोमघृतै

Indira Gandhi National Centre for the Arts

दैवांस्तर्पयेयोन्वहंपठेत् सामानितृप्तिंकुर्याच्चपितॄणांमधुसर्पिसायोन्वहंसामानिपठेत् ससोम
दैवान्मधुसर्पिर्न्यांचपितॄंस्तर्पयेत् मेदसातर्पयेद्देवान्पितॄंश्चमधुसर्पिषा संतर्पयेद्यथा
क्तियोथर्वांगिरसीःपठेत् योयथाशक्ति अथर्वांगिरसीःपठेत् समेदसापश्चादिशरीरधातुविशेषे
णदेवान् मधुसर्पिर्न्यांचपितॄंस्तर्पयति वाक्योवाक्यंपुराणंचनाराशंसीश्चगाथिकाःइतिहासांस्त
थाविद्योयोधीतेशक्तितोऽन्यहम् मांसदीरोदनमधुतर्पणंसदिवौकसाम् करोतितृप्तिंचतथा
पितॄणांमधुसर्पिषा वाक्योवाक्यंप्रश्नप्रतिप्रश्नरूपोवेदभागःपुराणंप्रसिद्धं नाराशंसास्त्रगवे
दखिलग्रंथाधीताःइदंजनाउपश्रुत्याद्यास्तिस्रश्चःगाथिकाइंद्रगाथाद्याइति हासाःपुराणाद्या
विद्यामधुविद्याद्याएतद्यःप्रत्यहंयथाशक्तिअधीते समांसदीरोदनमधुनिर्देवतर्पणंमधुसर्पि
षाचपितृतर्पणंकरोति तेतृप्तासर्पयंत्येतंसर्वैः कामफलैःश्रुतैः तेदेवाद्याउक्तप्रकारेणतृप्ताः
तर्पयितारंसर्वैः कामंमानफलैस्तर्पयंति यंयंक्रतुमधीयीततंतंक्रतुमाशुयात्फलम् क्रतुप्रति
पादकोवेदभागःक्रतुसंयोधीतेसतंतंक्रतोः फलमाप्नोति त्रिर्विंशतिपूर्णांपृथिवीदानस्यफलम
श्नुते तपसश्चपरस्पेहनित्यंस्वाध्यायवान्द्विजः धनपूर्णस्यसकलंक्रमिदानस्यत्रिरन्वंतस्य ३६
परस्यतपसःफलंतदनवरतः स्वाध्यायवान्द्विजोऽनन्ते मधुनापयसेत्यादीनांप्रत्यक्षैवश्रुति

र्मूलम् साच ब्रह्मयज्ञाध्ययनविद्यार्थंक्रतेतिब्रह्मयज्ञविधिरत्रकल्प्य तेनविनार्थवादनर्थक्या
त् सवब्रह्मचारिणेपीतितत्प्रतिकरणेवाक्यारंभः अपांसमीपेनियतोनैत्यकंविधिमास्थितः सावि
त्रीमप्यधीयीतगत्वारण्यंसमाहितइति ततश्चासमर्थः सावित्र्यब्रह्मयज्ञंकुर्यात् समस्तव्यस्तादि
निर्द्विविधःखलुब्रह्मचारी उपकुर्वाणकैष्ठिकश्च तत्रोपकुर्वाणस्यधर्मा उक्ताः नैष्ठिकस्येदानीमा
ह नैष्ठिकब्रह्मचारीचवसेदाचार्यसन्निधौतदभावेस्यतनयेपत्न्यांवैश्वानरेपिवा उपकुर्वाणब्र
ह्मचर्याश्रमंयमिच्छेत्तमावसेत् तत्रयदिब्रह्मचर्याश्रममिच्छेत्तदानैष्ठिकब्रह्मचारीनवेत् निष्ठा
शरीरपातंतंतदधिकब्रह्मचर्यसंकल्पः कृतोयेनसनैष्ठिकब्रह्मचारी सपुनराचार्यस्यसन्निधौ
वसेत् नसमावर्त्तेत आद्यार्यानावेत्तत्पुत्रस्यतदभावेआचार्यपत्न्याऽतदभावेऽग्नेः तत्रवस
तोयत्फलंतदा २८ अनेनविधिनादेहंसाधयित्वाजितेंद्रियः ब्रह्मलोकमवाप्नोतिनवेहजाय
तेपुनः अनेनपूर्वोक्तेनब्रह्मचर्यचरणेनदेहंदेहवंतमात्मानंसाधयन् ब्रह्मलोकप्राप्तियोग्यंकु
र्वन्जितेंद्रियोवाक्षीणचतुर्मुखलोकमाप्नोति नेहसंसारे पुनराजायते अपुनरावृत्तिलक्षणं
फलंब्रह्मोपासकस्यसंतोभवति नकेवलकर्मणः तदुक्तम् आप्रमात्प्रकृत्याछंदोगेसर्व एतेपु
ण्यलोकेभवंति ब्रह्मसंस्थोमृतत्वमेतीति अस्यार्थः सर्व एतेब्रह्मसंस्थाश्चत्वारोप्याश्रमिणःपुण्ये

Indira Gandhi National Centre for the Arts

लोकान्नवतिएषामध्येयोब्रह्मसंस्थोब्रह्मनिष्ठःसोमत्तत्वसारीतःद्विविधोब्रह्मचारीउपऊर्वाणोनैष्टि
कश्रुतयोस्पऊर्वाणोव्याख्यातःनिष्ठांचेऊछेत्रशरीरपातनात् गुणवासीततदनावेगुरुपन्यांतदना
वेगुरुपुत्रंगुरुपुत्रानावेग्निमेवोपचरेत् याज्ञियःसमिधआहृत्यसंमार्जनोयनोद्वोधनस्मृ[illegible]स्स
मिद्धनयर्थेग्निकरणपरिक्रमोयस्थानहोमाः तत्रनमस्कारादिनिरग्निंपरिवरेत् अग्निमधितिष्ठेत्तन
पद्भ्यांकर्षेत् नमुखेनोपधमेत् नापश्चाग्निंयुगयच्छारयेत् नाजीर्णंचुक्तऽछिष्टोवान्यादश्नन्नो
न्यादधेद्वातिक्रमेन्ननिष्ठीनवेत् विविधचरुरुविर्दानविशेषाग्नेयैरहरहरग्निमिधेतग्निमिं
धेनामंत्रगच्छेदाहृत्यनिवेदयेत् तन्मनःशरीरोयरमांतेब्रह्मणःसायुज्यंगच्छति वसिष्ठःब्र
ह्मचर्याश्रमंपरिचरेत् संयतवाङ्चतुर्थषष्ठाष्टमकालनोजीनैन्दीगुर्वधीनोजटिलःशिखाज
टोवातथात्रिरह्नोनुपेयादपः देवतः सकृद्भोजनंसकृदप्स्ववगाहनं उनयकालमग्नि हो
त्रंसंध्योपासनमलुप्तचर्मकेशनखत्वंगांधमाल्यस्नेहाभ्यंजनजनवेशालंकारछत्रोपान
द्वाहनलेह्यनधावनविविक्तिसाज्योतिषलक्षणवास्तुविद्यामंगल्यपौष्टिकशांतिकर्मगांधर्व
संगसमयवेधनविवाहोत्सेकपरिदेवनरोदनवस्तिनस्यपादोद्वर्तनवर्जम् गुरोःपूर्वोत्था
नंजघन्यसंवेशनंप्रणामसंदिष्टकरणमिष्टश्रुश्रूषानित्योपासनमघवितिसदनावेतत्पुत्रे

दारेषुवातद्वत्तिरामरणात् यद्यापदिद्वत्रियादिर्गुरुर्न्नवति तदातत्रनात्यंतिकवासः तथान्नलुप्तो
ल्पध्यायनमऊर्वाणोयदाहमनुः नब्रह्मणोगुरौशिष्योवासमात्यंतिकंवसेत् ब्राह्मणेचाननूचाने
कांह्यगतिमनुत्तमांत् नब्रह्मचर्यस्मृतेरग्निहोत्रादिगृहस्थधर्मविधायकश्रुतिविरोधोवाच्यः नि
त्यविषयत्वात् योहिस्त्रीरागवशात्कृतविवाहःतद्विषयाग्निहोत्रादिश्रुतिः ब्रह्मचर्यस्मृतिस्तुवैरा
ग्यादंधत्वादिदोषाद्धाविवाहानधिकृतपुरुषविषया अतएवपाक्षिकत्वेननैष्ठिकत्वमाहमनुः
यदित्वात्यंतिकंवासंरोचयेतगुरोःकुले युक्तःपरिचरेदेनमाशरीरविमोक्षणात् इतितथाचवि
ष्णुः ऊर्ध्ववामनजातंधस्त्रीवंगवार्त्तारोगिणाम् व्रतचर्यान्निवृत्तेषांयावज्जीवमनंशनं इतिन
वविवाराधिकारिणामेवजपतपपरायणानामप्यवसानमुचितमित्याहुदक्षः अनाश्रमेनैवति
ष्ठेदह्येकमपिद्विजः आश्रमेणविनातिष्ठन्प्रायश्चित्तीयतेहिसः जप्येहोमेतथादानेस्वाध्यायेच्च
रतःसदा नासौफलमवाप्नोतिऊर्वाणोप्याश्रमाच्च्युतः आश्रमादाश्रमांतरगमनेनोत्तरंपरिग्र
ह्यपूर्वंपरागस्त्रीयादितिसएवाह त्रयाणामानुलोम्यंस्यात्प्रातिलोम्यंनविद्यते प्रातिलोम्येन
योयातिनत्तस्मात्यावदुक्तमइति इतिश्रीविद्याधरविप्रन्वयश्रीशिलाहारनरेंद्रजीमूतवाह
नान्वयप्रसूतश्रीमदपरादित्यदेवविरचितेयाज्ञवल्क्यीयधर्मशास्त्रनिबंधेब्रह्मचारिप्रकरणंसमाप्तम्

Indira Gandhi National Centre for the Arts

ओंस्वस्ति श्रीगणेशायनमः ओंसर्वसाधारणत्वेनब्रह्मचारिप्रकरणमुक्तमधुनावसरप्राप्तागृहस्थ
धर्माउच्यंते तेच अपत्नीकेनरोन्नूपकर्मयोग्यो नजायते ब्राह्मणः क्षत्रियोवापिवैश्यः शूद्रो
पिवानपः पत्नीधर्मार्थकामानांकारणंप्रवरंस्मृतं इत्यादिदर्शनाद्भार्यया विनाननवति
साचस्नानोत्तरकालनाविनीत्याह गुरवेतुवरदत्त्वास्नायाद्वादनुज्ञया वेदंव्रतानिवापारंनी
त्वासुन्नयमेववा पूर्वोक्तन्यायेनवेदंव्रतानि उन्नयंवापारंनीत्वासमाप्यस्नायात् एतेषांचपक्षा
णांशक्तिकालाद्यपेक्षयाव्यवस्थायदिनिस्नाटनाद्यशक्तोव्याधितयाराजदैविकाद्यनिन्नवासम
र्थः तदावेदंकेवलंव्रतान्येवकेवलानिसमाप्यस्नायात् अतएवविद्यास्नातकोविद्याव्रतस्ना
तकइतित्रैविद्यस्मर्यते अतस्तस्यस्नानपरिणामोत्तरकालमध्ययनसमापनंतदर्थज्ञानंवा
अतोवक्ष्यति कर्मस्मार्त्तंविवाहाग्नौकुर्वीतप्रत्यहंगृहीतिप्रक्रम्य वेदार्थानधिगच्छेत्तुशा
स्त्राणिविविधानिचेति वेदार्थज्ञानमावश्यकार्यम् तथाचव्यासः नवेदपाठमात्रेणसंतो
षंकारयेद्द्विजः पाठमात्रावसानोहिपंकेगौरिवसीदति यथापशुर्नरवाहीनतस्यतत्फलंनतेन
तेद्विजस्तथार्थानभिज्ञोनवेदफलमश्नुते वेदस्याध्ययनंसर्वं धर्मशास्त्रस्यचापियत्र अ
जानतोयक्तत्सर्वंतुषाणांखंडनंयथा योधीत्यविधिवद्वेदंवेदार्थंनविचारयेत् ससान्व

यःशूद्रसमःयात्रतांननंपद्यते अधीत्ययत्किंचिदपिवेदार्थाधिगमेस्तः स्वर्गलोकमवाप्नोतिधर्मा
नुष्ठानविद्विसःश्रुतहीनमधीते यत्तेनामुत्रतद्भवेत् श्रुतंतुकेवलमपिसमुद्धारायकल्पते
समुच्चितंस्थूलमपिश्रुताधीतंविशिष्यते त्रयाणामपिवर्णानांकेवलाध्ययनाद्द्विजात्र ज्ञानंक
र्मचसंयुक्तंसमुक्त्यर्थकल्पितंतथा अधीतश्रुतसंयुक्तंतथाश्रेष्ठंनकेवलम् पाठमात्रार्दिता
न्नित्यंद्विजातीश्चार्थवर्जितान् पशूनिवचक्तान्प्राज्ञोवाङ्मात्रेणापिनार्चयेत् ऋङ्मंत्रमप्यधी
त्यादोन्यायतस्तुतदर्थवित् विशिष्यतेश्रुतंयस्माद्धरीयोधर्मसाधनम् श्रुतिश्च स्थाणुरयंन्
रहरिःकिलाचूदधीत्यवेदंनविजानातियोर्थम् योर्थज्ञस्तत्सकलंभद्रमश्नुतेनाकमेतिज्ञानविध्
तपाप्माश्लोकंवदंस्थाणुमाहुः सर्वेधारोपितंतत्रणादिनारांक्रोतोनवति नच नारन्नतिनारंनोगंवा
चेत यमानोत्तनतेकेवलंनाराधारनावाजंतुरेवनारंनाम्नवति तथायंनवति योवेदाध्ययनेधा
रणावसानेनकदर्थितात्मापितदनिधेयंकर्मावबोधादिप्रधानप्रयोजनानुरंजनविध्यर्थवाद
मंत्रनामधेयादिविभागेननजानातितज्ञानेप्यधाप्ययतमानः यइदानीनिष्पन्नार्थावबोधः सो
धिकृतत्वात्कर्मपरिपूर्णोत्प्रमादेषु प्रायश्चित्तजागरणाच्चस्वकर्मनैपुणेपाञ्चसाकल्पेनपुण्यफलं
ऊर्ध्वालंदृष्टमश्नुते नाकंचसत्पलोकांत मदृष्टपुण्याप्राज्ञोर्थज्ञानजनितानुषंगिकधर्मोत्रोना

Indira Gandhi National Centre for the Arts

इतितद्दृष्टादृष्टगतपरिपंथिनाशनादिदूषकोयात्तदुरितइति तथा उत्तत्व पत्रान्तद्दर्शनाच्च
मुत्तत्वं श्रएवन्नश्रणोत्येनाम् उत्तोत्वस्मैतन्वंविसस्रेजाये वापत्याउशतीसुवासाः अपिखल्वे
कः पत्रपन्नपिनपश्यति अपिचखल्वेकः श्रएवन्नपिनश्रणोतिएनामविद्वान्मन्त्रार्थवाचम् उत्तो
त्वस्मैतन्वंविसस्रेतनुंविवएउते जायेवपत्याउशतीसुवासाःतद्यथाजायापत्येकाममानासु
वासाः स्वमात्मानंविवएाते एवंवाग्विदेस्वमात्मानंविवएुतेमनुश्र यदधीतमविज्ञातनिगा
देनैवशब्द्यते अनग्नाविवशुष्केधोनतज्वलतिकर्हीवतइत्यादि अपिचस्मार्त्तस्पष्टमादिप
रिज्ञानमात्रायेद्धितत्वान्नचतत्परिज्ञानमन्यशास्त्रश्रवणाद्विनाभवति तस्यकर्मक्रमाद्यव
बोधमात्रायेद्धितत्वात् यदिशास्त्रांतरश्रवणाद्विनासर्वत्र नाधिक्रियते तदाग्निकार्यादावप्य
नधिकारोब्रह्मचारिणःस्यात् तेनयद्यत्करोतितत्तद्ब्रह्मत्वानयुगयज्ञात्वेतितस्माज्ज्ञात्वाचानुष्ठा
नमित्ययमपिविधिःपरिगृहीतोभवति कथंस्तायादित्याहगुरुपूर्वोक्तमन्त्रिलषितंकात्यायनाद्यु
क्तंगौर्ब्राह्मणास्यवरः ग्रामोराजन्यस्य अश्वोवैश्यस्येत्यादिगुर्वर्थाहरणशक्त्यादिविषयंतदन्यादि
विषयधान्यंवासांसिज्ञातंचगुरवेप्रीतिमाहरेत्र इत्यादिमत्वालब्धितंवादत्त्वातदनुज्ञयावाद
त्तवरोपि अतएवगौतमः विद्यांतेगुरुरर्थेननिमंत्र्यःकृत्वानुज्ञातस्यवास्नानमितिवेदपारन ३९

यनं समुच्चयएववेदाध्ययनस्यतदर्थज्ञानेनसह अतएववेदमधीत्यकुंदोविषयानर्थान्नबुद्धा
स्यादितिस्मर्यते मनुरपि त्तसोविशेषैर्विविधैर्व्रतैश्चविधिचोदितैः वेदः कृत्स्नोधिगंतव्यः सर
हस्योद्विजन्मनेति अधिगंतव्योग्रथतोर्थतश्चेतिदर्शयति व्रतेश्चपूर्वोक्तैर्यज्ञैर्मधुमांसगंधमाल्या
नीत्यादिप्रतिषेधादितैः ततश्चयदुक्तंनहेन तस्माद्गुरुकुलेतिषृन्मधुमांसादिवर्जयेत् जिज्ञासेता
विरुद्धात्वाद्धर्ममित्यवगम्यतेइतितदनोनविरुध्यते तेषांसमावर्त्तनाधिकृतत्वात् अतएव अ
ग्नींधनंभैक्षचर्यामधःशय्यांगुरोर्हितम् आसमावर्त्तनात् ऊर्ध्वंत्रिकंतोपनयनोद्विजः इतिनिय
म्यते नच गुरुगेहादनावृतस्नातकोहिनकथ्यते इतिस्नानसमावर्त्तनंनातिः कार्या गुरुणानु
मतः स्नात्वासमावृत्तोयथाविधिउद्वहेतद्विजोन्यांसवर्णांलक्षणान्विताम् इतिनेदंस्मरणा
त् स्नातकश्चमन्वादिभिःप्रदर्शितःतंप्रतीत्तस्वधर्मेणब्रह्मदायहरंपितुः ब्रह्मदायहरं ब्रह्म
वेदः अनेनतस्याध्ययनयोगःख्याप्यते दायोरिक्थम् अनेनतस्ययोगत्वमुच्यते अन्यथा
सवर्णापुत्रोप्यन्यायवत्तोनलभेते केषामितितदनावःपितुर्द्रव्यानावेप्रतिग्रहादिनाप्यवाप्यपा
णिग्रहणंकर्त्तव्यंपाणिग्रहणादिग्रंथपरिचरेदित्यन्यथायाज्ञानदेरसिद्धिः तस्मद्द्रव्यमलब्धा
त्र अतएवगौतमः द्रव्यादानेविवाहसिद्ध्यर्थमिति स्त्रीग्रहणेविघ्नक्षणप्राप्तयर्थं तत्पेक्षायनं

Indira Gandhi National Centre for the Arts

तत्रस्थमर्चयेन्मूर्जयेत् प्रथमंगवा गोत्रादेनमधुपर्कलक्षयति ऋत्विजोवरणमधुपर्कमा हरेत् स्नातकोपस्थायराज्ञेचेति स्मरणात् सच्चगोवेदयतेऊक्तेतिकारयिष्यन् उत्सृजतइति उत्सृजेत्रि तिद्विधानवति स्नानकश्चनवधानिद्यते संकल्पनेदात् सांतानिकंवक्ष्यमाणमधुपर्कसार्ववेदस म् युर्वर्थपितमात्रर्थस्वाध्यायार्थुपतापिनः नैवतान्स्नातकान्विद्याद्ब्राह्मणान्धर्मनैचुकानिति ततः किमित्याह् अधिलुतब्रह्मचर्यलक्षणांस्त्रियमुद्वहेत् अनन्यपूर्विकांकांतामसपिंडायवीयसी म् नैवविलुतंब्रह्मचर्ययस्यविलुतिःस्खलनं तस्मिन्नवेतुप्रायश्चित्तीनत्वविवाहः कित्वयंवि शेषः यदिस्नानादधोविलुतः तदावकीर्णीप्रायश्चित्तम् अवकीर्णीनवेऊत्वा ब्रह्मचारीव्रतेषि तम् इतिस्मरणात्स्नानाद्ध्वंयदिपुनस्तदासामान्यंमधुपासत्यवक्तव्याचप्रतिकृत्वाचयानवे त् व्याधितव्याचाधिवेतव्या तथा चार्षयेपूर्वमारिणेपेदत्वाग्रीनंत्यकर्मणिपुनर्दारक्रियांकुर्या दित्यादिस्मरणदर्शनात् अप्राप्तस्यपुनर्विवाहस्यविलुतब्रह्मचर्यायत्तेरप्राप्तिः मातृकांदीदि त्यत्राविलुतब्रह्मचर्यइतिपदंपूर्वस्नानकर्तृविशेषणीयम् लक्षणेयुक्तांलक्षणनिबालांत्य त्तराणि बालानिकायस्वरादिगदितानि यथाहमनुः अव्यंगांगींसौम्यनाम्नीमनोज्ञांवरयेत्स्त्रियं कपिलांकन्यांनाधिकांगीनरोगिणीम् तनुलोमकेशदशनांमृदंगीचारुनाभिणीम् इतिदशंदशनामित्यर्थः इत्यलक्षणेमि ४०

त्येत स्मादेवविपरीतवर्ज्या यथा नोद्वहेत्कपिलांकन्यांनाधिकांगीनरोगिणीम्नालोमिकांनातिलो मीनचाचाटंनपिंगलाम् इति तथानामतोपिवर्ज्या यथा नर्क्षवृक्षनदीनाम्नीनोत्यपर्वतनामि काम् नपक्ष्यहिप्रेष्यनाम्नीनवृक्षीवृक्षनामिकाम् यथावा देवनाम्नीनदीनाम्नीम्लेच्छगोधर्वनामि काम् ऋक्षवृक्षनदीनाम्नीदारार्थीपरिवर्जयेत् इति यदापुनरात्यंतराणिसूक्ष्माणिभवंति त दाश्वत्थायनोक्तापरीक्षाकार्या तत्रबुद्धिरूपलक्षणसंयुक्तामितुल्कास्वयमेव चोद्यंकृतम् लक्ष णानिदुर्ज्ञानानीतितत्पोत्तरम् ऋषीपिंड्रान्कृत्वाऋतमग्रेप्रथमंजज्ञेऋतेसत्यंप्रतिष्ठितम् य दिवऊमार्यनिजात्तातदियमेहप्रतियद्यताम् यस्तत्यंतद्रूपतामितिपिंडानत्तिमंत्रमऊमारीव्र यात् एषामेकंगृहाणेति दोत्राच्चेदुनयतःसस्पाऊह्लीयादनवत्यस्याः प्रजानविष्यतीतिविद्यात्रगो रात्यश्रुमती वेदिरुरीषाऊह्लवर्चसिनी अविनाशिनोऊदात्तसंप्रन्नाः देवनाकितवी चतुष्पथा दप्रव्राजिनी इरिणादधन्या श्मशानात्यतिघ्नीति अनन्यपूर्विकांनेवान्यस्मैयापूर्वंदत्ताएतच्चवा ग्दत्ताविषयम् नसंस्कृताविषयम् तस्याःपुनर्नृत्वात् यथाहमनुः यस्यामृियेतकन्यायावाचा सत्येकृतेपतिः तामनेनविधानेनहिजोविंदेतदेवरइति नचतत्रदानमित्याशंकनीयम् अद्भि र्वाचाचदत्तायांम्रियेतादोवरेयदि नचमंत्रोपनीतास्यात्ऊमारीपितुरेवसेतिवसिष्ठस्मरणात्

Indira Gandhi National Centre for the Arts

एवंबलादपहृतायामपिवेदितव्यंबलादपहृताकन्यामंत्रैरपिनसंस्कृताअन्यस्मैविधिवद्देयायथा
कन्यातथैवसा इतितेनैवोक्तत्वात् एतच्चप्रायश्चित्तोत्तरकालंवेदितव्यम् कांतांस्नातकस्यकथमनो
यत्वान्मनोनयनानंददाधिनीम् एतच्चमंगलादिनिराकरणेनविधीयते यत्रमनः सक्तितामु
द्वहेदितिविधानात् असपिंडानोसापिंड्येवदपति यद्वीयसीजन्मतः प्रणतोयीत्येके वसिष्ठः गु
रुस्थोविनीतक्रोधहर्षोगुरुणानुज्ञातस्नात्वासमानार्षीयीमस्यष्मैथुनामवरवयससहजोनार्य
विंदेतगृहस्थइतिनाविनीतवदुपचारस्सधर्मप्राप्त्यर्थः तेनाकृतदारोपिगार्हस्थसंकल्पवान
श्रमांतरान्निवर्त्तोगृहस्थधर्मेष्वधिक्रियतेनचब्रह्मचारीन्त्यागृहीत्वेतर गृहीत्वावनीत्वेतर
वनीत्वाप्रव्रजेदितिनियम्यते अनियमेनाश्रमांतरस्वीकारदर्शनात् तथाचनसिंहपुराणम्
युरवेदद्विणादत्त्वासायमिच्छेत्तमोवसेत् विरक्तः प्रव्रजेद्विद्वानिति विस्मृपुराणेच गृहीतविद्योगु
रवेदत्वाथगुरुदक्षिणाम् गार्हस्थ्यमिच्छन् नृपालऊर्यद्वारपरिग्रहम् ब्रह्मचर्येणवाकालंऊर्यी
तंसंकल्पपूर्वकम् गुरोः स्नुश्रूषणंऊर्यात्तत्पुत्रादेरथापिवा वैश्वानसोवापिनवेत्परिव्राड्यथवेच्छ
येतिविशेषांतराणिपाह अरोगिणीं भ्रातृमतीमसमानर्षगोत्रजाम् पंचमात्सप्तमाद्धूर्ध्वमातृतः ८१
पितृतः सप्तेतिअरोगिणीमदीर्घरोगोपशमेषाम् भ्रातृमतीपुत्रीकात्वनयात् यथाहमनुःयस्या

सुनभवेद्भ्रातानविज्ञायेतवापिता नोपयच्छेत्तांप्राज्ञः पुत्रिकाधर्मशंकयेत्यनेनयुक्तापुत्रिकात्न
दति नकेवलंपरिणाष्यदीयतेअस्यांयोजायतेपुत्रः समेपुत्रोभविष्यतीति इतिपुत्रफलाभार्याहि
पुत्रोत्पत्तिभवति तदेकांगवैकल्यम् पुत्रिकांचाहपति असमानर्षगोत्रजामिति असमानगोत्रजा
मितिवेदितव्यम् तत्तश्चसगोत्रायाः सगोत्रत्वेनैवनिषेधः नसमानागोत्रायेत्यया एवंसमानार्षी
पिसगोत्रमपेक्षते श्रुतएवगौतमः असमानप्रवरैर्विवाहइतिसगोत्रत्वंच समुच्चयेनभवति न
त्तद्दोषम्यम् यत्रापिसंख्यासाम्ये समानतानामतः संख्याकस्यहीनोवान्यत्वंतत्रापिसमानत्वैव
यत्रपुनःपुरोगिरसाम्बरीषयौवनाश्वेति मंधातांबरीषयौवनाश्वेतिऋषयोभवति तत्रापिचर्ज्ञा
समत्वस्यपाद्धिक्यत्वात् नचासमानर्षग्रहणंगोत्रविशेषणम् असमानप्रवरैर्विवाहइतिनेदमृणा
त्रयपरिशोधसगोत्रांतुसमानप्रवरोतथा त्यागकत्वाद्विजस्सस्यात्ततश्चाद्रायणंचरेत् इतिव्यर्थप्रायश्चि
त्तश्चत्यागश्चोपचोगस्य नतुतस्याः यदाहस्तुमच्चः मातुलस्वसांपैतृष्वसीयींसमानर्षगोत्रांचपरिणीय
चांद्रायणंचरेत्पराक्यजेनाविन्दयादिति एतच्चमतिपूर्ववेदितव्यम् सगोत्रांचेदमत्वेयय्छेद्भ्रात्र
वदेनाविन्दयात् प्रजातांचेत्कुछ्रंव्यपादंचरेदिति बौधायनः मतिपूर्वंतुयुक्तरंयथाहगौतमः मा
तृपितृयोनिसंबन्धायतेननासिकनिंदितकर्मान्यासयतित्वात्त्यागिनइति मनुरपि ज्ञातित्वेनान्युपेया

Indira Gandhi National Centre for the Arts

सा: पततिषुयन्नध: इति ततश्चयतिनोत्पन्न: पतितोन्नवति इतिलभ्यतएव ननुसगोत्रनिराकरणेनै
वसपिंडनिषेधेप्राप्तेकिमितिनेदंनासनेश्लोके असपिंडोयवीयसीमित्युक्तम् नैतत् ततसंततिजाया
निराकरणार्थम् इतरथा समानर्षगोत्रजातत्स्त्रीसंततिजायरिणीयान्नावोढ तथाचासपिंडतामा
त्रपक्षेवेदितव्या: यथाहमनु: असपिंडाचयामातुरसपिंडाचवापितु: साप्रशस्ताद्विजातीनांदारकर्म
णिमैथुनेनैवसपिंडामातुर्यावद्वारापितुश्च असगोत्राचेत्युच्यमाने यत्पित्तुर्यहणंकरोतितच्चैत्रिकपु
त्रनिप्रायेणअन्यथा यस्यतेबीजतोजातास्तस्यतेवेतरस्यतुइति तत्सगोत्रायाविवाह्यत्वंस्यात् सा
प्रशस्ताकदारकर्मणियद्वारैर्विनाननवति तच्चवचनादेवमानूदित्याहमैथुनेपिमिथुननिवर्त्त
यदेकैकस्यनिर्वर्त्त्यंनन्नवतिपाकयज्ञादिकम् अत्तएवाहायस्तन्न: पाणिग्रहणाद्विसहत्वंकर्म णि
ति सहग्रहणंनवत्तीवर्दवर्त्तमानाधिकारइतिदर्शनार्थं ततश्चकर्त्तासौकर्त्तव्या अहंदानादि
कमपिनिर्वर्त्तयामित्वमपिसंकल्पकुर्वीतित्तयापित्तथैवकार्यं मन्यथादोषइतिसहाधिकार:
अतश्चैकफलनोक्तत्वंफलांतरोद्भूतिवाधश्च असपिंडाचयामातुरितिमातुलादियरिणायनिषेध:
मातु: सपिंडत्वात् पंचमात्सप्तमादूर्ध्वंमातृत:पितृतस्त्वेति मातृकुलान्मातामहप्रभृतीन्पंच
पुरुषानतीत्योद्वाह:कार्य: कर्त्तव्यइत्यर्थ: एवंसप्तपितृकुलात् अत्रनार्यानविदतेति अधिका

यकत्वेसत्यपिपरिणायननिराकरणं द्योत्यते कथंचित्प्रार्थ्यते आघाहीद्रास्मदीयंयज्ञमन्यैरपिनम
त्तिनिरीलितेनि:स्तोत्राहैं: सस्त्रागत्यच वाजसातौसोमरूपान्नोजनप्रसावेजुषस्वसोममितिसंब
ध्यतेएवंप्रार्थ्यद्रक्तुत्पर्थंस्वउपानुवादंकरोतियेतेसोमपत्तयोनवत्यासहायात्तातेसुकृत्सोमपाने
नत्तप्ता: संत: सोमंजुहुत्यजुवंत: किमित्वयापैत्तघसेयींनगिनींनार्यात्वेनात्यंतानिलाषणी
यांत्यजंति स्वकीयमातुल्यस्यसंबद्धायोग्यतयातयातद्वदुद्देशेनसोमंत्यक्तवंतोनिराकु
र्वत्तयात्तवपुनरयंसोमभाग: अयामिवोद्वा: सात्तत्वेनाकर्मसमाप्तिरिति तत्तश्चानेनप्रतिषेधो
दर्शित्त: यदपिश्रुतौत्ततीयंपुरुषंगछामहेइत्तितदपिसुग्व्यूहनपरत्वेनान्यार्थत्वात् अपिच
प्रजापति:स्वांदुहितरमभिध्यायतत्तस्याततोवाकिरदित्यादिश्रवणादप्रिप्रसक्तिकरोति प्रायश्चित्त
दुर्दर्शनाच्चनात्तत्सप्तमेयोन्नगिनीसत्तमेयीमातुरेवच मातुश्चभ्रातुरप्तांचगत्वाचांद्रायणंचरेत्
इति नग्निनीग्रहणंसंदेहनिरासार्थमूनवापरिणीतविषयत्वमाशंक्यनीयम् येनानेतरंवक्ति
एतासित्रतुनार्योर्थेनोपयछेदबुद्धिमान् ज्ञातित्वेनानुमेयासा:यतत्तिघुपयन्नध इति तथा
कन्यादातुरपिनियमोक्ति यथाहापस्तंब: सगोत्रेभ्योदुहित्तरंनप्रयछेत् मातृतश्चयोनिसंबंधे
भ्य:पितृतश्चसप्तमादितिप्रायश्चित्तस्मरणाच्च मातुलस्यसुतामूढामात्तगोत्रांतथैवच समानप्र

Indira Gandhi National
Centre for the Arts

वरांचैवद्विजश्रेष्ठ द्रायणेचरेदिति मातृगोत्रग्रहणंपितृसमोत्रवन्निराकरणार्थंजन्यजनकसंबंधस्य
नयत्रापिविशिष्टत्वात् ज्ञातातपोपि एकगोत्राविवाहेवसमानप्रवरांस्त्यजेत् मातुल्यस्यसुतांचैव
नुल्कांचोद्रायणंचरेत् यदाचेत्थंतदानऊतश्चिद्भांतिवुद्धिव्याख्यानात्प्रवर्तेवासंदेहः कार्यः ज्ञा
ल्पविविक्तत्वात् तदापूरुषविख्यातश्रोत्रियाणांमहाऊलात्र स्त्रीतादपिनसंचारिरोगदो
षसमन्वितात्र दशपुरुषामातृतःपंचपितृतश्चाख्यातायस्मिन्नऊलेतस्मादपिकन्यांग्राह्येतिनि
यम्यते यदाहाश्वलायनःऊनत्र्यग्रेयरीक्षेतमातृतःपितृतश्चेति इदमपरंविशेषणंश्रोत्रिया
णांमहाऊलात्र श्रोत्रियःछंदोधीतइत्यध्ययनश्रुतेनश्रोत्रियोनवतीतिश्रुत्तलक्षणायति महा
ऊलात्पुत्रपौत्रपशुदासीग्रामानिसंवर्द्धादित्येवंसर्वप्राप्तौसत्यामपवादमाह स्त्रीतादपिनग्रा
ह्यासंचारिरोगान्वितात्संचारिणःश्मश्रुरोणितानुयाताः ऊष्णार्शः प्रभृतयः दोषैश्चनिष्पुरुषत्वा
दिभिरन्वितात् अतएवाहमनुः महांत्यपिसमृद्धानिगोजाविधनधान्यतः स्त्रीसंबंधेदशैतानि
ऊलानिपरिवर्जयेत्तइति हीनक्रियंनिष्पुरुषंनिश्छंदोलोमशार्शसमृत्तयामयाव्यपस्मारिश्वि
त्रिकुष्ठिऊलानिचेति हीनक्रियंयथाविधितगर्भाधानादिक्रियारहितम् निष्पुरुषंकन्याजन्मा
दिबहुलम् निश्छंदोवेदाध्ययनरहितम् लोमशंबहुलोमयुक्तम् अर्शसमर्शोव्याधि

युक्तम् हारीतोपिश्वित्रिकुष्ठीउदरियन्मायावल्यासुरनार्शसंश्मश्रुलसमानार्षेयंचेत्योतान्यपिपति
तानिऊलानिनवर्जनीयानिभवंति ऊनमनुरूपःप्रजाःसंभवंतीत्यादितःषट्त्रयक्षियत्वादनार्षेय
म् अदैवत्वादश्मश्रुलराकऊलत्वात्समानार्षेयमिति तस्मात्सपितृतःपरीरूपंपंचमातृतोनग्रिकां
श्रेष्ठंश्मश्रुवतीनार्योविदेततस्मात्ऊलनश्मश्रुविज्ञानोपयत्नांवरयेत् ग्रामयावी अत्रोक्तेतरस्या
रिणोक्त् अत्रचन्वित्रादीनिषड्वर्जनीयानि अत्रहेतुः ऊलानुरूपाः प्रभवंतीति अनार्षेयमसम
र्यमाणगोत्रप्रवरंतस्यचवर्जत्वमयक्षियत्वात्तत्रयक्षियत्वंयज्ञेष्वसमर्यमाणंप्रवरस्यानधिकारात्
अश्मश्रुअविद्यमानवेदाध्ययनम् तद्वर्जनंहेतुअदैवत्यादितिदैवकर्मशून्यत्वात् नग्रिकाद
श्रावर्षिकेतिश्रविष्यत्पुराणंयमश्च चतुर्थदशऊलान्येमान्यविवाह्यानिनिर्दिशेत् अनार्षेयंत्रा
रणानामद्विजांचविवर्जयेत् हीनांगमतिरिक्तांगममायाविऊलानिचश्वित्रिकुष्ठिऊलादीनाऊर्ध्व
क्रियपरिवर्जनम् सदाकामऊलंवर्जयेलोमशानांचयत्तऊलम् अपस्मारिऊलं यच्चयच्चयांएडु
ऊलंनवेत् ऋत्विजोनिंद्यायाजकाःकामऊलंकामप्रधानऊलम् अतिवर्णंअतिकृष्णमतिगौरंवा
किंच एतैरेवगुणैर्युक्तःसर्वगुणःश्रोत्रियोवरः यत्नात्परीक्षितःपुंस्त्वेयुवाधीमाञ्जनप्रियः एतैरेवगु
णैर्युक्तोदोषैश्चवर्जितोवरोभवति सवर्णउत्कृष्टोवाश्रोत्रियोभवति यत्नात्परीक्षितःपुंस्त्वे

Indira Gandhi National Centre for the Arts

पुरुषः पुंस्त्वेनिजैरेवांगलक्षणैः पुमांश्चैवविपरीतेनस्त्रीलक्षणैः स्त्री सुबद्धजन्तुजान्वीस्थः सु
बद्धांसशिरोरुहः स्थूलघाटतनुजत्वगबिलग्रगतिस्वरः रेतोप्लुतवते नास्पृक्पादिमूत्रंचफेनिलम्
मुमान्स्यालक्षणैरेनिर्विपरीतलुषंडकः चतुर्दशविधः षंडः शास्त्रेदृष्टोमनीषिभिः चिकित्स्यश्चवि
कित्स्यश्चतेषामुक्तोविधिः क्रमात्निसर्गषंडोवध्रश्चपक्षषंडस्तथैवच अभिशापाद्गुरोरोगाद्देवक्रो
धात्तथैवच ईर्ष्याषंडश्चसेव्यश्चवातरेतामुखेनगः आदित्तमोघबीजोच्च शालीनोन्यापतित्त
या तत्राद्यावप्रतीक्षेरोपक्षाख्यंमासमाचरेत् अनुक्रमात्त्रयस्याप्यकालः संवत्सरःस्मृतःईर्ष्या
षंडादयोन्येयेचत्वाःसमुदाहृताः त्यक्तव्यास्तेरतित्वक्ततयोन्यापिचस्त्रिया आदित्तमोघवी
जाच्चांकुरेपियतिकर्मणि यतिरन्यस्ततोनार्यावत्सरार्धंप्रतीक्ष्यतु शालीनस्यापिद्यल्स्त्रीसंयो
गाद्भ्रपतिध्वजः तांहीनविषयंतुस्त्रीवर्षद्वित्वान्यमाश्रयेत् अन्यस्यांयोमनुष्यःस्यादमनुष्यः
त्वयोषितिलभेतसान्यंनर्त्तारमेतत्कार्यंप्रजापतेः अपत्यार्थंस्त्रियः सृष्टाःस्त्रीक्षेत्रंबीजिनोनरः द्वे
त्रंबीजवतेदेयंनाबीजेदेत्रमर्हति संवत्सरंसुस्निग्धंजन्तुग्रीवास्कंधयोः संधिःधाटाग्रीवापश्चाद्भागः नि
सर्गषंडः लिंगव्रणहीनउत्पन्नः वध्रश्चलिताः पक्षषंडोयस्यपक्षान्तरितारतिरात्तिःगुरोरभिशा
पादेवदेवक्रोधादेवनिंदाजनितक्रोधात् ईर्ष्याषंडस्वस्त्रीविषयेईर्ष्यासंजनितरेताः सेव्यः स्त्रिया

क्षत्रियविशांनार्याः त्वाशूद्रजन्मनः यदयुनरुक्तलक्षणासवर्णानास्ति पूर्वाच्चविनष्टातदानाश्र
मिनास्यात्तन्त्वाश्रमांतरोविधीयते सामर्थ्याद्बुधनोवाबालापत्यश्रुतदातस्यातस्यामवस्थायां
तिस्रोद्वेएकाच ब्राह्मणाक्षत्रियविशांनार्यावर्णानुपूर्व्येणत्वाशूद्रस्यसवर्णापुनश्चातुर्थीसुस्मा
स्थितैव यदाहमनुः शूद्रैवनार्याशूद्रस्यसाचस्वाचविशः स्मृतेः तेचस्वाचैवराज्ञः सुतास्त्र
स्वाचाग्रजन्मनः कामतस्तुप्रवृत्तानामिमाःस्युः क्रमशोवराइतिकामतः प्रवृत्तानांधर्मतः
प्रतएवताजघन्यः क्रमशःनव्युत्क्रमेणाप्युत्क्रमेचदोषोमनुनादर्शितः शूद्रावेदीयतत्पत्रे
रुक्तंध्यत्तनयस्यच शौनकस्यसुतोत्पत्त्यातदयत्यतयाच्चगोरिति अत्रिर्गोत्तमयोरिदंमत
म् शूद्रावेदीयतत्तिवेदनमात्रेणैवशौनकस्यसुतोत्पन्नस्यापत्येनेतिच्चगोः तच्चयुक्तमेणेति
द्वेष्यम्इतरथाचतुस्त्रिद्येकनागिनावर्णाशोब्राह्मणात्मजाइतिनागविनागोनस्यात् नचत
त्प्राधान्यंश्राद्धादिदानेषुकार्यम् दैवपित्र्यातिथेयानित्तत्प्रधानानियस्यतुनाश्नंतिपितृत्त
रत्तस्यनवस्वर्गंसमश्नुतइतिवचनात्विवाहानाह ब्राह्मोविवाहश्राद्धयदीयतेशक्त्यलंकृ
ताम् तज्जःपुनात्पुन्नयतः पुरुषानेकविंशतिं ब्राह्मोनामविवाहोब्राह्मणानामुचितइतित्त
स्मिन्नार्त्तयपूर्वोक्तिलक्षणोवरंवरोवरयितव्यः अर्षिप्रेक्षातेराक्त्यालंकृत्यदीयतेमनुरपिग्रा

Indira Gandhi National Centre for the Arts

धर्मशास्त्रंपुरस्कृत्यप्राड्विवकमतेस्थितः समाहितमतिः पश्येद्व्यवहारान्नृपक्तमात् राजाचेद्व्यवहारान्यरु
ति प्राड्विवेकानुमंता अन्यदातुव्यवहारदृष्टा अतएवदृष्टस्मृतिः राजाकार्याणिसंपरुपेत्प्राड्विवाकोथवाद्वि
जः न्यायागान्यपत्तः कृत्वासन्यशास्त्रमतेस्थितेः विवादेपक्षतिप्रश्नं प्रतिप्रश्नंतथैवच प्रियपूर्व
मावदतिप्राड्विवाकस्ततः स्मृतः व्यवहाराश्रियप्रश्नं प्राड्विवाकस्ततः स्मृतः नारदः यथाशास्त्रंनिषक्ता
यादुरुद्धत्रयुक्तितः प्राड्विवाकस्तथाशास्त्रमुरुद्धव्यवहारतः गौतमः सर्वधर्मत्यागगर्हायः प्राड्विवाकेसत्य
वचनम् किंच रागाद्वोनाज्ञयाद्वापिस्मृत्यपेतादिकारिणः सन्याः एथक्पृथग्दंड्याविवादाद्विगुणंदमम्
उक्ताः सन्यास्तेयदिरागादिवशात्स्मृतिशास्त्रविरुद्धविवादे निर्णयंकुर्वंति तदाविवादाद्विवादविषयीन्
तान्द्विगुणाप्रत्येकंदंडनीयाः अत्रादिशब्देनसदाचारन्या पेतस्यग्रहणम् रागादिग्रहणाच्चे
दंडनीयत्वनिमित्तस्य स्मृत्यपेतादिकारित्वस्यनविशेषणं वाक्यभेदप्रसंगात् यथोन्मत्तंहविरात्तं
सतश्चप्रदर्शनार्थंचमोहादिहेतुकस्यापिस्मृतिवि कारित्वस्यदंडविशेषनिमित्तत्वंभवतिअत

रामः ४

श्लोपर्थ। सुखः

पक्षतिप्राड्विवाकश्चतिःविवदेन्नत्रयस्तस्मिन्
१रुद्ध ५५

एवन्नरादंडनिमित्तेनलोभादिनातुल्यमज्ञानमाह नारदः रागादज्ञानतोवापिलोभाद्योवान्यथावदेत् स
न्योऽसन्यःसविज्ञेयस्तंयापंविनयेद्भूमिति एतच्चदंड्यविधानंधनविषयविवादेवादोत्तरंतुपारुष्यादि
विषयेदंडोत्तरंवेदितव्यम् यदाहविष्णुः कूटसाक्षिणंसर्वस्वापहारः उल्लोचजीविनंसन्यानाच्च अत्रा
प्युल्लोचग्रहणंप्रदर्शनार्थम् अतएवदृष्टस्मृतिः अन्यायवादिनःसन्यास्तथैवोल्लोचजीविनः विश्वस्त्व
चक्षाश्चैवनिर्वास्याः सर्वएवते यत्तु लोभात्सहस्रंदंड्यः स्यान्मोहात्पूर्वंतुसाहसम् इत्यादिलोभमोहयो
रतुल्यदंडनिमित्तत्ववचनंतत्साक्षिविषयम् नसन्यविषयम् अतएवकात्यायनःसम्यग्ज्ञानरहितस्यस
न्यस्यद्विगुणंदंडमाहकार्यस्यनिर्णयंसम्यग्ज्ञात्वासन्यस्तत्तोवदेत् अन्यथानैववक्तव्यंवक्ताद्विगुणंदंड
नार्ह तथारागापरपर्यायेणस्नेहनलोभेनचसन्यदंडंप्रत्यज्ञानस्यतुल्यनिमित्तत्वमाह स्नेहाद्ज्ञानतो
वापिमोहाद्वालोभतोपिवा अत्रसन्योन्यथावादीदंड्योसन्यः सहिस्मृतः सन्यदोषात्तुयन्नष्टंदेयंसन्येन
तत्तदा कार्यंतुकार्थिणमेवनिश्चितंनविचारयेत् तथाअनिर्णीतेतुपद्यर्थेसंनाशेतरोर्थिनाप्राड्विवको
थदंड्यः स्यात्सन्यैश्चेवनसंशयः नारदः नानियुक्तेनवक्तव्यंव्यवहारेकथंचन नियुक्तेनतुवक्तव्यम
पक्षपतितंवचः नियुक्तोवानियुक्तोवाशास्त्रज्ञोवक्तुमर्हति यत्तेनसदसिप्रोक्तंसधर्मेणात्रसंशयः तथा
लोभद्वेषादिकृत्यक्तायःऋजुंकार्यनिश्चयम् शास्त्रोक्तेनविधानेनतत्पक्षंनफलंनेवेत् नयात्युक्तो
कात्यायनः अधर्मतःप्रवक्तुंनोयेदेरन्सभासदः उपैदृपमाणाः सन्पानरकंयांत्यधोमुखाः अन्याय

Indira Gandhi National Centre for the Arts

याज्ञ० व्य० प्र० २८५

तोपियासंतंयेतुयोतिसनासदः तेपितङ्गागिनस्मात्तोधनीयः सनेनेपः मनुः राजानवत्पनेनातुमुच्यते चसनासदः एनोगच्छतिकर्त्तुरनिंदा हीयदिनिंद्यते सनावानप्रवेश्यावक्तव्यावासमंजसम् अनुवन्विन्दुवन्वापिनरोनवतिक्रिल्विषी त्रात्यायनः न्यायन्नास्त्रमतिक्रम्य सत्यैर्यत्रविनिश्चितम् तत्रधर्मोधधर्मेणहतोहंतिनसंशयः यत्रधर्मोधधर्मेणसत्यंयत्रानृतेनच हन्यतेप्रेक्षमाणानांहतास्तत्रसनासदः प्रेक्षमाणानामित्यनादरेषष्ठी व्यासः नासोसनायत्रनसंतिरक्षानतेवक्षायेनवदंतिधर्मम् नासौधर्मोनत्रनसत्यमस्तिनतत्सत्यंयच्छलेनाविद्धम् येतुसन्यः सनाप्राप्यतत्सभ्यायंतआसते यथाप्रसंवक्तारंतेसर्वेतेनृतवादिनः व्यवहारदर्शननिमित्तमाह स्मृत्याचारव्यपेतेनमार्गेणाधर्षितःपरैः आवेदयतिचेद्राज्ञेचव्यवहारयदंहितत्र स्मृतिशास्त्रविशिष्टाचार रहितेनमार्गेणोपायेनपरैरक्षिप्तः सराज्ञेयद्यावेदयति अहमनेनविधिनान्यायेनपरिनृतोस्मीति यत्तन्निवेदनंव्यवहारयदंस्यान्निमित्तमितियावत् परैरितिकुववचनमुपलक्षणार्थम् तेनैकेनद्वाभ्यांवाबहुभिश्चादिलोलक्ष्यते आवेदनस्यव्यवहारदर्शनेनिमित्तत्वेनप्रतियादनादावेदनाहतेव्यवहारदर्शनंराज्ञाकार्यम् तथाचमनुः नोत्पादयेत्स्वयंकार्यं राजानाप्यस्पृहः नचप्रापितमन्येनग्रसेतार्थंकथंचन कार्यविवादोव्यवहारइतियावत् व्यवहारकालेचप्रापितंप्रामाणिकमर्थंनग्रसेतनालपेत्र अत्रकात्यायनः केनकस्मिन्कदाकस्मात्क्वेदंसनागतः केनपुरुषेणवास्मिन्कार्येकदाकस्मात्क्वेतोःपरिनृतोसीति सनाग

रामः

५

अथेदानीं विनागाख्यंव्यवहारपदमारभते औविनागंचेत्पितृकुर्यादिच्छयाविनजेत्सुतान् ज्येष्ठेवाश्रेष्ठेन जेनसर्ववास्युः समोविनः १ पित्रादिधनस्यपुत्रादीन्द्विरूपविविच्यनागकरणंविनागः तत्रपितृधर्मोपित्रा विनजेदित्युत्सर्गः हेतुविशेषेतुपुत्रेअपिविनजंते तदुपरिष्टाद्वक्ष्यते तत्रयदिपितृविनजेत्तदिच्छयान्यू नाधिकनागविषयान्सुतान्दद्यादिरूपधनंविनजेत् अस्मदुनस्यायमंशोस्तवअयमंशोस्तवेतिव्यवस्थापयेदितियावत् शंखः यद्येकपुत्रः स्यात्तदाह्यौनागोवात्मनःकुर्यात् ननुइच्छयेतिनवक्तव्यम् विनागःकर्तृत्वादेवतत्प्राप्तेः नहिचेनिष्पन्नक्रियासुस्वतंत्रोनवति नस्वतंत्रएवकर्त्तोच्यते सत्यम् विनागकर्त्तृकादेवविनागविषयेच्छाप्राप्ता अतएवासाविच्छयाविनजेत्सुतानित्यनेनविधीयतेकिंत्वन्येव तस्माच्चनःस्यादित्युत्तरस्यन्यूनाधनोशःकरयत्तिदधिकः इत्येवविषमोनागविषयः ततश्चेच्छयान्यूनाधिकत्वंनागेसुतान्विनजेदित्यर्थः यद्यपिविनजेदित्यस्माद्विनागएवप्रतीयतेनवैषम्यविशिष्टः तथापिज्येष्ठस्यविशेषोद्धारः सर्वत्रव्याप्तेयदुत्तरम् ततोधर्मध्यमस्यस्यात्तुरीयंतुयवीयसः इत्यादिनिरुद्धारशास्त्रैर्यावंतउद्धारप्रकारोविहितास्तेसर्वत्रोपलक्षितानवति ततश्चपरिशेषाद्विनागकर्तुरिच्छयाविनागवैषम्यमिच्छयाविनजेत्सुतानित्यत्रविधीयतेइतिसिद्धम् अत्रनारदः पित्रैवसुविनक्तायसमन्यनाधिवैधनैः तेषांसएवधर्मःस्यात्सर्वस्यहिपितापभुरितिवचनात् नचेतदुद्धारवाक्यार्थविषयामितिवाच्यम् पितापभुरितिवचनात् नलक्षरेपितुःप्रभुत्वंकेतुशास्त्रस्यवहस्यतिः समन्यू

Indira Gandhi National Centre for the Arts

नाधिकानागः पित्रायेषांप्रकल्पिताः तथैवतेपालनीयाविनेयास्तेस्वस्यथा अथवेच्छयाविनजेत्मुता
नित्यनेनविनागकर्त्तृतयैवपितुरिच्छयाविनागप्रयोगेऽकल्पंप्राप्तमुच्यते इतिवाक्यार्थोनर्थक्रमप्रसं
गपरिहारार्थंपुत्रेच्छयाविनागंनप्रयुंक्तेइतिपरिसंख्यायतेइत्याश्रीयते तथावमनुः ऊर्द्धंपितुश्चमातु
श्चसमेत्यभ्रातरःसमम् नजेरन्पैतृकंरिक्थमनीशास्तेहिजीवतो देवलः पितर्युपरतेपुत्राविनजे
रन्पितुर्धर्मनम् अस्वाम्यहिनवेद्देषानिर्देषेपितरिस्थिते अस्वाम्यमस्वातंत्र्यम् शंखलिखितौ पितु
रूर्द्धंरिक्थविनागः नजीवतिपितरिपुत्रारिक्थंविनजेरन् यद्यपिस्यात्पश्चादधिगतमेतैरनर्थएवपु
त्रा अर्थधर्मयोरस्वातंत्र्यम् नारदः विनागोऽर्थस्यपित्रास्यपुत्रैर्यत्रप्रकल्प्यते दायनागइतिप्रोक्त
विवादपदबुधैः अत्रचपित्रास्यपुत्रैरितिचप्रदर्शनार्थम् विनागेचेत्पिताकुर्यादितिपितुः स्वार्जित
धनविषयम् तत्पित्राधार्जितधनविषयेतुसममेवपितापुत्रयोर्विनागकर्त्तृत्वम् अतएवाहविष्णुः
पितायेपुत्रान्विनजेत्तस्यस्वेच्छयास्वयमुपार्जितंयेतैर्विभजेतेपिधनेकदाचित्पुत्राएवविनागकर्त्तारोनत्व
ति अतएवाहनारदः अतऊर्द्धंपितुःपुत्रा विनजेरन्धनंसमम् समामितिपितुरूर्द्धंविनागकर्त्तृत्वंपु
त्राणांप्रपितियाधम् मातुर्निवृत्तेरजसिप्रतासुनगिनीषुच निवृत्तेचापिमरणेपितायुयरतस्यहेरंपु
त्रकवान् पुत्राः समधनंविनजेयुरित्यनुषज्यते शंखः अकामेपितरिरिक्थविनागः कर्त्तव्यधिका
शदानेनपुत्राणांविनक्तधनानांसएवधर्मोयःपित्रादिकृतः अतोसौनातिक्रमणीयः बृहस्पतिः स

प्र

मन्वनाधिकानागाःपित्रायेषांकल्पिताःतथैवतेपालनीयाविनेयास्तेस्वस्यथारोगचेतसिदीर्घरोगिणिवा
नारदःव्याधितःकुपितश्चैवविषयासक्तमानसः अन्यथाशास्त्रकारीचनविनागेपितापुत्रः अन्यथाशास्त्र
कारीविधिनिषेधातिक्रमकारीपित्रार्जितेपिधनेपुत्राणांविनागेस्वातंत्र्यम् पितुरकामत्वादौनिमित्ते नवति
मातरिचम्रियमाणायामस्वतंत्राएवपुत्राः यदाहशंखः ज्येष्ठएवपित्र्यवदर्थान्पालयेदितरेषांतुरिक्थ
मूलमेवकुटुंबमस्वतंत्रापित्तमेतोमातर्यवमवस्थितायांमातुः कुटुंबभरणसामर्थेसत्येतत्तं ज्येष्ठस्यय
दनुजैः सहाविनक्तधन्वंचमुच्यते तत्तेषामधर्मेकेश्चिदध्येतव्ये वेदेसतिहएवव्यम् अधीतवेदेष्वधीता
तत्तदर्थेषुचापिहोत्रादयनुष्ठानसमर्थेषुचविनागएवश्रेयान् यदाहमनुः एवंसहवसेयुर्वाएथग्वध
मंक्रियया यथाविवर्द्धतेधर्मस्तस्माद्विभज्यसंक्रियाः व्यासः भ्रातरोजीवतोःपित्रोः सहवासोविधीयते
तदभावेविनक्तानांधर्मस्तेषांविवर्धते यदात्वप्रगल्भयाज्येष्ठेनसहाविनक्ताधनाःकनीयांसोभवंति
तदातेषामावश्यकंवैश्वदैवाद्यपिनविनज्यते यदाहबृहस्पतिः एकपाकेनवसतांपित्रदेवद्विजार्चनम्॥
एकंचवेद्विनक्तानांतदेवस्याद्धेगृहे उक्तोपित्रकर्त्तृकोविभागोपुत्राणांविषमोपिविनागोभवतीति तस्यविरो
धापवादमाहमनुः भ्रातरोसंविनक्तानांयद्युत्थानंभवेत्सह नतत्रभागंविषमंपितादद्यात्कदाचन किंच
यदिकुर्यात्समानंशांमत्तः स्त्रार्थाः समांशिकाःनदत्तस्त्रीधनंयासांनस्त्रीवाश्वसुरेणवा यदिपितापुत्राणांक
तेसमंधनविनागंकुर्यात्तदायान्यः स्त्रीभ्यः स्त्रीधनंनस्त्रीश्चसुरोपित्रावान्नदत्तं ताः स्वयंभ्यः पुत्रसमं

Indira Gandhi National Centre for the Arts

शः कार्यः एकस्यपुत्रस्यवानांशास्तावदंशामेकैकांपत्नीकुर्यादित्यर्थः विभागवैषम्येकारणांतरमाह शक्तस्यानीहमानस्यकिंचिदत्वापथक्क्रिया यःपुत्रोधनार्जनसमर्थस्तयापित्तधनंनेच्छति योवाधनार्जनसमर्थोपिशाठ्यात्धनस्यार्जनरक्षणानुकूलंचेष्टनकुरुतेतस्मैकिंचिदसारमत्यल्पधनंदत्वापिभ्रातृपथक्क्रियाकार्या अन्यथास्तेनतस्यतस्यवाविवादःस्यात् पुत्रैः संचयार्जितेधनेएतत् पित्रादिधनेतुसमांशात्तनतेएवमनुः भ्रात्रर्णायस्तुनेहेतधनंशक्तः स्वकर्मणासनिरूज्यःस्वकादंशात्किंचिदत्वोपजीवनम् स्वकादंशात्तत्रात्तनिः स्वयमर्जितादित्यर्थः प्रसंगादन्यदपुच्यते तत्रनारदः कुटुंबार्थेषुचेद्यक्तस्तत्कार्यंकुरुतेचयः सत्रात्तनिर्हरणीयोग्रासाच्छादनवाहनैः आपत्तवः सर्वेविधर्मसदृक्तान्नागिनः यस्त्वधर्मेणद्रव्याणिप्रतिपादयतिज्येष्ठोपितमन्नागंकुर्वीत अधर्मेणाधृतादिनाद्रव्याणिसुवर्णगोवस्त्रादिनिप्रतिपादयतिविनाशयति अन्यत्रनयतिवागोतमः सवर्णापुत्रोप्यन्यायवृत्तोनवृत्तेतेऽपेक्षेत्यपेक्षाम्र मनुः सर्वएववि कर्मस्थानार्हतिभ्रातरोधनम् शंखलिखितौ अपयात्रितस्यरिक्थंपिंडोदकानिनिवर्त्तंतेपतितत्वात्तिनिर्दिष्टतोपपात्रितः रिक्थंपित्रधनम् पुत्रस्थानीयस्यज्ञातिधनमपि उशनोविषमविभागः सधर्मत्वादनतिक्रमणीयइत्याह न्यूनाधिकविभक्तानांधर्मःपित्रकृतःस्मृतः पुत्रैर्वार्जितधनस्यन्यूनाधिकंदादनेननपुत्राणांविभक्तधनानांसएवधर्मोयःपित्रादिकृतःअतोसौनातिक्रमणीयः बृहस्पतिः समन्यूनाधिकाभागाः पित्रायेषांप्रकल्पिताः तथैवतेपालनीयावि

नेयास्तेसुरन्यथा अधुनाकर्त्तृकर्मकालप्रकारैर्विशिष्टंविभागांतरमाह विभजेरन्सुताः पित्रोरूर्ध्वंरिक्थमृणंसमान् मातुर्दुहितरः शेषमृणात्तान्यैर्हृतेन्वयः मातापित्रोर्मरणादूर्ध्वंतयोरवरिक्थमृणंचपुत्राःसमंयावंशोभ्रातरस्तावंतोभागान्प्रत्येकमन्यूनाधिकारणंस्वधनंस्वचरुत्वाविभजेरन्तत्रश्चयोयावंधनस्यविभागंनजानीतेतावंतमृणंस्वापित्रजेत् एवंचसतियज्ञतुस्त्रियैकभागापुरिति तथायेनचैषांस्वयमुत्पादितंस्वादित्यादिविषमविभागविधियुक्तृणस्यापिधनानुसारेणविभागविधिरवसेयः मातुस्तुधनमस्यापकरणेकृतेयदवशिष्टं तत्स्यादुहितरोविभजेरन् तान्यैर्हृते दुहितृणामभावेतदन्वयोदुहित्रन्वयः दुहितृणांतदन्वयस्यवा अन्वयेपुत्राणामेवमातृधनंविभजेरन् यदाहभ्रातृणांदुहितृणामभावेतुरिक्थंपुत्रेष्वतइत्येतद्वंधुदत्तंतुबंधुनामभावेतत्तद्गामित्तत्रागिन्योबांधवैः सार्द्धंविभजेरन्सजातकाः स्त्रीधनस्येतिधर्मोयंविभागस्तुप्रकल्पितइति मनुः जनन्यांसंस्थितायांतुसमंसर्वेसहोदराःभजेरन्मातृकरिक्थंनगिन्यश्चसनाभयइति अत्रचरादौविभक्त्यार्थंनसमुच्चयार्थंःविकल्पेचदुहितरः क्रमार्थंःपूर्वमधिक्रियंतेयदाहमनुरेवमातुस्तुयौतकंयत्स्यात्कुमारीणामेवसइति गौतमस्तुप्रत्तानामपिदुहितृणामप्रतिष्ठितानांमातृधनग्राहित्वमाह स्त्रीधनंदुहितृणामप्रतिष्ठितानांचेति अप्रतिष्ठिताअनपत्यानिर्धनादुर्भगावा बृहस्पतिः स्त्रीधनेस्वादयत्यानांदुहितान्वतदंशिनी अप्रत्तावेत्समृद्धाकुलजत्तेमानमात्रकम् यौतकंयथकधनम् माममा

Indira Gandhi National Centre for the Arts

त्रकं स्वल्पमित्यर्थः वसिष्ठः मातुः परीणाह्यां स्त्रियो विनजेरन् परीणाह्यमलंकारादि अनपत्यस्त्रीधनविषयेमनुरा ऊ स्त्रिया सुयऊवेद्वित्तपित्रादत्तंकंचनब्राह्मणीतद्धरेत्कन्यातदपत्यस्य वानवेत पित्रेतु पतद्ग्रहणम् कन्यासापत्नीब्राह्मणीतिविरोधेनोपरोधात् एवंचसतिप्रत्तासुप्रतिष्ठितासुदुहितृसुदुहितॄणामपिमाधत धनेधिकारोनवति अस्मिन्नेवविषयेविरोधान्तरमाहमनुः यासांसांस्युदुहितरस्तासामपियथार्हतः मातामहाधनंकिंचित्प्रदेयंप्रीतिपूर्वकम् विनजेरन्सुताः पित्रोरूर्ध्वमित्यपायमर्थः यदिपित्रोर्मरणादूर्ध्वंविनजेरंस्तदाकिंकथादिसमंविनजेरन्निति एतज्ञातकर्तृकविनागपरम्ते नजीवत्यपिपितरिभ्रातरः समभेवविनजेरन् पितुस्तुविनजमानस्यनायंनियमइत्यर्थोऽभ्यते नचपित्रोरूर्ध्वंविनजेरन्नवेतिवाखेयम् यदाहमनुः एषसहवसेयुर्वायथागवाधर्मकांक्षया एषाविवर्द्धतेधर्मस्तस्माद्भ्रातृयथाक्रियं वक्तुतेनैवोक्तम् ज्येष्ठएवतुगृह्णीयात्पित्र्यंधनमशेषतः शेषास्तमुपजीवेयुर्यथैवपितरंतथेति तदसमाप्तवेदाध्ययनेसुकनिष्ठेषु उन्मत्तादिनानिरंशेषु अप्राप्तव्यवहारेषुज्ञातव्यम् अत्रकात्यायनः संप्राप्तव्यवहारणांविनागश्चविधीयते पुंसांचषोडशोवर्षोजायतेव्यवहारिता अप्राप्तव्यवहारज्ञापनार्थम् अगृहीतवेदत्वमपिहविनायोद्धारणम् यदाहहारितः यद्यसमाप्तवेदाःकनीयांससहवसेयुरितिनारदः विनयाद्धृतः सर्वोज्येष्ठोभ्रातायथापितृत्रातृत्वाद्भ्रातृकः कनिष्ठोवाभ्रातृत्वापेक्षाकुलेस्थितिः नारदः पैतृकमण

पाकृत्वेश्वरिवर्थंविनजनीयमितिसरावाह यत्रिभ्रंपितृदायेभ्योदत्त्वांशंपैतृकंचयत्र त्रात्तत्रिसहविनक्तव्यमणीत्यादन्यथापिता पितृदायानिनवश्राद्धानितथाचगौतमः नवश्राद्धंसहदद्युः कात्यायनः भ्रात्रापितव्यमात्मनाकृतं वार्थस्त्रीणकृतम् विनागकालेदेयंतद्विधिश्चिः सर्वमेवतु तद्ऋणधनिनेदेयंनान्यथैवप्रदापयेत् नावितं चेत्प्रमाणेनविरोधात्परतोयदाविरोधाद्विवादात्परतऊर्ध्वम् तथापित्र्यंपितृऋणसंयुक्तमात्मीयंचात्मनाकृतम् ऋणमेवंविधश्चोर्ध्वंविनागेवधनिः सहधर्मार्थप्रीतिदत्तंचयद्गृहंस्वनियोजितम् तद्ग्रहमानंविनजेन्नदानंपैतृकाद्धनात् धर्मार्थंयत्संकल्पितंयच्चप्रेतेमयादत्तं तदात्मिमुत्रेत्वयैतदपाकरणीयमृणमितिपित्रानियोजितंतद्ग्रहमानमुपलभ्यमानंविनजेत्नतुपैतृकाद्धनात्तदाकृत्यधनविनागः कार्यइतिद्ग्रहमानंविनाज्यंतुगृहंदोत्रंचतुष्पदम् गूढद्रव्यनिरूपकायांप्रत्ययस्तत्रकीर्तितः गृहोपस्काराणार्थंमनुः अजाविकंत्वेकशफंनाजातुविषमंभजेत् अजाविकंतुविषमंज्येष्ठस्यैवविधीयते विषमंत्रातसंख्यापेक्षयाअन्यसंख्यामविनजेत् मातृपितृद्रव्याविरोधेनऽदन्यत्स्वयमर्जितम् मैत्रमौद्वाहिकंचैवदायादानेनतद्भवेत् अविनक्तधनानांमध्येयेनपितृधनस्याविरोधेनानुपघातेनानुपजीवेन्तत्स्वयमेकोविनैवयदन्यदधिगमर्जितंधनंयच्चमैत्रमित्रादवाप्तं यच्चौद्वाहिकमुद्वाहेश्वसुरादिभ्योलब्धंनतद्विनजनीयम् किंत्वार्जकस्यैवतदनमित्यर्थः मनुः अनुपघ्नंपितृद्रव्यंश्रमेणयदुपार्जयेत्स्वयमीतिहितलब्धंचनाकामोदातुमर्हति श्रमोसुहृत्कृष्यादेरीहात्रश्रमरहिताचेष्टा का

Indira Gandhi National Centre for the Arts

त्यायनः यस्त्वध्वलानन्नालेतुसजात्याकन्यासहकन्यागतंतुत्तद्वितंस्रुंदतिकरंस्मृतम् वैवाहिकंतुत
द्विधाऽऽर्ययायत्सहागतम्धनमेवंविधंसर्वंविज्ञेयंधर्मसाधकम् किंचन्नमादत्यागतंद्रव्यंहृतमस्रुद
रेतुयः दायादेन्योनतद्दद्याद्विधवालब्धमेवच यत्पूर्वपुरुषक्रमायातंक्षेत्रारामादिकंद्रव्यंकथमप्रिय
रेणापहृतंयेदायादानुमत्यास्रुरेत्तदसौदायादेन्योनदद्यात् यत्सुनर्दीयादानुमतिमतलोहृतं
त्तस्यचतुर्थमंशमुद्धृत्यांगस्त्रीयात् शेषमुद्धारकेणसहसर्वेविन्नजेरन् यदाहस्रष्पष्टगः पूर्वनष्टं
तुयोन्नमिमेकश्चास्रुरेक्रमात् यथांशतुल्यनतेन्येदत्वांशंतुतुरीयकम् यच्चविद्ययानिमित्तंतन्नत
यालब्धंतद्पिदायादेन्योनदद्यात् मनुः विद्याधनंतुयदस्यतत्तस्यैवधनंनवेत् मैत्रौद्वाहिकंचैव
मधुपर्किकमेवच कात्यायनः परन्नोपयोगेनविद्याप्राप्तान्यतस्तुयात्तयाप्राप्तधनंयत्तुविद्याप्राप्तंतु
च्चेत्तन्नक्तमन्न अन्यतःपितुरन्यतइत्यर्थः उपन्यस्तेनलब्धंयद्विद्ययायागपूर्वकं विद्यादानंतुत्तद्विद्याविनागेननि
युज्यते शिष्यादर्लिप्सतः प्रश्नात्सदिग्धप्रश्ननिर्णयात् स्वज्ञानशंसनाद्वादात्तथाध्ययनाच्छ्रुतेर्विद्या
दानंतुतत्प्राकृविनागेनविन्नज्यते शिलेष्वपिरिधर्मोयमूलाद्यश्चाधिकंनवेत् विद्यायागकृतावेवयाज्यतः
शिष्यतस्तथा एतद्विद्याधनंप्राकृसामान्यंयदतोन्यथापरंनिरूपयन्नत्रधंविलातोद्धृतपूर्वकं॥विलादानंतुत
द्विलान्नविनाज्यंवहस्पतिः॥विलाप्रतिश्रयालब्धंशिष्यादासंचयइवेत् स्वलिङ्न्यायेनयस्त्वधमेतद्विद्याध
नन्नुः आतुरसंन्यायंयत्रयस्तन्नकर्मकुर्वते तस्मिन्नकर्मणितुष्टेनप्रसादः स्वामिनाकृतः तत्रलब्धंतुयत्किं

चिद्धनंशौर्येणात्तंश्वेत् व्यासः विद्याप्राप्तंशौर्यधनंयच्चसौदायिकंनवेत् विनागकालेतत्तस्यनान्वेस्वंस्वी
क्थिलिःकात्यायनः ध्वजाहृतन्नवेद्यच्चविनाज्यंनैवतच्छ्वेत् संग्रामादाहृतंयत्तुविश्राव्यहिषतांबलम् स्वाम्य
र्थंजीवितंत्यक्त्वातच्चाहृतमुच्यते मैत्रादीनांधनंनोपतद्व्यानुपयोगेनार्जितानांनविनागः तदुपयोगा
र्जितविषयेतुव्यासआह साधारणंसमाश्रित्ययत्किंचिद्वाहनायुधम् स्त्रीयौदिनाप्तोतिधनंन्नातस्तत्रनाप
नः तस्मान्नागहृयंदेयंशेषाःस्युःसमनागिनः कात्यायनः नाविद्यानांतुवैद्येनदेयंविद्याधनंक्वचित् सम
विद्याधिकानांतुदेयंवैद्येनतद्धनम् नारदः वैद्योविद्यानाकामोदद्यादेवंस्वतोधनात् पित्र्यंद्रव्यंसमा
श्रित्यनचेन्नेनतदाकृतम् कुटुंबविन्याद्भ्रातुर्यो विद्यामधिगच्छतः नागंविद्याधनात्तस्मात्सलब्धेनाभ्र
तोपिसन् यत्किंचित्पितरिप्रेतेधनंउपैषोधिगच्छति नागोयवीयसांतत्रयदिविद्यान्नपालिनः यदिविद्यानपा
लिनोविद्यान्यासवतःकनीयांसः अपरमप्यविनज्यमाह मनुः वस्त्रंयत्रमलंकारंकृतान्नमुदकंस्त्रियः
योगक्षेमंप्रचारंचविनाज्यंनप्रवर्तते अत्रयत्रशब्देनयानमुच्यतेइतिकेचिद्विद्यायामानेतत्कात्यायनव
चनविरुद्धम् तथाहिधनंपत्रनिविष्टंतुधर्मार्थंचनिरूपितम् उदकंचैवदारांश्चनिर्वंधोयः क्रमागतः ध
नंवस्त्रमलंकारोनानुरूपंतुयश्चेत् यथाकालोपयोग्यानितथायोज्यानिबंधनिःगोप्रचारस्त्रीरक्षाच्च
स्त्रियश्चांगयोजितम् प्रयोज्यंनविनज्येतधर्मार्थंचवहस्यतिः नानुरूपंविनागानुरूपंविनक्तनिः सह
विषमसंख्याकीम् तद्यथाकालविनक्तसंख्यानुरूपेणकालोपयुक्तकार्यमूयश्चवस्त्रादीनामविना

Indira Gandhi National Centre for the Arts

नाज्यत्वमुक्तम् तत्त्वतस्तूपतोमूल्यतोविभजनीयमेव यदाहबृहस्पतिः वस्त्रान्नयोर्विभज्यायैरुक्तैर्नैवविचारितम् धनंनवेत्समक्षंनावस्त्रालंकारसंश्रितम् मध्यस्थितमनाजीव्यंदातुंनैवास्यशक्यते युक्त्याविभजनीयंतदन्यथानर्थकंभवेत् विक्रियवस्त्रान्नरणंधनमुद्भूसलेखितम् कृतान्नंचाकृतान्नेनपरिवर्त्यविभज्यते उद्भूत्यकृयवाप्यस्तत्वनुसारेणगम्यतेयथान्नानुसारेणसेतुक्षेत्रेविभज्यते एकास्त्रीकार्यैकर्मयथाद्रोणगृहेगृहेवृद्धःसमांशांतोदेयासानामप्यंविधिःयोगक्षेमवतोलाभनःसमत्वेनाविभज्यते प्रचारश्चयथाद्रोणकर्त्तव्योरिक्थिनिःसदाएकास्त्रीमिति अनुपयुक्तदासीविषयम् उपयुक्तायांतुगौतमआह उदकयोगक्षेमकर्त्तान्नेषविभागःस्त्रीपुत्रासंयुक्तास्त्रियोगक्षेमवतोलाभइतियोगक्षेमवान्राजादिरीश्वरोपःपित्रादिरिक्थिनिःस्वकुटुंबनिर्वाहकर्त्तव्येनोपार्जितंततोयोलाभोलब्धंधनंतत्समंविभाज्यमित्यर्थः प्रचारःप्रवेशनिर्गमनंद्वारलिखितौनचास्तिविभागोद्रोदकपात्रालंकारासंयुक्तस्त्रीवाससामुपचाराद्यनिर्विभागश्चेतिप्रजापतिः सामान्यार्थसमुत्थानेविभागस्तुसमःस्मृतःअनेकपित्रर्जितेतुपित्रंशतोभागकल्पनाअर्थसमुत्थानमर्थोर्जनंसतिसमोविभागःकार्यःएतस्मिन्विषयेपितापिसममेवविभजेत् दाहस्तुःज्ञातृणांमविभक्तानांयद्यन्नवेत्सह नतत्रभागंविषमंपितादद्यात्कथंचन एवंचसतिविषयांतरेपित्रंशकर्त्तृकोविभागेविषमोपिस्यादितिगम्यते अविद्यानांतुसर्वेषामीहातश्चेद्भवेन्नवेत् समांशत्रविभागः स्यादपित्र्यइतिधारणंनवोद्धारापेक्ष्यमेतद्वैषम्यम् अविद्यानामितिविशेषणात् अविभक्तधना

येज्ञातयःपरेतास्तेषांकस्यचिदेवकस्यांचिद्वोद्वस्यचिद्बहवःपुत्राःसुतास्तत्रतेषांपित्रंशेनभागकल्पनापितुरेवयाद्भागसावंशमेवद्वौवावहवोभागस्त्रीसुतेषांनसमोविभागइत्यर्थः बृहस्पतिः समंवैतेस्तुयत्तांससंवैतत्रसमांशिनः तत्सुताविषमंसमाःपित्रंशहारास्मृताःकात्यायनः अविभक्तेनिजेप्रेमतत्सुतैरिक्थभागिनः कुर्वीतजीवनंयेननलब्धंवैपितामहात् लब्धेतैर्हिपितृव्यैस्तुपित्र्यस्यवसुतात्मजाएकांशभुजस्तेषांज्ञातृणांन्यायतोनवेत् लब्धेतत्सुतोवापिनिवर्त्तितःपरतोनवेत् अविभक्तधनेज्ञातरिमृतेतत्सुतैःपितामहादविभागःपित्र्यात्तत्सुतैरंशान्निजपित्रंशगंगृह्णीयात् एवंचतत्सुतैःतस्यैवभुंजतेतेत्यर्थः अस्यदेवलोक्तोविशेषः अविभक्तविभक्तानांतुल्यानांवसतांसहद्रव्योदायविभागः स्यादाचतुर्थीदितिस्थितिः तावच्चुल्लाःसपिंडाःसुःपिंडोनेदस्त्वतःपरम् समभिच्छंतिपिंडानांदायार्थस्यविभाजनम् विधिरेषसवर्णानांवक्ष्यमाणसमुद्धृतः एकएवसवर्णःस्याद्योत्रनविभज्यते विष्णुः अत्रज्ञातृणांदायविभागःयश्चानपत्याःस्त्रियःसुतासांचापुत्रलाभाद्विभागः ज्ञातृणांस्त्रियोनार्योअनुत्पन्नायत्यागहीतनागामतत्कर्त्तृकासासामपिदायोदेयःअपुत्रलाभाद्वपुत्रानुत्पत्तौतुभागोध्यावर्त्तते अपुत्रलाभादितिवचनाद्वयदुक्तम् विभागंचेत्पिताकुर्यादिच्छयाविभजेत्सुतानितितस्यापवादमाहबृहस्पतिः यत्पितामहोपात्तंनिबंधोद्धारमेववा तत्रस्यात्सदृशस्वाम्यंपितुःपुत्रस्यचोभयोःपितामहधनेयोत्रस्यस्वपित्रातुल्यंस्वाम्यं तेनविभागमनिच्छतापिपितास्वपित्र्यधनंपुत्रविभागेच्छयाविभजेत्समश्चविभागःनस्वार्जितधनवद्विषमःकार्यःनिबंधोनामात्मनि

Indira Gandhi National Centre for the Arts

नागेप्रतिदेत्रेप्रतिगृहंचैतावद्धनममुष्मैदेयमिति कात्यायनः यैतामहंसमानंस्यात्पितुः पुत्रस्यचोभयोः स्व
यंतत्पार्जितंपित्रानपुत्रः स्वाम्यमर्हति एतत्पितामहधनानुपजीविने नपित्र्युपार्जितेद्रष्टव्यम् व्यासः क्र
मागतेगृहेक्षेत्रेपितृपुत्राः समांशिताः यैतद्धनविनागार्हाः पुत्राःपितुरनिच्छतः बृहस्पतिः द्रव्येपितामहोयान्ते
स्यावरंजंगमेपित्र्यासममंशित्वमाख्यातंपितुः पुत्रस्यचैवहि यैतामहंदत्तंपित्रास्वशक्त्यायदुपार्जितम् वि
द्याशौर्यादिनावाप्ततत्रस्वाम्यंपितुः स्मृतम् यत्पैतामहंधनंपरैरपदत्तंपित्रापुनस्तत्स्वसामर्थ्येनार्जितंविद्या
दिनाचतेनैवयदवाप्तं तत्रपितुरेवस्वाम्यंनपुत्राणाम् अतएवाह प्रधानंस्वेच्छयाकुर्याद्भोगंचैवततोध
नात्तदनावेतुतनयाः समंशाः परिकीर्तिताः कात्यायनः स्वशक्त्यापदत्तंनष्टंस्वयमार्ज्यवयञ्चावेद्ए
तत्सर्वंपितापुत्रैर्विनागेनैवदाप्यते यद्यदत्तनष्टंचपितास्वशक्त्यार्जयेत् तद्विनागकालेपितापुत्रैर्न
दाप्यतेइत्यर्थः एवंतावत्पैतामहधनेपौत्रस्यस्वपित्रासहसद्भावस्वाम्यंस्मृत्योर्वदंति नचैतावतास्त्री
नाद्धीतेत्यादिश्रुतिर्विरुध्यतेयेनतद्विरोधपरिहारायसतिपुत्रेपितास्वपुत्रधनंनसर्वंदद्यात्कुंजीतवा
किंतुपुत्रार्थमवश्यंपोषयेदित्युपचारिकार्थपरतयाव्याख्यायेत् यद्यपितद्धनंस्वस्यपुत्रस्यचसाधारणंतथा
चपुत्रानुमत्यापुत्रविनागकरणेनद्रव्यांतरार्जनेनवाशक्तएवपितृहोत्रादिकर्तुम् नचसविनागात्स्वा
म्योत्पत्तिर्येनप्राग्विनागेपितानस्वामीस्यात् संविनागोहिसाधारणधनानास्वामिनामेकैकस्मिंनागेस्वामिनए
कैकस्यस्वाम्यंव्यवस्थापयतिनापूर्वमुत्पादयतियथालोकेसंन्यासमुत्थापिनोवेदेचसंन्यासिनांस्वामु

स्थानेयदिचविनागः स्वामित्वेहेतुस्तदाहढादिनाक्रियमाणोपितृजनयेत् यदापिगौतमेनोक्तम् स्वामीत्वंक्रि
यासंविनागपरिग्रहाधिगमेष्वितितत्संविनागेस्यव्यवस्थितस्यस्वामिनावजनकत्वपरम् विनक्तेषुसुतो
जातसवर्णायांविनागनाद्दशमोद्धृतद्विनागः स्यादयव्ययविशोधितात् विनक्तधनेषुपुत्रेषुयः सव
र्णायांपुत्रोजातः सपित्तविनागनाद्दशवति पित्तविनागनावेतुयदिविनक्तेत्रादिकंकृतेविनागेपश्चाद्
द्रव्यते तदुत्पन्नात्तविशोधितायव्ययाद्विनागः कार्यःमनुः ऊर्ध्वविनागाज्जातस्तुपित्र्यमेवहरेद्धनम् संस्ट
ष्टास्तेनवायेस्युर्विनजेतसतैः सह विनक्तेषुजातःपित्र्यंधनमेवहरेत्तनात्तधनम् पितुर्ऋणंचा
दावेपित्रासहयेसंसृष्टास्तैः सहपितृनागेविनजेत जातइत्येकवचनमविवक्षितम् यदाहवृद्धहस्पतिः
पित्रासहविनक्तायेसापत्नावासहोदराः जघन्याश्चैवयेतेषांपितृनागहरासुते अत्रयदिपूर्वविनक्ता
नांमहान्नागः ज्यजघन्यानालुपितृनागमेवविनजेयुरुक्तामल्पस्मृतिंपूर्वविनक्तत्वात्तनागान्ते
ऋीक्षमितिसएवाह अनीशाः पूर्वजःपित्र्येत्तनागेविनक्तजःपुत्रैःसहविनक्तेनपित्रायत्स्वयम
र्जितम् विनक्तजस्यतत्सर्वमनीशाः पूर्वजाः स्मृताः यदातुनविनक्तजःकुतश्चित्सर्वंनेत्प्रकारेणाल्पमपि
विनागंलभन्ते तदात्तनागेपौत्रस्त्रीयादित्यर्थः विष्णुः पित्रविनक्तविनागंतरेत्यत्रस्वविनागंदद्युःप्र
कारांतरेणाविनज्यविशेषमाह पित्र्यांशंस्वयमुद्धृत्यतत्तस्यैवधनंनवेत प्राग्ध्वंवाविनागान्मात्रापित्रा
वायस्मैपुत्रायययत्पारितोषिकंदत्तंतत्तस्यैवनपुत्रांतरैर्विनाज्यमित्यर्थः नारदः शौर्यंनार्यांधनेचोने

Indira Gandhi National
Centre for the Arts

यज्ञविघ्राधनंनवेत् स्त्रीणेतानि विनाज्यानि प्रसादोयश्चैतत्कः मात्रा चस्वधनं दत्तंयस्मैस्वस्त्रीतिपूर्वकम् दत्त
स्याप्येषविधिर्दृष्टोमातायिष्टेयथापिता व्यासः पितामहेनयद्दत्तं मित्रावाप्रीतिपूर्वकम् तस्यतन्नापहर्त्तव्यं
मात्रादत्तंचपञ्चवेत् स्थावरयर्तुहासमाह नारदः मणिमुक्ताप्रवालानार्सवस्यहिपिताप्रभुः स्थावरस्यतु
सर्वस्यनपितानपितामहः पितृप्रसादाद्भुज्यैवलाभोपानरणानिच स्थावरंतुनभुज्येतप्रसादेपैतृकैस
ति किंतु पितुरूर्ध्वं विनजतोमाताप्यंससमं हरेत् पितुर्मरणादूर्ध्वं विनजतंपुत्राणांविनागेसमनागे माता
पितनेत् बहुवचनमविवक्षितम् तेनैकस्यसुतस्याप्योनागस्तावानेवमातुर्नवतीत्यर्थः मात
ग्रहणंतत्सपत्नीद्विप्रदर्शनम् व्यासः असुतानांपितुः पत्न्यः समानांशाः प्रकीर्त्तिताः पितामहश्चसर्वासा
मातृतुल्यः प्रकीर्त्तितः अतदस्त्रीधनविषयेमतद्वयं पुत्राणांविनजतांकार्यांतरमाह असंस्कृताश्चसंस्कृ
र्यान्नात्तनिः पूर्वसंस्कृतैः नगिन्यश्चनिजादंशाद्दत्वांशंतुतुरीयकम् येकन्यायांसोन्नात्तरःपित्राजातकर्मादि
नानसंस्कृतातेज्येष्टैः संस्कृतैःसंस्कार्याःनगिन्यश्चाकृतविवाहसंस्काराःकस्यपुत्रस्ययावानिजोंशस्तस्मा
च्चतुर्थमंशंप्रत्येकंप्रदायसंस्कार्याविवाहयितव्याः नारदः येषांचनकृताःपित्रासंस्कारविधयः क्रमात्तक
र्त्तव्यान्नात्तनिस्तेषांपैतृकादेवतेधनात् अविद्यमानेपित्रोस्वांशादुद्धृत्यवापुनः अवश्यकार्याः संस्का
न्नात्तृणांपूर्वसंस्कृतैः व्यासः असंस्कृतास्तुयेतत्रपैतृकादेवतेधनात् संस्कार्याःन्नात्तनिर्ज्येष्टैः कन्यकाश्च
यथाविधि मनुःस्वेभ्योंशेभ्यस्तुकन्याभ्यःप्रदद्युर्भ्रातरःपृथक् स्वात्स्वादंशाच्चतुर्भागंपतिताः सुरदित्सवः

अत्रापिस्वेभ्योंशेभ्यइतिपदद्वयंपुत्रांशमात्रविवक्षया बहुवचनंकन्यावहुत्वानिप्रायम् स्वात्स्वादिति
वीप्सानेकजातीयकन्यानिप्रायं एतदुक्तंभवति यदाब्राह्मणस्यसर्ववर्णेनासर्ववर्णेनार्यानुवति तस्मि
न्प्रत्येकंकन्यकाः संति तत्रब्राह्मणीयाकन्यकासाब्राह्मणस्यपुत्रस्यवानंशोभवति ततश्चतुर्थांशात्तनते एवं
चब्राह्मणस्यैवपितुः क्षत्रियादिकन्यकाः क्षत्रियादिसुतांशाच्चतुर्थभागग्राहिणइतिनचायंदायः ततश्चाहति
स्त्रीत्वंतुवक्तोयदुक्तंवोधायनेन नदायंविरिक्थिन्याणांताहताद्दायास्त्रियोमतोइतिश्रुतिरिति तेनसहास्या
विरोधः असवर्णानांदायविभागमाह चतुस्त्रिर्द्व्येकभागाःसुवर्णाश्चब्राह्मणात्मजा क्षत्रजास्त्रिर्द्व्येकभा
गाविड्जातुद्व्येकभागिनौ ब्राह्मणस्यब्राह्मणादिशूद्रजातासुचतसृष्वन्यासूत्पन्नानांपुत्राणांमध्येपितृधन
स्यदशधाविभक्तस्यचतुरोभागान्ब्राह्मणाःपुत्रागृह्णीयुः त्रीन्क्षत्रियायाः द्वौवैश्यायाः एकंशूद्रा
यां एवंक्षत्रियस्यापित्रिभक्तस्यषोढाविभक्तस्यत्रीन्भागान्क्षत्रियायाः पुत्रागृह्णीयुः द्वौवैश्यायाः एकं
शूद्रायां वैश्यस्यवित्तुर्धनंत्रैधाविभाज्यं तत्रद्वौभागौवैश्यायाः पुत्रान्गृह्णीयुः एकंशूद्रायां शूद्रस्यनास
र्वर्णेसिनार्यां अत्रविशेषमाह बृहस्पतिः नप्रतिग्रह्यंदेयाक्षत्रियादिसुतायवे यद्यप्येषांपिता
दद्यान्मतेविप्रासुतोहरेत् प्रतिग्रहणादुपायांतरप्राप्तत्वादीयैवसाविनशूद्रापुत्रायतयाचस्मृत्यांतरम्
शूद्रोद्विजातिर्जीतोनन्मेनागमर्हतियत्तुस्मरंति ब्राह्मणक्षत्रियविशांशूद्रापुत्रोनीरिक्थभाक्न यदेवा
स्यपितादद्यात्तदेवास्यधनंनवेदिति तत्पितृप्रसादलब्धधनेसतिविभागंप्रतिनिषेधतिअन्यथाशू

Indira Gandhi National
Centre for the Arts

द्रायुत्रंप्रतिविभागविधिरनर्थकः स्यात् विभजनीयेधने ह्यात्तत्पहे तेदृष्टेयत्कार्यंतदाह अन्योन्यापदतं द्रव्यं
विभक्तेयंदिदृश्यते तत्पुनस्तेसमैरंशैर्विभजेरन्निति स्थितिः विभजनीयंधनंकेनचिद्भात्रापदतंसद्विभाग
र्दृश्यघ्रुयलभ्यते तदातत्सर्वैः समैरंशैर्विभजनीयम् नत्वद्धारायेद्यावविषमैः एतावत्यर्थेप्रमितेवच
नमिदमुपपन्नमिति नापहर्तुर्दोषाभावंप्रतिप्रमाणतामुपैति अथोच्यते विभक्तारोब्राह्मणाविभज
नीयंसुवर्णंततश्चब्राह्मणसुवर्णापहारेपहर्तुः पतितत्वेसति तत्पुनस्तेसमैरंशैरितिवचनमनुपपन्नं
स्यात् पतितस्यानंशत्वादिति तत्रद्रव्यांतरविषयत्वेनवचनोपपत्तेः नचसामान्यविषयत्वेवचनस्य
विशेषोपसंहारोविरुध्यते नवतुब्राह्मणसुवर्णविषयमप्येतद्वाक्यम् तथापिनापहर्तुर्दोषाभावगम
यति प्रायश्चित्तेनव्यवहार्यस्यसतः समांसविभागविधानोपपत्तेः अथवापहर्तृव्यतिरिक्तविषयम् त
त्पुनस्तेशमैरंशैरित्यसुवचनम् नत्ववाच्यम् प्राग्विभागात्तन्नकस्यापीतियतउक्तंस्वमेवसाधारणंस
द्विभज्यते नविभागात्सत्वमुत्पद्यते इतिकात्यायनः प्रच्छादितंचयद्धनंपुनरासाद्यतत्समम् नजेरन्
भ्रातरिः सार्द्धमजावेद्विपितुः सुताः तथा अन्योन्यापदतं द्रव्यंदुर्विभक्तंचयद्भवेत् पश्चात्प्राप्तंविभजेयुत
समभागेनतद्भ्रुवः विभक्तस्यैवयत्प्राप्तंधनस्यैवतदुद्भवेत् दत्तंनष्टंचयल्लब्धंप्रायुक्तंचपुनर्नजेत्
प्रायुक्तंदुर्विभक्तमयदत्तंवा औरसपुत्रविषयोधनविभागउक्तः क्षेत्रजविशेषविषयमिदानीमाह अ
पुत्रेणापरक्षेत्रेनियोगोत्पादितः सुतः उभयोरप्यौरसपिंडदातृत्वाच्चधर्मतः प्रथमेध्यायेप्रतिपादि

तोनियोगोत्पादितः सुतः युवभ्रुवातइत्यत्रतेननियोगविधिनायोपुत्रेणदेवरादिनापरस्यांक्षेत्रस्यक्षेत्रे
नार्थायामुत्पादितः स्वार्थपरार्थंचद्वयोमुख्यायणसंज्ञकस्यउभयोर्बीजक्षेत्रिकयोर्दायहरः पिंडदश्चशास्त्रतो
वेदितव्यः यत्तुनारदेनोक्तम् द्वयोमुख्यायणक्षेत्रोदद्यात्तद्वयोपिंडदक्षैवधक्ष रिक्थादर्धांशमादद्याद्बीजि
क्षेत्रिकयोरसयोरिति तत्क्षेत्रजेजातेपश्चाच्चौरसोत्पत्तौसत्यांवेदितव्यम् कात्यायनः उत्पन्नेचौरसेपुत्रे
चतुर्थांशहराः सुताः सवर्णाअसवर्णासुद्वयासाच्छादननोजनाः ततश्चौरसेनुत्पन्नेक्षेत्रजः उभयोः पि
त्रोः सकलमेवरिक्थंगृह्णाति उत्पन्नेचचतुर्थांशापहृतधनस्येतिस्थितिः यत्तुमनुनोक्तम् षष्ठेतुक्षेत्रज
स्यांशप्रदद्यात्पैतृकाद्धनात् औरसोविभजन्दद्यादंपित्र्यंपंचममेववा तत्षष्ठंपंचमांशादानमल्प
गुणक्षेत्रजविषयम् तथा औरसक्षेत्रजौपुत्रौपितरिक्थस्यभागिनौ दशार्हरिक्थांशभागिनौ
नः तदौरसस्यानिर्गुणत्वेक्षेत्रजस्यचसाद्गुण्येवेदितव्यम् समंविभागान्निधानात् औरसक्षेत्रजपुत्रिकापु
त्रव्यतिरिक्तेषुदत्तसुपुत्रेसुजातेषु औरसोत्पत्तिर्यदिस्यात् तदौरसस्यैवसकलंरिक्थम् इतरेषांतुतद
र्हत्वमेवगोत्रंतुतेषामौरसस्यचरसमानम् नारदः क्षेत्रिकानुमतेवीजंयस्यक्षेत्रेप्रसिध्यति तदा
पत्यंद्वयोरवक्षेत्रिकबीजिकयोर्मतम् हारीतः जीवतेक्षेत्रजमाहुरस्वातंत्र्यान्मतेह्यामुष्यायणम् अनुज्ञावी
जत्वात् नावीजंक्षेत्रंफलति नाक्षेत्रंबीजंरोहति उभयदर्शनादुभयोरपत्यम् अनुज्ञबीजत्वादितिक्षे
त्रिकानुज्ञबीजत्वादित्यर्थः मुख्यजापुत्राणांहायविभागमनिधायगोत्रंनामनिधास्यंतेह्यलब्धाभिमु

Indira Gandhi National
Centre for the Arts

२ औ
या० व ३
अ० प

ब्यलक्षणपुरःसराणपाह औरसोधर्मपत्नीजस्तत्समःपुत्रिकासुतः क्षेत्रजः क्षेत्रजातस्तुसगोत्रेणेतरेण वागदेप्रच्छ
न्नैतन्नोगूढजस्तुतत्सुतःस्मृतःकानीनःकन्यकाजातोमातामहसुतोमतः अक्षतायांक्षतायांचाजातःपौनर्भवः
सुतःदद्यान्मतापितायंसपुत्रोदत्तकःस्मृतः क्रीतःसुतासंविक्रीतःकृत्रिमश्चस्वयंकृतः दत्तामातुस्वयंदत्तोगर्भेवि
न्नःसहोढजः उत्सृष्टोगृह्यतेयस्तुसोपविद्धःसुतोनवेत्ययोधर्मपत्नीजः सऔरसोज्ञेयः ययासहधर्मश्चर्यतेसा
धर्मपत्नीयद्यपिपत्नीशब्देनैवसहधर्मचारिणीकथ्यते तथापिधर्मशब्दोयदानादत्रपत्नीशब्दोनार्यामात्र
परः धर्मपत्नीशब्देनचशूद्रायावर्त्तते तस्यासहधर्मचारित्वाभावात् यदाहवशिष्ठः कल्पवर्णायावैवमा
सारमणायैवनधर्मोयेति एवंचतत्पुत्रोनौरसः अतएवपुत्रिप्रतिनिधिषुक्तमाह मनुः पुत्रादद्यादन्या
यानारुन्नणंस्वयमुत्पादयेन्मनुः तेषांषट्वंशदायार्हाःषडदायादबांधवाः औरसःक्षेत्रजश्चैवदत्तःकृत्रिमएव
चगूढोत्पन्नोपविद्धश्चदायादबांधवश्चयद् कानीनश्चसहोढश्चक्रीतिःपौनर्भवस्तथा स्वयंदत्तश्चरोदिश्च
षडदायादबांधवाः क्षेत्रजादिसुतानेतानेकादशयथोदितान् पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः
औरसान्नावेतत्कार्यक्रियालोपाद्धित्यतोमनीषिणः क्षेत्रजादीन्पेकादशपुत्रप्रतिनिधीनाहुरित्यर्थः यद्यपिश्रो
द्धेयः प्रतिनिधिस्तथापौरसेषुसत्स्वपितस्यदायग्राह्योस्तीति पूर्वमेवतद्विभागेउक्तम् अतएवयोगीश्वरः
प्रतिनिधिषुतं नोक्तवान्नचक्तव्यम् कथंतर्हदायादःशूद्रापुत्र इतिपित्राप्रसाददत्तेस्वधनेसतिदाय
विभागरहितत्वमुक्तं मनुनैव ब्राह्मणक्षत्रियविशांशूद्रापुत्रोनरिक्थभागिति अथचापितधनस्यद

शमादंशादधिकंदायंनलभते इत्येवंपरंतस्यदायादत्ववचनम् तदुक्तंमनुनैव यद्यपिस्यात्सुतपुत्रो
यद्यपुत्रोपिवानवेत् नाधिकंदशमादद्याच्छूद्रापुत्रोधर्मतइति अधिकंतुदशमादंशादानयत्तस्यधनंमपि
ज्ञानमेवेत्याह बृहस्पतिः अनपत्यस्यपुत्रेषुमृतेवान्यद्रयोनिजः लभेतजीवनंशेषंसपिंडःसम
मामुयुःप्रकृतमुच्यते ययाजातस्त्रीपरिणीतायांहिजातिस्त्रियामुत्पन्नऔरसःपुत्रः अन्वर्थसंज्ञाचैषा तेन
उरसिजातत्वेनचऔरसः तेनस्वोत्पादितत्वमौरसस्यलक्षणम् अतएवात्रिवसिष्ठः स्वयमुत्पादितः स्वदोत्रेसंस्क
तःप्रथमःप्रथमोमुख्यःतेनसएवपुत्रइ[illegible] दस्यमुख्योर्थः क्षेत्रजादिसुतोगौणः ततःपरिपूर्णमिद
मौरसस्यलक्षणम् औरसोधर्मपत्नीजइतिपदद्वयेनोक्तः तत्समस्तेनौरसेनसमसुल्यः पुत्रिकापुत्रः पु
त्रिकैवपुत्रःपुत्रिकापुत्रः साहिपुंस्त्वातिरिक्तौरसमलक्षणमुक्त्वाऽतएवौरससमा अतएवाहबृहस्पतिः
पुत्राश्चयोदशप्रोक्ताःमनुनायेनपूर्वजाः संतानकारणेतेषामौरसःपुत्रिकातथा आद्यंविनातयोस्तेनस
दृशःप्रतिनिधीःस्मृतम् तथैकादशपुत्रासुपुत्रिकौरसयोर्विना पुत्रिकायाःपुत्रोपिपुत्रिकाशब्देनोच्यते अ
तएवशिष्टः अन्यात्वांप्रदास्यामितुल्यकल्पामलंकृताम् अस्यांयोजायतेपुत्रःसमपुत्रोनविष्यति गौतमः
पितोत्सृजेत्पुत्रिकामनपत्योयिंप्रजायतिचेद्भूया अस्मदर्थमपत्यमितिसंकाद्यानिसंधिमात्रात्पुत्रिवेत्येषाम् त
त्संशयानोयत्नेनाज्ञात्वाम् जाबालः पुत्रिकायाः प्रदानेतुस्यान्नोयाकेन धर्मवित् त्र्यंप्रजायतिचेद्भूपु
त्रदानेतथैवच यस्यक्षेत्रेकलत्रेक्षेत्रस्वामिनासमानगोत्रेणेतरेणवासंबंधिनोत्पादितःक्षेत्रजसंज्ञकः

Indira Gandhi National Centre for the Arts

पुत्रस्वामिनो भवति यस्य गृहे नार्यां यः प्रजायते जायमानजनकविशेषउत्पन्नः सतज्जननीस्वामिनोगूढोत्पन्ननामा भवति पुत्रः अयंच स्वकार्यायां न्योगादित्तत्वेन क्षेत्रजतुल्यइति तदनंतरमुक्तः यस्मिन्नायामन्द्वयंजातः सकानीनसंज्ञकोमातामहपुत्रोमन्वादिसमतः अयमपिकथंचित्स्वसंबंधिनिदुहितरूपेक्षेत्रेजातइतिगूढोत्पन्नसादृश्यात्तदनंतरमुक्तः वशिष्टः अप्रत्तादुहितायस्यपुत्रंविंदेत तुल्यतः पुत्रीमातामहस्तेनदद्यात्पिंडंहरेद्धनम् यावादत्तानभवति सात्रापत्यप्रत्तेतिविशेषणात्प्रदानादूर्ध्वंप्राग्विवाहाद्भवतः कानीनोवोढुरेवभवति तदपिप्रायेणाह मनुः पितृवेश्मनिकन्यातुयंपुत्रंजनयेद्रहः तंकानीनं वदेन्नाम्नावोढुः कन्यासमुद्भवमिति अदत्तायांकौमारादिनार्यायांविधवायांविधवायांवास्वनार्यायां तुदत्तायांपरेणपुत्रायापुनः पुरिगत्यसंस्कृतायांयोजातः सगौनभवसंज्ञकः पुनर्नप्रथमेध्यायेकथितः एतेचत्वसंबंधेक्षेत्रोत्पन्नत्वात्प्रायः सन्नतयापूर्वमुक्तः क्षेत्रतोपिनास्तियेषांसंबंधइत्याह उच्यते तत्रयोमातापित्रोरेवमात्रावानर्त्रनुमतयायस्मैदत्तः सतस्यदत्तकोनामपुत्रोभवति मनुः मातापितावादद्यातांयमद्भिः पुत्रमापदि सदृशंप्रीतिसंयुक्तोसज्ञेयोदत्रिमः सुतः अद्भिरिति सकलदानधर्मोपलक्षणार्थम् आपदिदुर्भिक्षादौ अथवाएतीतरापदि सुतानावेसदृशंदातुर्ग्रहीतुश्चसवर्णत्वं प्रीतिसंयुक्तोजनयादि संयुक्तावित्यर्थः तथा गोत्रेऋष्यजनयितुर्नहरेद्दत्रिमः सुतः गोत्रस्त्रियानुगःपिंडोव्यपैतिददतःस्वधा ततश्चदत्तकपूर्वस्यपितुर्गोत्रेऋथंचमगच्छीयात् पिंडंच

स्मैनदद्यात् किंतुद्वितीयस्यैवपितुर्गोत्रादिग्राहकः पिंडदश्चभवेत् पिंडश्चक्षेत्रसकलोर्ध्वदैहिकोपलक्षणार्थः एवं कृत्रिमदत्तात्मायविरूपायसामान्यत्रयोदशविधंपुत्रंनिरूप्य तद्यवस्थावर्णक्रमेणाह त्रिलपुराणे दत्तकश्चस्वयंदत्तः कृत्रिमः क्रीतएवच अपविद्धश्चयोपुत्रान्नरणीयः सदैवहि जिन्नगोत्रःपतद्भपिंडः पथगेत्रकुलस्तथा सूतकेमृतकेचापित्र्यहारीचस्यजीगिनइति अथवत्तनिदर्शनावीक्षेत्रवत्तातथा शूद्रोदासः पारशवोविद्यानाविद्यतेक्वचित् राज्ञातुज्ञापदद्यानीनित्यंदासवत्तातया अयंसयामशीलानोकदाचिद्भवंति ते औरसोयदिवापुत्रस्त्वथवापुत्रिकासुतः विद्यतेनहितेषांकुविक्षेत्रजादयः एकादशएतेगोत्रेज्ञातेश्रुतिदर्शनात् शूद्रोदासवत्तस्तेषांकुर्वंतिनित्यशः गूढोत्पन्नश्चकानीनःसहोढःक्षेत्रजस्तथा यौनश्चभवश्चैवत्रयोनाराजदंडनयादपि वर्जित्वापंचवलिनः शेषाः सर्वेभवंत्यपि शूद्रानांदासवत्तीनांपरंपिंडोयजीविनाम् यतोयत्तशरीराणांनकश्चित्पुत्रइष्यते तस्माद्दासस्यदास्यश्चजायतेदासएवहि वशिष्टः शोणितःशुक्रः संभवः पुरुषोमातापितृनिमित्तकः तत्प्रदानविक्रयपरित्यागेषुमातापितरौप्रभवतः नत्वेकंपुत्रंदद्यात्प्रतिगृह्णीयाद्वा सहिसतानायपूर्वेषांनतुस्त्रीपुत्रंदद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः पुत्रप्रतिग्रहीष्यबंधूनाकुरुतेजनिचोदितेनिवेशातस्यमध्येव्याकृतिंनिकृत्वाहरेद्वाबंधवसन्निकृष्टमेवप्रतिगृह्णीयात् सदृक्षंचासन्नेहरेद्बंधवंश्रद्दमिनस्थापयेत् विज्ञायतेसेकेनवक्रुत्स्नायतइति नत्वेकंपुत्रंदद्यादितिददातिप्रदर्शनार्थः ते

Indira Gandhi National Centre for the Arts

२ जो
या० व
प्र० प

नाविक्रयादावप्ययं निषेधो न्यवति तथा पुत्रप्रतिग्रहीतृत्वस्यापि प्रदर्शनार्थत्वाद्बंधुनाद्दूयेत्पोदिध
मेजातक्रयादावपि कार्यन्यायसामान्यात् अदूरेबांधवायस्यसोदूरेबांधवः बांधवानामदूरदेशत्वेनतत्स्प
कुलीनताज्ञानाज्ज्ञातुम् तेनादूरेबांधवं विदितान्निजंनपुत्रंप्रतिगृह्णीयादित्यर्थः नपुनर्बंधुसन्निधौ
गृह्णीयादिति बंधूनाद्दूयेत्यनेनैवतत्सिद्धेः असन्निकृष्टमसम्बंधिनमेवप्रतिगृह्णीयात् ज्ञातिसंदे
हेचोत्पन्नेदूरेबांधवेव्यवहितदेशवर्त्तिबांधवंशूद्रमिवस्थापयेत् अनिश्चयात्मह तायत्नेननि
श्चयंकुर्यादितितात्पर्यार्थः अत्रहेतुत्वेनश्रुतिमुपन्यस्यति विज्ञायतेह्येकेनवद्भूत्वायतेइति एकेन
पुत्रेणावद्भून्पूर्वजांस्त्रायतइतितस्माज्ज्ञातानिजनमेवगृह्णीयात् नेतरमितितात्पर्यार्थः क्रीतना
मापुत्रोनवति योमातापित्रभ्यांक्रीतः प्राप्यते कृत्रिमसंज्ञस्तुपुत्रोनवति यःस्वयमेवत्वेमेपुत्रोभ्वे
तिपुत्रःक्रियते यस्त्वहंतेपुत्रोभवामीति आत्मानमेवाप्रार्थितोददातिसत्वयंदत्तसंज्ञकःपुत्रोभव
ति यस्तुपरिणीयमानायागर्भेविन्नोलब्धःसपुत्रःसहोढज उच्यते मनुःक्रीणीयाद्यस्त्वपत्यार्थंमाता
पित्रोर्यमितिकारात् सक्रीतकस्सुतस्तस्यसदृशोसदृशोपिवा सदृशोसदृशइतिगुणापेक्षंवचननजा
त्यपेक्षंसदृशंतुप्रकुर्याद्गुणदोषविचक्षणम् पुत्रपुत्रगुणैर्युक्तंसविज्ञेयस्तुकृत्रिमः अत्रसदृशग्रह
णंज्ञात्यपेक्षम् मातापित्रहिनोयस्यनोवास्यादकारणात् आत्मानंस्पर्शयेद्यस्मैस्वयदत्तसुसः स्म
तः त्यागकारणंपतित्वम् स्पर्शयेदद्यात् यागर्निणीसंस्क्रियते ज्ञाताज्ञाताविवासतीं बोढुःसगर्भेन

वतिसहोढइतिचोच्यते मातापित्रभ्यामुत्सृष्टःपतित्वादिकारणमंतरेणात्मनोयेनगृह्यते सत्वस्यायविद्वसं
स्कृःपुत्रोनवति मनुः मातापित्रभ्यामुत्सृष्टंतमोरन्यतरेणावायंपुत्रंप्रतिगृह्णीयादपविद्धःसउच्यते पि
तृदौहित्रश्चैषांपूर्वोनावेपरःपरःएषामुक्तानामौरसादीनामुत्तमोत्तमःपुत्राणांमध्यपूर्वस्यपूर्वस्यात्
वेउत्तरउत्तरःश्रुतदाने चाधिक्रियते पुत्रप्रतिनिधीनांमध्येदौत्रजएवकलियुगेयाथः अतएवकलौ
निवर्त्ततइत्यनुवर्त्तोशौनकेनोक्तम् दत्तौरसौतरेवांतुपुत्रत्वेनपरिग्रहइति यदातुपुत्रिकायांकृतायां
मौरसोजायते तदाहमनुः पुत्रिकायांकृतायांतुयदिपुत्रोनजायते समस्तत्रविभागःस्याज्ज्येष्ठतानो
स्तिरस्त्रियाः क्षेत्रजंप्रतिविशेषमाहमनुरेवयद्यपुत्रिकायांनोत्पन्नोस्यात्तामौरसक्षेत्रजौसुतौ यद्यप्येतत्कारि
कयंतत्सगृह्णीतनेतरः एतत्क्षेत्रजस्यकानुख्यायणस्यावीजिधर्मेधिकारीत्वंविधत्ते वसिष्ठस्तुदत्तकेपु
त्रेसतिऔरसोत्पन्नोविशेषमाहतस्मिंश्चेत्प्रतिगृहीतेऔरसः पुत्रउत्पद्यते चतुर्णांगोत्रांस्यादिति सर्वेच
न्यूनाधिकभागविकल्पाः मनुप्रभृतिर्निगुणाःपेक्षयाव्यवस्थापनीयाः सर्वेषांचपुत्रप्रतिनिधीनांपूर्वोनावेपरे
षांदायहरत्वेसत्यपिकेचिद्दायादाःकेचिन्नेति यदुच्यतेन्वादितिसत्रायमनिप्रायः पित्रसपिंडस्यापु
त्रदायहारिणस्तएवपुत्रप्रतिनिधयोभवंति येदायादत्वेननिर्दिष्टानेतरेइति सर्वेषामेवपूर्वोक्तानां
पुत्रप्रतिनिधिलक्षणानांशेषमाह सजातीयेष्वयंप्रोक्तस्तन्नयेषुमयाविधिः शूद्रोत्पन्नादयआत्मनःस
जातीयाएवसवर्णाएवपुत्रत्वेनयाःप्रोक्तानेतरइतितात्पर्यार्थः शूद्रापुत्रः स्वक्षेत्रेस्वयमुत्पादितश्चेतिनप्र

Indira Gandhi National Centre for the Arts

तिनिधिः किंतोरसः तथापिप्रतिनिधिषुननुनापठितस्तत्रायमनिप्रायः अन्येष्वनुलोमजेष्वौरसेषुसत्सुनप्र
तिनिधिरस्ति शूद्रपुत्रत्वौरसेसत्यपिपुत्रप्रतिनिधिःकार्यएवेति मनुः यद्यपिस्यात्सुतोपिवानवेदना
धिकंदशमादद्याच्छूद्रापुत्रायधर्मतः अपुत्रस्यदशमादूर्ध्वादधिकंपत्न्यादयोगृह्णीतयर्थसिद्धम् जा
तोपिदास्यांशूद्रेणक्रामतोग्रहरत्नवेत् मतेपितरिकुर्युस्तंन्नातरस्वंधनागिकम् अन्यातोहरत्सर्वंदुहि
तृणांसुताहतेशूद्रेणदास्यामुत्पन्नः पितुरिच्छातोग्रहरत्नवैपितायावंतमंशंदात्तुमिच्छतितस्मै तावं
तस्यनवतीत्यर्थः मतेजनन्यांपरिणीतापुत्रास्तदीयान्नातरः एकस्ययावान्नागेनवतितदर्धंदद्युः अन्या
त्तत्कन्यापरिणीतोत्पन्नान्नातरहितोदौहित्रैश्चसत्सुसर्वंपित्र्यंहरेत्सत्सुत्वनागार्धमेवअतःशूद्रयहणादि
द्विजोत्पन्नस्यदासीपुत्रस्यपितृधनंग्रहरत्वंनास्तीतिगम्यते पुत्रतत्प्रतिनिधिरहितस्यमृतस्यमृतस्यधनंना
ज्ञांक्रममाह पत्नीदुहितरश्चैवपितरौभ्रातरस्तथातत्सुतागोत्रजोबंधुशिष्यसब्रह्मचारिणः एषांनाद्यपूर्व
स्यधनंनाद्युत्तरोत्तरः स्वर्यातस्यसपुत्रस्यसर्ववर्णेष्वयंविधिः अपुत्रस्याविद्यमानमुख्यगौणपुत्रस्यस्वर्यात
स्यधनंनाद्यधनग्राहीपत्न्यादीनांक्रमेणनिर्दिष्टानांपूर्वस्यपूर्वस्याभावेउत्तरउत्तरोवेदितव्यः एषाचविधिः
सर्ववर्णसाधारणः वृहस्पतिः भ्रातरोसंसृष्टितंत्रेसतोवाचास्वस्रादिनिः शरीरार्धंस्मृतंभार्यापुण्यापुण्यफलेसमा
यस्यनोपरतंभार्यादेहार्धंतस्यजीवतिजीवत्यर्धशरीरेर्धंकथमन्यः समाप्नुयात्न सकुल्येविद्यमानेस्तुपितृभ्रात्रसनाभिनिः अपुत्रस्यप्रमीतस्यपत्नीतद्गोत्रहारिणी पूर्वंमृतात्वयिहोत्रंमृतेभर्तरि

तद्व्रतमविदेत्यतिव्रतानारीधर्मएषसनातनः जंगमंस्थावरंहेमरूप्यधान्यरसांवरम् सादात्प्रदायपेत्नार्द
मासषाण्मासिकादिकम् पितव्यसुतौदौहित्रान्भर्तृस्वस्रीयमातुलान् पूजयेत्कथंपुनर्भूत्वंवरुनाप्रति
षेधीनस्त्रियः तत्संपिंडाबांधवाश्चयेतस्याः परिपंथिनः हिंस्युर्धनानितान्राजाचोरदंडेनशासयेत् वि
ष्णुः अपुत्रस्यधनंपत्न्यनिगामितदभावेदुहितृगामि तदभावेपितृगामि तदभावेसकुल्यगामि तदभा
वेबंधुगामि तदभावेसहाध्यायगामि तदभावेब्राह्मणाधनंवर्जंदाजगामि वृहस्पतिः मृतोनयत्नोनार्या
चेदभ्रातृपितृमातृकः सर्वेसपिंडास्तद्धनंविभजेरन्पत्न्यांजातः शेषः पुनरन्यथाक्रममाह अथापुत्रस्य
स्वर्यातस्यभ्रातृगामिद्रव्यं तदभावेमातापितरौलभेतेतिपत्नीवाज्ञापयेदिति देवलः ततोदायमपुत्रस्यवि
भजेरन्सहोदराः तुल्यादुहितरोवापिध्रियमाणाः पितापिवासवर्णोभ्रातरोमातानार्याचेतियथाक्रममि
ति नारदोपि भ्रातृणामप्रजसांप्रयान्तंकश्चिच्चेत्तत्रजेत्वा विभजेरन्धनंतत्पत्नीसेस्त्रीधनंविना न
राणांचास्यकुर्वरिन्स्त्रीणांजीवितक्षयात्परतोतिशयंभर्तुश्चेदाकिंचिदितरासुतत्तथाअन्यत्रभ्रातृ
णान्किंतुराजाधर्मपरायणः तत्स्त्रीणांजीवनंदद्यादेषदायविधिः स्मृतइति एवमेषावाक्यानामायात
तः प्रतिभासमानविरोधानांविरोधपरिहारेणप्रामाण्यसिद्ध्येनिबंधविषयतावाच्यातत्रकेचिदाहुः या
देवरादन्यस्माद्वासपिंडाद्वृतश्चसुरादिवचनात्पुत्रमिच्छंतिं तद्विषयपत्नीदुहितरइत्यादिवचनमृ
तितदयुक्तम् दुष्परिहरोहिविकल्पतरस्मृत्यंतरविरोधोत्रतथाहिरिक्थलोभान्नास्तिनियोगइतिवसि

Indira Gandhi National Centre for the Arts

ष्टः अनेनहि रिक्थग्राहिणोनियोगानधिकारउच्यते ननुमान्नक्तस्मान्नियोगः पूर्वमेवनियुक्तायाःपश्चाद्
नग्नात्वंपत्नीदुहितरइत्यनेनविधीयतामतदसत् तथाहिसति तेनैवजानिष्यमाणेनदौहित्रेनपुत्रे
णधनस्वामिनोतीनस्यपुत्रवत्त्वंस्यात् अपुत्रस्यधनंपत्नीभजतेइतिपत्नीदुहितरइत्यादिनाविधी
यते अतएवाहमनुः धनंयोविन्दत्याद्यसुर्मतस्यस्त्रियमेववासोपर्यन्नातुरुत्याद्यदद्यात्तस्यैवतद्ध
नमिति तस्यैवतत् ननुतज्जनन्याइत्यर्थः संस्थितस्यानपत्यस्यगोत्रान्नेतुसमाहरेत तत्रयोरिक्थ
ग्राहिः स्यात्तस्मैप्रतिपादयेत्तत्तस्मैतत्रैवेअपत्यायेत्यर्थः तच्चनियोगार्थित्वंरिक्थग्राहित्वे विरुद्धात्क
थमिवहेतुःविरोधमेवगोतमः स्पष्टयति पित्र्यंगोत्रार्थसंहृतारिक्थंनजेत्र स्त्रीवानपत्यस्यबीजंवानि
येतेति अनेनाप्यनपत्यन्नर्तुधनग्राहित्वस्यबीजनियोगार्थित्वस्यचविरुद्धः प्रतिपाद्यते अतः
स्पष्टोविरोधः वक्ष्मनुरपि अपुत्रायांनर्तुः पालयतीन्नतेस्थिता यन्त्येवदद्यात्तिंडंक्तमंशंलभेतेति
चेतिवदन्नियोगार्थिन्यानासिरिक्थग्राहित्वमितिस्पष्टयति तथाहिसतिनर्तुः क्षयंपालयंतीतिनवाच्यं
स्यात् तस्मान्नेयव्यवस्थायुज्यते कथंनहिविरोधपरिहारः अपुत्रायांनर्तुरित्यादिमनुवाक्योक्तयुक्ता
पत्नीपित्रान्नापित्रान्नासङ्गवेपित्र्यमेवपतिधनंसमग्रंगृह्णाति यत्पुश्चश्राद्धादिकरोति अनेनैवानि
प्रायेणवहस्यतिनाप्युक्तम् पितुःपुत्रेणकर्त्तव्यापिंडदानोदकक्रिया पुत्राभावेतुपत्नीस्याज्जदभावेतु
मोदरइति तथा यापितृधनानुपघातेस्वयमर्जयितुः नर्तुःपरिचर्यायथावत्कृतवतीसंयतेंद्रियाचसा

नर्तुः सकलमेवधनं देवरेषुविद्यमानेष्वपिगृह्णाति यातुतारुण्यादिनासंभावितव्यभिचारा तस्यांविद्यमा
यामपिमातरस्यांनर्तुरीतगम्यवर्त्तते ननुपत्नीगमि तत्रापिचैषाव्यवस्था यदितज्जातनिःस्पित्र्य
नाउपघातेनमेनूपसमुत्थानेनधनमर्जितंतदापित्र्यांसङ्गवेपित्रातरएवधनंगृह्णीयुः यदानुपित्र्य
पितामहाद्युपार्जितधनंतदानर्तुर्धनंनागित्वम् किंतुपित्र्यांरिति एवंचविषयव्यवस्थायांसर्व
वाक्यावरोधः नचवाच्यम् एकाकिनीस्त्रीयत्तेनधिकृताःकथंयज्ञार्थंतयोत्पन्नंगृह्णीयादितिसर्वस्या
एवधूनोत्पत्तेर्यज्ञार्थत्वेप्रमाणाभावात् यैवहिदर्शपूर्णमासदीक्षितोभवतीत्येवमादिवचनविहि
ताःसर्वधनोत्पत्तिःकिलार्थी अन्यथानुपुरुषार्थैव यदपिचार्थवादवचनंतस्मात्स्त्रियोनिरिंद्रियाद्रि
दायादाइतितदपियथाप्राप्तिवचनीयमनुवादकत्वादिति पुत्रसङ्गविषयत्वेनव्याख्येयम् अस्तिच
स्त्रीणामेकाकिनीनामपिधूर्त्तधर्माधिकारस्तेनतत्रधनंताउपयोक्ष्यंते यत्तुनारदेनोक्तम् नात्रृणांमप्र
जःप्रेयादित्यनिधायोक्तम् नरणंवाश्रयेद्वीरस्त्रीणामाजीवितक्षयादित्यादि तत्पुनर्नर्तुस्थिरेणादिविष
यंवेदितव्यम् स्त्रीशब्दमात्रप्रयोगात्पत्नीशब्दस्तुविवाह्यसंयोगिन्यामेववर्त्तते पत्युर्नोयज्ञसंयोग
इतिचादस्मृतेः एवंपत्न्यामसत्यांपितृसमानवर्णादुहितरोपुत्रधनस्वामिन्यः नारदः पुत्राभावेतुदुहि
तानुल्यसंतानदर्शनात् पुत्रश्चदुहिताचोभौपितुः संतानकारकौ तथा यथैवात्मातथापुत्रःपुत्रेण
दुहितासमा तस्यामात्मनितिष्ठत्यादथमन्योधनंहरेत वहस्यतिः अंगादंगात्संभवतिपुत्रवदुहितानृ

Indira Gandhi National
Centre for the Arts

णाम् तस्यापितद्धनेल्पःकथंगृह्णीतमानवःसदृशीसदृशेनोढासाध्वीस्त्रक्षणेरतादृताकृतावापुत्रस्यपि
तुधनहरीतुसा सदृशीसवर्णा अतोसवर्णीयादुहितुरनधिकारोधनग्राहित्वेदृताकृतापुत्रिकेत्यर्थः
अत्रचकृताकृतावित्यनेनयुत्रिकादृष्टादृष्टंततयोपादीयतेनपुनस्तस्याअपुत्रपितृधनग्राहित्वंवि
धीयतेनहिपुत्रइतिवाक्यतेवक्तुम् पुत्रिकायाश्चपिपुत्रत्वंतथाचवशिष्टःतृतीयापुत्रिकाविज्ञायते
इति एतेनयदुक्तंकेनचित्यतीदुहितरइत्यत्रदुहित्रादिनापुत्रिकोच्यतेइतितन्निरस्तंवेदितव्यम्मा
ताचपिताचपितरौतेपुत्रस्यपत्न्यादुहित्रनिश्चरहितस्यधनग्राहिणौ वहस्पतिः नार्यासुतविहीनस्य
तनयस्यमृतस्यतुमातारिक्थहरीस्मृता नातावातदनुज्ञायामनुः अनपत्यस्यपुत्रस्यमातादायमवा
प्नुयात् मातर्यपिचवृत्तायांपितुर्माताधनंहरेत्पित्रोरभावेभ्रातरः तेनुसोदराएवप्रत्यासन्नतरत्वा
द्न तेहिमृतभ्रात्रपेक्षयैकस्यमातृवर्गस्यग्राहकारिणोनतुसापत्नाः यत्तुशंखलिखितपैठीनसिव
चः अपुत्रस्यस्त्रीतस्पत्नीतद्गामिधनंतदभावेमातापितरौतदभावेपत्नीवाज्येष्ठेत्यादितत्पित्र्यधनातु
यघातेनार्जितविभक्तधनेषुद्रष्टव्यम् तादृशभ्रातृभावेचपितरौज्येष्ठावापुत्नी उक्तलक्षणभ्रातृविल त
क्षणासुभ्रातरोयाश्चवत्स्योक्तक्रमातिक्रमेणरिक्थभाजोमन्तव्यइतिसर्वमविरुद्धम् यदपिदेवलेनो
क्तम् ततोदायमपुत्रस्यविभजेरन्सहोदराः तुल्यादुहितरोवापिध्रियमाणः पितापिवा सवर्णाभ्रा
तरोमातानार्यचेतियथाक्रमम् तत्रापित्रोरवचनव्यवस्थाप्रकारेणसोदराणांपूर्वंदायग्राहित्वं

ज्ञातव्यम् भ्रात्रभावेतत्सुताः तदभावेगोत्रजाः तत्रप्रत्यासन्नः पूर्वंधनभाक् यदाहमनुः अनंतरःस
पिंडाद्यस्तस्यतस्यधनंतदवेत इति अनंतरत्वंचतेनैवोक्तत्रयाणामुदकंकर्थत्रिषुपिंडः प्रवर्त्ततेच
तुर्थःसप्रदातेतिपंचमेनोपपद्यते संप्रदानकारकीभूतानोपित्रादीनांत्रयाणांयउदकादिदातायश्चत
स्रस्ततिस्रोत्योपितेषामेवोदकादिदातासतस्यप्रत्यासन्नः सपिंडः तदभावेदशेभ्रातृतिरायेनप्रत्या
सन्नः समानसंप्रदानोदकादिदातृत्वात् तत्सुतः पुनरीषद्व्यवहितः पित्रपिंडसंप्रदानान्यत्वात्ततो
भ्रसुततोपिव्यवहितः पितृपित्तामहपिंडयोर्भिन्नसंप्रदानकत्वात् ततोभ्रातृत्वत्यक्तव्यव्यवहितःपिंडत्रये
पिसंप्रदाननेदात् एवंभ्रातृतत्सुतः ततोभ्रातृइतिपितृसंततोभ्रयः प्रत्यासन्नाः सपिंडाः एवंपितामहसं
ततौप्रपितामहसंततौच एषामभावेपित्रादित्रयस्यये प्रपौत्रास्तेषांपुत्रादित्रयसापिंडाद्धनयात्क
म् गोत्रजाभावेवेधुः पितृष्वसामातृष्वसामातुलसुतादिः तदभावेशिष्यः उपनीयवेदमध्यापितोधन
भाग्यवतितदभावेसब्रह्मचारी एकाचार्यकः यतुक्रत्यायनेनोक्तम् विनष्टेसंस्थितेद्रव्यपुत्राभावे
पित्तारहरेत्भ्रात्रभावाज्जनीवाद्यमातावातत्पितुःक्रमात् इतितत्पुत्राभावेइत्येतत्प्रदर्शनार्थम् तेनप
त्न्यादुहितृणामभावेइतिचद्रष्टव्यम् पितुरभावेभ्रातामात्रानुमतः अननुमतेनवामातैव मातरिक्थ
हारीत्येमा भ्रातावातदनुज्ञयेतिवचनात् एषामभावेमातृष्वसृदौहित्रानंतरम् वहस्प
तिः तदभावेभ्रातरस्तुभ्रात्रपुत्राःसनाभयः सकुल्यावाधवाःशिष्याश्रोत्रियाश्चधनहाकाः नारदः भ्र

Indira Gandhi National
Centre for the Arts

नावेचदुहितृणांस्युत्पावोधवास्तथा ततःसजातयः सर्वेषामनावेराजगामितत् अन्यत्रब्राह्मणात्किंतुराजा
धर्मपरायणः तत्स्त्रीणांजीवनंदद्यादेषदायविधिस्मृतः अत्रानावेदुहितृणामितिपित्रोरप्यनावउक्तस्य
तेततस्त्रीणामपरिणीतानांचैरिणीनांपुनर्भूनांवा सर्वेषामप्यनावेदुब्राह्मणारिक्थहारिणः त्रैविद्याःश्रुच
योदातास्तथाधर्मान्नहीयते अहार्यंब्राह्मणद्रव्यंराज्ञानित्यमितिस्थितिः इतरेषांतुवर्णानांसर्वेनावेह
रन्नपः नयोजनपदस्यनात्तः बृहस्पतिःयेऽपुत्राःक्षत्रविट्शूद्राःपत्नीनात्तविवर्जिताः तेषांधनहरोरा
जासर्वस्याधियतिर्हिसः पैढीनसिः परिषद्गामिवाप्त्रैत्रियद्रव्यंनराजगामि नहार्यंराज्ञादेवतागणसंस्थितम्
ननिक्षेपोपनिधिक्रियाक्रमागतंनवालस्त्रीधनान्येवंह्याह नहार्यस्त्रीधनंराजातथाबालधनाधनिच नार्या
षडागमंवित्तंवालानांपैतृकंधनम् स्मृतिः योयतआवदीतसतस्मैप्राङ्मृतायैत पिंडंचत्रिपुरुषंदद्याद
इतित्रिपुरुषमित्यमावास्याश्राद्धनिप्रायम् विष्णुः पुत्रःपितृवित्तालाभेपिंडंदद्यात पत्नीदुहितरइत्य
त्रनावेकेचित्पर्यनुयुंजते यथास्त्रियाःसन्नर्त्तृकायाःएतेषांपर्त्तृयोरधिकारः नतुकेवलायास्तस्यानर्त्तर
हितत्वादेवचतयानकामः सेवनीयः किंतुतपस्वीव्रतंचधर्मकामयोरुपयुज्यमानोदोनवतिपु
रुषार्थः तस्मात्पित्राषुदिधर्मकामोपयोगिधननाज्ञनेषुसत्सुनपत्याधननात्तइयुक्तम् तस्मादपुत्रस्य
मृतस्यधनंपत्नीनिर्वाहमात्रसमर्थमादद्यान्नाधिकंतद्विषयंपत्याधननात्तवचनम् यस्यतुपत्नी
रहितस्यधनंविवाहमात्रंयर्याप्तंतद्विषयंदुहितृणांधनग्राहित्वमनेनोच्यते अतोधिकस्यमृतस्यधनस्या

स्यपत्नीदुहितरसत्वेपितृपितामहाःपित्राद्यएवग्राहकाःश्रोत्रादिवाक्यसामर्थ्यात्सत्वतीतिमंतव्यमितियदुक्तम्अध
नत्वामिनःप्रमयेसतितत्रनेत्यस्यस्वामित्वोत्पत्तौविधेयायोयथाहन्नगवाम् पत्याद्युहितृणांस्वामित्वात्प
नैवनत्पाद्या पाणिग्रहणाद्धिसहस्वमित्यादिनायसंबंधेनस्त्रीणांस्वामित्वंपाणिग्रहणएव
साध्यतीतिविधीयतेदुहितृणांतुपुत्रवज्जन्मनैवपितृधनेस्वामित्वसिद्धिरितिवेदितव्यम् ततश्चप
त्यांदुहितरिसत्यांतस्याःस्वामित्वंबाधित्वा पित्रादिस्वामित्वविधिरनेनवाक्येननकार्यः अनावेदुह
तीदुहित्रोर्बाधनिरपेक्षंविधायकत्वमस्येतिवैरूप्यमायघते ततस्तर्यरिहारार्थंपत्याद्यनावएवपित्रादी
नांबाधनात्तत्वमिहप्रमेयम् यत्तुश्रोत्रादिभिःपित्राद्यनावेपत्याधनग्राहकत्वमुच्यते तत्कारणांतरेण
नर्त्तृधनेयस्याधिकारादिपदास्पदस्वामित्वमवेतंतद्विषयंद्रष्टव्यम् उक्तंचकारणांतरम् हृताधिकारामलिना
मित्यत्रनर्त्तृधनेपत्याःस्वामित्वंत्रश्रोत्रंप्रतितस्मादुक्तवेवव्यवस्थायुक्तायदुक्तम् स्त्रीणांस्वनिर्वाहसमर्थाद
धिकोर्थोनिरर्थकइति तदपिनैवयुक्तम् उक्तहि स्त्रीणामन्नात्तरणांमंत्रामिसाध्यधर्मादन्यत्रधर्मेदाना
दावस्यधिकारइति तेनस्वनर्त्रीपयुज्यमानेर्थेत्तासामुपयोगःअथमृतस्यव्यतिरिक्तानामाश्रमिणांपरेता
नांधनग्राहकास्तत्रमकानाह वानप्रस्थयतिब्रह्मचारिणांरिक्थभागिनःक्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेक
तीर्थिनःवानप्रस्थादीनामन्यतमस्यामृतस्यरिक्थमाचार्यादयःक्रमेणगृह्णीयुःपूर्वस्यपूर्वस्यानावे
उत्तरउत्तरोगृह्णीयादित्यर्थः सब्रह्मचारीशिष्यःसच्छिष्यःधर्मभ्रातासमानाचार्यःएकतीर्थीएकस्मि

Indira Gandhi National Centre for the Arts

२ ऊं
या०व
अ०प

क्षेत्रतः एकवाराणसीप्रवृत्तितीर्थनिवासीवावानप्रस्थधनमस्तीतिवचनात् त्यजेदाश्वयुजेमासि उत्पन्नंपर्व
संचितमिति अमाऽन्यते यतिब्रह्मचारिणोरपिकथादिकिंचिदस्त्येव अपुत्रस्यतु भ्रातुःपत्नीदुहितृणां
पित्रोश्चानावेभ्रातृणामवतीपुक्तम् तत्र विशेषमाह संसृष्टिनस्तुसंसृष्टीसोदरस्यतुसोदरः दद्यादप्रहरेच्चां
शंजातस्यचमृतस्यच अन्योदर्यस्तुसंसृष्टिनान्योदर्यधनंहरेत् असंसृष्टापिचादद्यात्सोदर्यो नान्य
मातृजः विभक्तधनस्यविभक्तेनैवधनांतरेण मिश्रणंसंसर्गस्तद्वान्संसृष्टी तस्यमृतस्यधनंसृष्ट्वै
वभ्रातृहरेत् भ्रातरंसोदरंविनापुनरन्योदर्यः संसृष्यपिसंसृष्टिनस्तुजातस्यतन्मातृणोत्तरकालमु
त्पन्नस्यपुत्रस्यतद्भागंतत्पुत्रायजीवन्संसृष्टीदद्यात् एतच्चात्रप्रसंगादुक्तम् अत्रवक्ष्यतिः विभक्तो
यःपुनःपित्रोर्भ्रात्रा चैकत्रसंस्थितःपित्र्येणापवाप्रीत्यातत्संसृष्टः सउच्यते अनेनत्रिविधाः संस
ष्टिनोभवंतित्यनुघटतेतेषांमध्यादपुत्रस्यपत्न्यादिसद्भावेतद्विपर्ययेतिजिज्ञासायामाह यदाभ्रष्टि
स्त्रमीयेतप्रव्रज्याक्लीबपतितचनःनतुच्यतेतस्यभागः सोदरस्यविधीयतेयात्तस्यभगिनीमातुस्ततोशंलभे
मर्हति अनपत्यस्यधर्मोयमार्यपित्तकस्यचेति अतश्चसंसृष्टिनोपियदिपत्न्यादयः संतितदापे
तीदुहितरइत्ययमेवपक्षः यत्रभ्रातृणांरिक्थग्राहित्वेप्राप्तेसंसृष्टसोदरत्वसंभवेतद्विसृष्टस्यैवभ्रा
तुर्धनंभ्रातृकंनियम्यते भगिन्यासोदरः भ्रात्रभावेधिक्रियतामितिवा अन्यथातस्मान्निरिंद्रियाक्लियोद
यादाइतिश्रुतिविरोधःस्यादितिउक्तमेतत्संसृष्टिनोमृतस्यांशंसोदर्यः संसृष्टीहरेदिति एतदेव

व्यतिरिक्तःस्पष्टयितुमाह अन्योदर्यसुसंसृष्टिनान्योदर्यांशंहरेत् निगदव्याख्यातमेतत् यदापुनरन्यो
दर्यः संसृष्टीनसोदरश्चेत्तदाकोंशंहरइत्यपेक्षायामाह असंसृष्टापिचादद्यात्सोदर्यो नान्यमातृजः सो
दर्योविद्यतेसंसृष्टीतथापिसएवाददीतनपुनरन्योदर्यः संसृष्टापि अन्योदर्यत्वसंसृष्टित्वविशेषणम् अ
संसृष्टापि इतिशब्दाद्गम्यते तेनायमर्थःसिद्धःयदिसोदरत्वंसंसर्गित्वंचविद्यते तदासएवतांशंहरे
त्यंशंहरति यदापुनःसंसृष्टित्वमन्योदर्यस्य तदासोदरत्वेनिमित्तं नेतरदिति मनुः विभक्ताःसहजीवंतो
विभजेरन्पुनर्यदिसमस्तत्रविभागः स्यान्न ज्येष्ठस्तत्रविद्यते अनेनज्येष्ठनिमित्तविभागंवैषम्यंनिषिध्यते
नान्यनिमित्तेतेनसंसर्गसमयेयदीयंयावद्धनंसंसृष्टं विभागसमयेतदनुसारेणैवभागंकल्पन्ते अत्रैवविं
शेषांतरमाह बृहस्पतिः संसृष्टिनोतुयः कश्चिद्द्विधाशौर्यादिसाधनम् प्राप्नोतितस्यदातव्योंशः शौ
र्यात्समांशिनःमनुः येषांज्येष्ठकनिष्ठोवाहीयेतांशप्रदानतः म्रियेतान्यतरोवापितस्यभागोनलुप्यते सो
दर्यैर्विभजेरंस्तेसमेत्यसहिताःसमम् भ्रातरोयेचसंसृष्टाभगिन्यश्चसमांशयः अंशप्रदानंविभागः त
तोहानिपारिक्ष्यंपतितादि नाधिकारः तस्यभागोनलुप्यतेकल्पनीयइत्यर्थः तंभागंसोदराःयदिसंसृष्टा
स्तदातेनवर्तेरन्पुनर्संसृष्टाः सोदर्याअपि संसृष्टिनोसोदराणामभावेसर्वेसोदराः समेत्यमिलित्वासहि
ताःसमंप्रधानाभावेनसमंनूनाधिकंविभजेरन् सोदराणामभावेभगिन्यः समांशयः सोदर्याविभजेर
न्निति शेषः तासमप्यभावेअन्योदर्याभ्रातरः सर्वत्र विभागेधिकतामाह क्लीबोधपतितस्तज्जःपंगुरुन्म

Indira Gandhi National Centre for the Arts

(98+1)
३ जी
या० व
अ० प

त्तकोजडः अंधो चिकित्स्यरोगाद्यैर्नार्ह्या व्यासु निरंशकाः स्त्रीवाद्यनिरंशकानर्ह्या वा अंशोनाम स्वदृहिताः कार्यः केवलं
तुनार्ह्या व्याधेस्तवति स्त्रीवः पंगुः पतितोवदृश्यते ततितोत्पन्नः तस्यव्यंगपतितोत्पन्नयोर्ग्रहणे नैवग्रहणंसिद्धम्
उक्तंवशिष्टेनपतितेनोत्पन्नः पतितोनवर्तीत्याऽऽहुरिति तथापितस्यपरंग्रहणंकार्यम् अन्यथा औरसक्षेत्र
जास्तेषामितिवाक्यवलाद्भागार्हतास्यात् पंगुश्चरणरहितः उन्मत्तकउन्मादीउन्मादोरोगविशेषः जडोमूढः
अंधोचक्षुः अचिकित्स्यरोगः अप्रतिसमाधेयव्याधिः आद्यशब्दः शास्त्रांतरोक्तानांनग्नादीनांसंग्रहार्थः त
त्रनारदः पित्रर्द्धिंहरतितः शंढोयश्चस्यादौपपातिकः औरसाअविनेतेशीलनेक्षेत्रजाःकुतः पित्तर्द्धिंपित्तर्द्धे
क्षौउपपातकमुपपातः तद्युक्तऔपपातिकः मनुः सर्वएवविकर्मस्थानार्हतिज्ञातरोधनम् दीर्घतीव्राम
यस्तजडोन्मत्तोंधपंगवः अनंशोस्त्रीवयतितो जात्यंधवधिरावपिउन्मत्तजडमूकाश्चयेचकेचिन्निरिंद्रि
याः वसिष्टः अनंशास्त्वभ्रातरोभगिन्यःपेत्रमाभ्रातरस्त्रस्कात्यायनः अक्रमोढासुतश्चैवसगोत्रा
द्यश्चजायतेप्रव्रज्यावसितश्चैवनरिक्थंतेषुचार्हति अक्रमेणवर्णक्रमजन्मक्रमातिक्रमेणयाऊढातस्या
सुतः अक्रमोढासुतःसगोत्रास्त्रपेत्रयासमानगोत्रात्परिणेतुर्योजायते तेषांचवाचनिकमंशार्हत्वंन
पुनर्धर्मानधिकारित्वहेतुकम् धर्मानधिकारितायाहेत्वभावात् यद्यपिपतितस्यधर्मानधिकारस्तथाम्ल
धपंग्वादीनांतेषामवेक्षणाद्योगवत्त्वेवधर्मविशेषेनधिकारः नसामान्यतोधर्मशास्त्रे अस्तिहितेषामिष्टे
धर्मग्रहाद्युक्तोधिकारः कृतदारारहिते तथाहिमनुः यद्यपित्तासुदारेःस्यात्स्त्रीकरदीनांकथंचन तेषामु

रःपरोदायःस्त्रियैदेयःपरःपरमःदेयतइतिदायः तस्मिंदायंनार्हदत्तेवा निषिद्धेनमार्गेणयथाक्रमंदेव
रादेरनुमितिमंतरेणाप्नुयात् अतोधिकेनुदेवराद्यनुमतिरपेक्षणीयेत्यर्थोऽभ्युपेते मनुः पत्यौजीवति
यः स्त्री निरंशकारोधतोनवेन्नतंभजेरन्दायादाजमानाः एतंतितेसतंतधतालंकारविषयमेत् न
नार्हतीवचपितानपुत्रोभ्रातरोन्यत्र श्रादानेवाविसर्गेवास्त्रीधनेप्रभवंतिः यदिप्येवंतरोप्येषास्त्री
धनंनार्हयेदित्यतः सवक्ष्यंप्रतिदायादःसाधुंश्चैवसमाप्नुयात् कात्यायनः जीवत्याः पतिपुत्रासुदेवराः
पितरोबंधवाः अनीशास्त्रीधनस्योक्ताधनस्योक्तादेप्रात्त्वपहरंतिये मनुः जीवतोनुमतासायेतद्दुरयस्व
बंधवः ताऽशिष्टाश्चोरदंडेनधार्मिकः पृथिवीपतिः मत्तानोस्त्रीणांधनेबंधवानामप्यधिकारोविवाहवि
शेषापाधौविद्यतेइत्यनिप्राये णोक्तम् जीवंतीनामितियदर्थंस्त्रीधनंतल्लक्षणमुक्तंनदिदानीमाह बंधुद
त्तंतथाशुल्कमन्वाधेयकमेवच अप्रजास्यामतीतायांबंधवास्तदवाप्नुयुःबंधुनिपित्र्यमातुलादिनिर्दि
ष्टं यच्चशुल्कंयच्चान्वाधेयकमित्यनेनसर्वमेवस्त्रीधनमुपलक्षितं तत्स्त्रियामनपत्यामतीतायांबंध
वाअवाप्नुयुः बांधवसंबंधितयैवतीत्यर्थः उक्तंसामान्येनबंधवाअधाप्नुयुरिति इदानीयस्मिन्विष
येबंधवाअधिक्रियंतेतदुच्यतेमाह अप्रजस्त्रीधनंभर्तृब्राह्मादिष्वनुढेषुचदुहितृणांप्रसूताचेत्तेषु
पित्र्यमितरत् अनपत्यायामित्यायाब्राह्मदैवार्षप्राजापत्यविवाहप्राप्तायाधनंतद्भर्तृनार्हतीति आसुरगांध
र्वराक्षसपैशाचविवाहलब्धायासुतदीयंधनंपित्र्यमिष्यते प्रसूतापत्यवतीचेदुहितृणामेवएतद्ब्र

Indira Gandhi National Centre for the Arts
ज्ञानमसीविहाय सत्त्वएवतिष्ठन्मामीश्वरंमरणेज्ञात्वाविनाशुःखेनोपपीडमानस्यस्योविप्लुतेश्वरस्मृतिः जन्मांतरेसकलपूर्वजन्मस्मृतिं दृढतरवैराग्यनिमित्तत्वेनाप्नुयात् इदानीं प्रत्याह यथाहिनरतोवर्णैर्वर्णयथात्मनस्तनुम् नानात्वयाणिकुर्वाणस्तथात्माकर्मजांतनूं यथान्नरतोनटोनानाविधानिरामरावणादिरूपाणिवर्णैर्वर्णवैचित्र्यैःसितासितादिभिरात्मनस्तनुंवर्णयति तथात्माप्यनीतकर्मोकर्मजांतान्नरशरीराणि सुरनराद्यात्मिकानिदर्शयति नरतदृष्टांतेनात्मनःशरीरयोगंदर्शयतिकः नस्वनाविकइतिगमयतिकर्मजाइतिवदन् कर्मणोमुख्याधिक्यंदर्शयति रूपनानात्वेपिहेतुरस्तीत्याह कालकर्मात्मबीजानांदोषैर्मातुस्तथैवचगर्भस्यवैकृतंदृष्ट्वामांसशोणितादिजन्मनःगर्भस्यांगेषुशिरःपाणिपादेषुश्रोत्रनेत्रादिषुच हीनत्वातिरेकत्वादिवैकृतविकृतरूपत्वं कालकर्मबीजमात्राणांदोषैर्नवृतीति शास्त्रदृष्ट्यनेचेतद्भवेत्कालएव किंतुजन्मनऊर्ध्वकालेपिहृत्तदोषोपलब्धेरदोषाणित्वम् कर्मणोदोषः श्रद्धादिवैषम्यं कर्मांतरस्यचप्रतिबिंबत्वम् कर्मान्नधर्मः नूतात्मनश्चदोषोधातुवैषम्यम् बीजदोषः पित्तदोषोगर्भविरुद्धचेष्टाकर्तृत्वम् अंगविकारेणादिदोषाणांनिमित्तत्वमत्रोक्तम् उत्पत्तिनित्तत्वचकर्मणांपूर्वश्लोकेतेनपूर्वापरविरोधः प्रथमशरीराद्युत्पत्तिश्रुतिकथमितिवचनवाच्यम् अनादित्वाच्छरीरपरंपरयाइत्याह अहंकारेणमनसागत्वाकर्मफलेनवा शरीरेणचनात्मायमुक्तपूर्वः कथंचनगतिर्धर्मीतिकर्मफलसुखदुःखनानावानामठ

Indira Gandhi National Centre for the Arts

वाव: प्रसिद्धमन्यत् यदेकर्मनिर्देहिनः फलोपभोगाय देहमारभते । तर्हि तत्फलोपभोगसमाप्तेः प्रा
ङ्देहेन देहिनो वियोगः संभवतीति अकालमृत्युनिवारणाय कर्मविधानमेकमित्यत्रास्वर्स्यादात्ते
रयोगद्यथा दीपस्य संस्थितेः विक्रियापि च दृष्टैवमकालेदेहसंक्षयः यथावस्थादीनां योगादीपस्यव
र्त्तिवर्त्तिन्याज्वालायाः संस्थितिरवस्थानं वर्त्तादियोगेसत्यपि विक्रियाप्रबलपवनोनिघातादिना
दीनादीपप्रध्वंसोपि दृष्टः एवमकालेदेहास्तकर्मफलोपभोगसमाप्तावपि तत्परिपंथिकर्मणाप्र
तिबंधेप्राणसंक्षयोपि संभवतीति ततश्चपरिपंथिकर्मनिवारणार्थमकालमृत्युनिवृत्तिफलाः कर्मविध
य उपपन्नाः उक्तयोगावशादमीनावः तन्मार्गमिदानीमाह अनंतारश्मयस्तस्य दीपवद्व्यवस्थितो
दृदि सितासितारुणपीतनीलकपिलानीलोहिताः ऊर्ध्वमेकः स्थितस्तेषांयोनित्वासूर्यमंडलम् ब्रह्म
लोकमतिक्रम्यतेनयातिपरंगतिम् तस्यजीवस्यसूर्यस्यवा अनंताअसंख्यातारश्मयः चेतसितासि
ताद्यनेकवर्णायुक्ताः तेषांमध्येरश्मिरेकऊर्ध्वगामी सूर्यमंडलंनित्वाब्रह्मलोकंचातिक्रम्यस्थितः तेनर
श्मिनामार्गेणादित्यगतिपरंगत्वंब्रह्मयाति हिताहितसंज्ञकनाडीचक्रमध्यगतस्यत्रयोदशिसूर्यमंडलस्यैते
रश्मयोनतुजीवस्य उदयप्रकारेणहितस्यतेनिधीयंतेननुवचनास्यप्राणाउत्क्रामंतीत्यादिश्रुतिवि रुद्धेषा
स्मृतिः नैवम् तयोर्ध्वमायन्नमृतत्वमेतीतिप्रत्यक्षश्रुतिमूलत्वात्स्मृतेः तेनश्रुत्योरेवात्रपरस्पर
विरोधः नश्रुत्तिस्मृतोः नचश्रुत्योरपिपरमार्थतोविरोधोस्तिनास्यप्राणाव्युत्क्रामंतीतिपुनरुत्पत्तयोइति

६७

वाक्यशेषः कल्प्यतेश्रुत्यंतराविरोधाय यद्वाप्राणानांतत्प्रच्युत्यादवश्यंभावंपरित्यज्यनयंति किंतुस्व
छपादेहत्यजंतीत्यर्थः तथात्रैवसमवनीयंतेइत्यत्र अत्रैवजन्मनिसमवनीयंते नजन्मांतरइ
त्यविरुद्धा नपुनरत्रैवशरीरइति किंच यदस्यान्यद्रश्मिरात्मूर्ध्वमव्यवस्थितम् तेनदेवयो
नेर्गतिंसधमानिप्रपद्यते परमगतिमार्गभूताइत्येतदन्यद्रश्मेरात्मस्थात्मनऊर्ध्वंदिशंप्रतिव्यवस्थितम्
तेनात्माछरीरादुत्क्रामन्नयंजीवोजातीयानिशरीराणि देवानोधामास्थानेनसहप्रयाति देवलोकंदे
वान्नवतीत्यर्थः शरीराणीतिबहुवचनमेकस्यामेवजातावाख्यायाम् इदानींसंसरणमार्गमाह येनेक
पाश्चात्यसाद्रश्मयोस्यमित्तप्रज्ञा इष्टकर्मोपभोगायतैः संसरतिसोवशः अस्यात्मनोहृदयदेशास्थितस्य
घत्तान्मप्रज्ञात्रनेकरश्मयः स्थिताः तैरितःशरीरान्निर्गच्छन्नवलोकेकर्मफलोपभोगायसंसरति देहांतर
कर्मवशः सन्प्रपद्यते प्रमाणतः साधितमप्यात्मानंदार्ढ्यार्थंपुनरपिप्रमाणांतरैः साधयतिः वेदैश्चाने
सविज्ञानेर्जन्मनामरणेनच आत्मागत्यागत्यासत्येनचंद्रेनतेन स्त्रेयसासुखेदुःखान्याकर्मनि
श्चयेनाप्तेनैः निमित्तैश्चानुमानज्ञानेर्गृहसंयोगनैःफलैः तारानक्षत्रसंस्थानैर्जांगरैः स्वप्नजैः फलैः आदा
शयचनज्योतिर्जलमृत्तिभिरेतथा मन्वंतरेषुगप्राप्तामोषधिबलैरपि वित्तात्मनंविद्यमानंसर्वेषु
जगत्सथा हेमहर्ष्यायोवेदादिनिःप्रमाणैः बुद्धींद्रियशरीरव्यतिरिक्तमात्मानंविद्यमानं वित्तजानीत
तन्नैववेदैः कर्मकांडात्मकैरग्निहोत्रादिकर्त्तृनैगमिस्वर्गादिफलमात्रदातृभिरात्माप्रबोध्यते देहादीनां

Indira Gandhi National
Centre for the Arts

मात्मनेकर्त्तृगामिफलंनस्यात् उपनिषद्भ्योगात्कैश्चुवेदैरविना शीवाग्रेश्रय मा[redacted]हि तिधर्मेत्येत्
मादिनिःश्रुत्येवेदाद्याति रिक्तात्मसद्भावोवबोध्यते शास्त्रैश्चमीमांसादिभिरात्मसाधकयुक्तिबोधकै
र्विज्ञानसहितैरात्मावबोध्यते तत्राशास्त्राणिआत्मासाधकयुक्तिप्रसाधनानिविज्ञानानि चात्मनाप्रा
णादिकारकाणानि प्राणायामादिप्रदर्शकानि जन्मापिसुखदुःखहेतुनृत्तत्वेनविचित्रत्वेनयदादृष्टोधर्मी
धर्मीकल्पयत्तदाश्रयमात्मानंगमयति एवंमरणमपि तद्विदृष्टेतत्कारणेसमानेपिकस्यचिद्देवन
वदृष्टस्वर्गस्थायकत्वेनाक्षिपदात्मानंतदाश्रयमाक्षिपति मरणंसंविधिन्यायात्प्राणिषुलोकालोकरू
पेणाचर्त्तमानयास्वोपयादृष्टोधर्मोन्यानल्पत्वकल्पनामुखेनात्मापिकल्प्यते तथात्यजमानोहोत्तु
रदुःखोपनोगायस्वर्गनरकंवागच्छति स्वर्गनरकंवोपनुज्य वस्तुदकेनसहेमंलोकमागच्छति आ
त्माउपनिषदाद्यागमप्रसिद्धेआगत्याचागत्यावेदाद्यादित्यतिरिक्तआत्मासाध्यते सत्यं यथार्थंवाकु
म् अनृतमयथार्थं तच्चात्मासाध्यते नखलुतमंतरेणासत्यत्वासत्यत्वेसिध्यतः अतोयमर्थ
वाक्यादवगतवानसि तमेवप्रमाणांतरेणप्रतीतीति अत्यनिजानन्वाक्यस्यसत्यत्वमध्यवसति वि
चर्यवाक्यासत्यत्वमुक्तनीत्याचवाक्यार्थं नवुध्यादयः प्रत्यनिजानंतीति तद्व्यतिरिक्तात्मसिद्धिः अ
यंश्रेयःपुरुषप्रतीतिः तेनचपुरुषः प्रमीयते एवंसुरदुःखाभ्यामप्यात्मासाध्यते धर्मीधर्मयु
क्तात्मसाध्यत्वान्नायोसुत्यसुत्यक्तिनिसुत्यकुलोत्यनैः कर्त्तनिः कैश्चिच्छुनाधर्म्मीलोकर्मोणिकि ७०

यंते कैश्चिद्विपरीतानि तत्तज्जन्मांतरीयधर्मधर्मानुसारान्यासवासनाक्षेदोषवत्स्यापकत्वा आ
त्मसमवायीकत्वाइति सुखाद्यनुकर्मणामात्मनिप्रमाणंनिमित्तसुखशब्दादि ज्ञानुनेच्छुनीनां
तिच्छनादित्तदेवप्रत्यासन्नकृतस्यसुखाद्यनुकर्मणोज्ञापकत्वात्स्तानम् ग्रहनक्षत्रादित्यादयः तेषांचपर
स्परतोदिनिर्वीसंबंधः संयोगस्तत्सूचितानिधर्माधर्मफलान्यात्मनिप्रमाणम् निमित्तसूचितंयद्दृष्टं
जन्मांतरार्जितमपिसन्नवति तच्चदेहादिव्यतिरिक्तमात्मानमंतरेणनसंभवतिनिमित्तादेवात्म
निप्रमाणानि नक्षत्राणश्विन्यादीनि तारारूपितेषुग्रहाणांसंचारः तथाजायद्दसाजातीनिमित्तच
रदर्शनादीनि स्वप्नजानिरवद्याद्यैर्हाणादिदर्शनानि तत्सूचितेश्रफलैः पूर्ववदात्मानुमानम् प्रा
णादिनिःशरीरेंद्रियविषयादिदृष्टेणानोपपद्यमानेतेनात्मानुमीयतेमन्वंतराणांस्वायंभुवादी
नांच युगानांकृतत्रेतादीनांच विलक्षणास्वभावनात्मसाधकत्वम् उक्तंचमनुना अरोगाः सर्व
सिद्धार्थाश्चतुर्वर्षशतायुषः कृतत्रेतादिषुतेषांवयोह्रसतिपादायः चतुष्पात्सकलोधर्मः सत्यंचै
वकृतेयुगेचोरिक्तान्तमायानिधर्मश्चापैतिपादशइति ततश्चकृतेयुगप्रतीतेनोधर्मोपचयः कला
वधर्मोपचयः तेषामेवंत्यनेकयुगस्थायिन्यात्मनिमन्वंतरादिस्थितिः प्रमाणम् एवंवसएकांत
तदेवौषधकस्यचिदनीष्टफलदस्यचिन्नेतिव्यवस्थांघटयितुंजन्मांतरार्जितादृष्टाश्रयआत्मानुमेयइति
मंत्रौषधफलमप्युक्त्वाप्यर्थप्रमाणम् किंच अहंकारःस्मृतिर्मेधाद्वेषोबुद्धिःसुखंधृतिः इंद्रियांतरसंचारइच्छा

Indira Gandhi National Centre for the Arts

(२४८)

राज्जीविते स्वर्गः स्वप्नश्च नाना नोपेरणमनसोगतिः उन्मेषश्चेतनापलक्षणादात्मनश्चमौलिकम् यत्एतानि
लिंगानि दृश्यतेपरमात्मनः अस्तितस्मात्परोदेहादात्मासर्वज्ञ ईश्वरः यस्मादहंकारादीनिलिंगानि आत्मनो
नुमापकानिदृश्यंते तस्मादस्तिदेहादन्यःपरमश्चेतनआत्मासर्वज्ञः सर्वानुभवितेश्वरः स्वामी विशेषा
नुपादानात्सर्वस्याहंकारोहप्रत्ययः इदंप्रत्ययवेद्यदेहे नोपपद्यतेनान्यथा ममात्मेतिचान्यपदेशो
संबंधीप्रत्ययोघटते तथात्वमशरीरमितिप्रत्ययः शरीरादन्यस्याहंघटतेनान्यथा ममात्मेतिचान्यपदेशो
लक्षणिकः नान्यथात्मशब्दः अन्यथाममात्मेतिउक्तस्यात् एवमहंकृतिः शरीरादन्यस्यात्मनोलिंगम्
स्मृतिश्चजन्मांतरानुभूतेतत्तथानादौसंभवंती सुखसाधनत्वे नान्यत्वात्मनोलिंगमनघधुनातेनदेहेन
प्राज्ञवीयत्तनपानस्यापेक्षितौपायत्वमनुभूतंयेनसएवस्मर्त्तास्यात् मेधायंथधारणशक्तिः जन्मां
तरीयतज्ञेपिविषयानुभवजनितसंस्कारातिशयवत्प्रत्यति देहातिरिक्तेसंस्कारवत्यात्मनिलिंगा
मू देहोपिसदृदोषस्मरणात्भवति तज्जन्मांतराधीनमिति नवत्यात्मनिलिंगम् बुद्धिः प्रज्ञासापि
जन्मांतरायत्तेति आत्मनिलिंगम् सुखमानंदः नाशोशरीरगुणः वैशेषिकगुणत्वेसतिअकारणा
पुणपूर्वकत्वात् द्वारणाउणपूर्ववेहि यावच्छरीरभावीस्यात् तस्मान्नायंशरीरारंभपरिणतानांभूतां
नांगुणःकिंतुततोन्यस्यतिनवत्यात्मनोलिंगम् एवंहृदयस्पंदिनिष्ठत्वमलक्षणोधृतिरपि इंद्रियांतरसंचा
रः इंद्रियांतरप्रतिगतिः सादेहस्यसर्वेंद्रियव्यापिनोनोपपद्यते आत्मनःपुनरुपपरिमाणातःक

रणोपरितस्यागतिरेंद्रियसंचारोयुज्यते अतएवदेहस्यद्वारप्रदेशेअणीपाद्रीवातंडुलादणीयान्मा
त्रादित्यक्तम् इच्छापिजन्मांतरानुभूतस्मृत्यर्थविषयायपरमात्मलिंगम् धारणाजीविते अपिधारणं
शरीरस्यनतच्छरीरेणेवशक्यंकर्तुम् एकस्यैकस्यक्रियायांकर्मवर्त्तविरोधात्शरीरमेवधार्यम् तदेव
धारकत्वमितितेनोपपद्यते जीवितंप्राणधारणम् तदपिनशरीरकार्यम् प्रयत्नसाध्यत्वात् प्रयत्न
श्चनशरीरगुणः अयावद्द्रव्यभावित्वात् पाकांतरानिवर्त्यत्वाच्चसवर्गलोकांतरेनोपपद्यतिशरीरंसुखस
देहव्यतिरिक्तआत्मातूपपद्यते अन्यथाकृतनाशाकृताभ्युपगमः प्रसंगःस्यात्इतस्वप्रत्ययआत्मलिं
गम् इहजन्मन्यनुभूतस्यस्वप्नेदर्शनंजन्मांतरीयानुभवाहितसंस्कारवशाद्भवतीत्यात्मलिंगंतावत्प्रसि
द्धंनशरीरेंद्रियाणांस्वकार्यप्रेरणमात्मलिंगम् नह्यन्यसत्त्वेरजोपिमनसोतिसूक्ष्मस्यनेत्रद्वारेशरी
रेवस्थितस्यागतिरपतनमाश्रितदृष्टिनिमित्तमात्मलिंगम् उन्मेषश्चप्रयत्नवदात्मकार्यत्वादात्मलिं
गम् चेतनाज्ञानमचेतनाशब्दाच्छरीरादन्यंचेतनंगमयति यतश्चशरीराश्रितोननवतीं स्वाश्रयमा
त्मानमनुमापयति देहत्वेनपंचानांभूतानापीयंहः स्वीकर्तव्यात्मलिंगम् आत्मनउत्क्रांतिसर्वेंद्रि
यानुपादायनाह बुद्धींद्रियाणिसप्तेनिमनःकर्मेंद्रियाणिच अहंकारश्चबुद्धिश्चप्राणश्चेत्यादीनिचे
वहि अव्यक्तमात्मातेत्रयः क्षेत्रस्यासंनिगद्यते ईश्वरः सर्वज्ञतायस्तत्समदसञ्चयः बुद्धेर्गंधादिसा
क्षात्कारस्यकारणतयासंबंधोनिघ्राणादीनियंबुद्धींद्रियाणि तानिचार्थेगंधादिनिर्विषयैःसहितानि

Indira Gandhi National Centre for the Arts

सार्थानि मनोऽहंकारो बुद्धिरहंकारो ऽपि बुद्ध्यहंकारौ पृथिव्यादीनि पञ्चतन्मात्राणि अव्यक्तप्रधाने
इत्येतस्य क्षेत्रस्यात्मा सर्वेश्वरः सर्वभूतहृदयेनासमानः अतएवसम् सात्वविकस्तत्र ऽनवयोऽ
मानतया असदसदात्मकानेवप्रकृतित्वात् कार्यतस्माद्धेत्रज्ञइतिक्षेत्रमुच्यते बुद्ध्यादीनाकार
णान्याह बुद्धेरुत्पत्तिरव्यक्तात्तोहंकारसंभवः तन्मात्रादीन्यहंकारादेकोत्तरगुणानितु बुद्धेर्विष
यनिश्चयहेतोरंतःकरणस्याव्यक्तात्प्रधानादुत्पत्तिः समानिसत्त्वरजस्तमांसि अव्यक्तम् ततोबुद्धे
रहंकारस्यज्ञानक्रियाकर्तृत्वानिमित्तोतः करणस्यतेनवोजन्मसदृशः शब्दस्पर्शरूपरसगंधास्त
न्मात्राणि तान्यादियेषांतत्तानामिद्रियाणांचतानितन्मात्राणि तान्यहंकारादुत्पद्यंतेनतानितुतन्मा
त्रव्यवधानेन अहंकारश्चत्रिविधः सात्विकः सएवतैजसइतिपुराणेपुरीयते तस्माद्बुद्धिंद्रियाणा
मुदयः राजसोयः तस्माद्धेकारिकसंज्ञकात्कर्मेंद्रियाणाम् तामसस्तृतीयोभूतादिसंज्ञकस्तस्मा
दितन्मात्राणितेभ्योयथाक्रमं व्योमादिभूतानि तानिचवक्ष्यमाणैः शब्दादिगुणैरेकोत्तरगुणानि त
त्रव्योम्निशब्दाख्योगुणः वायोस्पर्शश्चतेजसिरूपंच अप्सुरसश्चभूमौगंधश्चपंचम
गुणानाह शब्दःस्पर्शोरूपंचरसोगंधश्चसधगुणाः पोयस्मात्तस्मात्तेषांसतत्तस्मिन्नेवलीयंते ये
व्योमादीनांमेलोत्तरगुणाउक्तास्तेशब्दादयोगंधपर्यंता यश्चैषांबुद्ध्यादीनांमध्येयस्मात्कारणाद
न्यत्रलीयतेनिःसतोनिर्गच्छन्सतस्मिंस्तत्रैवकारणात्मनिप्रलयकालेलीयतेतिरोहितोभ

वति तत्रचलिः स्तोत्तीयतेइतिवदतासत्कार्यवादोदर्शितः प्रकरणार्थोयंसंहरमाह यथात्मानंसृजतो
त्मातथावः कथितोमयाविधाकात्रिप्रकाराणांकर्मणांमश्रेरपिसन् ईश्वरः स्वतंत्रोपिसन्नात्मायथात्मा
नंदेहवंतमानसवाचिककायिकत्तयासात्विकराजसतामसतया त्रिविधस्यकर्मणोविपाकपूर्वं तदु
पाधानवसात्सृजति तथावोयुष्माकंहेमुनयोमयाकथितः सत्वरजस्तमश्चैवगुणास्तत्प्रकृतिजाः र
जस्तमोभ्यामित्यादिना अथोऽत्रकेवलसत्त्वोद्रेकेणविमुच्यते इत्यपिदर्शितम् चक्रदृष्टांतेनचान
वस्थेतत्वमुक्तम् ततश्चतमसात्मस्वरूपोपरिज्ञानात्मकोमोहः रजसश्चफलेरागात्कर्मसुप्रव
र्त्तिसतः कर्मफलस्यजात्यायुषोः सुखदुःखानुभवस्यचोदयः इत्येतच्चक्रवत्क्रम् एतस्यपरिवर्त्त
नादात्मापिपरिवर्त्तइत्युपचर्यते अनादिमानादिमांश्चसएवपुरुषः परः लिंगेंद्रियाणिरूपः स
विकारउदाहृतः स्वरूपतोऽनादिः आदिमत्त्वेरीरयोगित्वादादिमान् परमोपनिषदः पुरुषए
वक्षेत्रज्ञः सर्वस्वरूपतोविकारतश्चयथासंख्यलिंगेंद्रियाणः तत्राहंकारादिनिर्लिंगैः क्षेत्रज्ञो
त्मनोरूपंगृह्यते तद्विकारस्तुशब्दादिभिरिंद्रियैः सएवविधउक्तउत्तरश्लोकार्यतयानुवादःपित्त
यानोऽर्थोव्याख्यातएवास्यस्यचांतरम् तेनायिहोत्रिणोयांतिस्वर्गकामादिवप्रति अजवीथी
मार्गाः स्तस्त्रिन्नाविशतिनेति अजवीथीकरूपपत्तु श्रवणादिनक्षत्रत्रयमजवीथीमार्ह
अजवीथीविभुनाघोति तस्याश्चागस्त्यस्यचयदंतरंसपित्तस्त्रोमार्गः तेनकाम्यकर्मकारि

Indira Gandhi National Centre for the Arts

णे दिवोस्वर्गं यंति अग्निहोत्रग्रहणंवेनानिवर्त्तमयदर्शीनार्थम् दुःखसंज्ञितचिरकालोपतोष्यसुखानुत्त
कस्यहीनूनोदेशोद्योः दिवंयेचदाढापराः सम्यगस्तानिश्चयेणेदुलाः तेपितेनैवगच्छंतिसत्यव्रतपराय
णाः येसम्यग्दानादिपूर्त्तधर्मनिरतातथादयासर्वेषुनूतेषुक्षोतिरनुस्वयाशोचमनायाः मंगलम
कर्म्यएवमग्रहेत्यष्टनिर्णयेदुक्ताः येचनियमेवंनसत्यवादिनः तेपिपित्र्यानेनैवमार्गेणदिवंयो
ति तन्मार्गगामिनांपुनरावर्त्तिमितिहासमुखेनाह अष्टाशीतिसहस्राणिमुनयोगृहमेधिनः पुनरा
वर्त्तिनोवीजजन्तवोधर्मप्रवर्त्तकाः अष्टाशीतिसहस्रसंख्याकामुनयस्तापसाइष्टापूर्त्तधर्मकारिणइति
यावत्र गृहमेधिनोगृहस्था अनेनचक्राम्यकर्मकारित्वंसूचयति पुनरावर्त्तिनःपुनर्जन्मनाजः
जगत्सृष्टेधर्मप्रवर्त्तनायातेप्रागनुष्ठितधर्मत्वाद्वीजभूत्वाः प्रवर्त्तकास्तस्यचधर्मस्यचप्रवर्त्तकाः स
प्तर्षिनागवीथ्यांतदेवलोकंसमाश्रिताः तावंतएवमुनयः सर्वान्सर्वविवर्जिताः तपसाव्रतचर्यैणसं
त्यागेनमेधसा तत्रगत्वावतिष्ठंतेयावदाभूतसंप्लवम् नागवीथीमाहगर्गः ऋतिकाजरणास्वा
तिर्नागवीथीप्रकीर्त्तितेति देवलस्तु अश्विन्यादित्रिकासर्वानागाद्यादहनांतिकाः अयमर्थःप्र
त्येकमश्विन्यादीनक्षत्राणांनागाद्यानवथीयंयः नागागजः ऐरावतीरेषनागोजरऊवीमगीः अ
जादहनेति तस्यानागवीथ्याः सप्तर्षीणांचक्र्यदंतरालंतेनमार्गेणगत्वा अष्टाशीतिसहस्राण्ये
वमुनयःसकलनिषिद्धक्राम्यकर्मारंभनिवृत्ताः तपसाऽवरूपकेनवर्णधर्मेणतथाव्रतचर्यैणसं ७२

त्यागेनमेधया मेधाकार्येणवेदधारणेनपुनर्देवलोकं
समाश्रित्यतत्रयावदाभूतसंप्लवंमहाप्रलयंयावदवतिष्ठंतेतेपिपूर्ववत्पुनरावर्त्तिनोवीजभूतानिवृत्तधर्म
प्रवर्त्तकाश्च एतच्छ्लोकद्वयेनात्मज्ञानरहितंक्राम्यंकर्मावश्यंकालुष्यंतापुनरावर्त्तिहेतुकं संपाद्यमेविनिश्च
स्यइत्यादौक्तात्मज्ञानसहितस्यकर्मणोनावर्त्तिप्रत्यक्षेणदर्शयति तत्रादौतावच्छ्रोतव्यमात्मज्ञानोपायंच
श्लोकद्वयेनाह यतोवेदाः पुराणंचविधयोयेनिबंधसाधनश्लोकाः सूत्राणिन्याय्याणिप्रस्थानानिचैव
दानुवचनंयज्ञोव्रतंचर्यातपोदमः प्रदेयोपवासःस्वाध्यायमात्मनोज्ञानहेतवः द्वौह्यात्मावस्थितौवि
वर्द्धितयातद्रहिततयाच तस्ययन्मुक्तस्वभावरूपं तत्सर्वेश्वरत्वसर्वज्ञत्वादिगुणयोगित्वेनवेदोक्तेषु
स्तवेषूक्तेनपुनर्यद्रूपेणप्रकाशतेहिस्तुत्यावतत्सर्वेप्रोद्यद्येषुस्तुत्यप्रकाशोधीर्नोहिविश्वप्र
काशकंतमेवचैवमनुज्ञातिसर्वंतस्यनासासर्वमिदंविनातेति तत्रज्ञात्वेत्यनुवादेनविधिमुच्यते
उपलभ्यचिनुमिदमुच्यते यतोवेदाइत्यादि यतोऽनुकारणाद्वेदाःश्रुतयः पुराणानिप्रसिद्धानि अन्या
श्चधर्मशास्त्राद्यास्तेषांयेनिबंधोग्रंथस्तत्रवोधकावेदनागाः तासांमतीनांवेहेतुर्विज्ञानविधायकत्वात्प्रा
धान्येनवेदत्वेसत्यपिपद्यग्रहणम् येचकेचनश्लोकाः यद्वारंपंचविधसमेतीत्येवमादयः सूत्रा
णिविचक्षितास्तंत्रंचाचक्षतेनिबंधकोनिबंधाणिसूत्रादीनीतिव्याख्यानि अन्यदपिवाङ्मयंयतऊ
तं तस्यचात्मनोवेदानुवचनादयोज्ञानहेतवः वेदानुवचनंचाध्ययनं सुखबोधनमनुयश्चा

Indira Gandhi National
Centre for the Arts

द्वचनं अनेनचसर्वस्यवेदाध्ययनस्य पूर्वाध्ययनपूर्वकत्ववदन्वेदस्यापौरुषेयत्व
मायति यमुपरमात्मसकाशाद्देदानामुपपद इत्युक्तम् नतेनवेदानापौरुषेयत्वापत्तिः प्रमाणांतरसे
क्षिवाक्यार्थमिश्चित्य तत्प्रतिपादनायेदंग्रंथमतयावाक्यस्योत्पादितत्वेनौरुषेयत्वम् अतएवह
दीरणकेनिःश्वसितमुत्पत्वमुक्तम् सपथाहवाअरेस्यैहितस्यमहतोभूतस्यनिःश्वसितमेतद्यदृग्वेदोयजुर्वेदः सामवेदोथर्वांगिरसइतिहासपुराणंविद्याउपनिषदः श्लो
काःसूत्राण्यानुव्याख्यानानि अस्यैवैतानिसर्वाणिनिःश्वसितानीति ब्रह्मचर्यब्रह्मचारिकर्म
ब्रह्मक्षत्रियादिकंवा उपवासोपकुर्वाणादिः स्वातंत्र्येणेहाप्रसिद्धमन्यत्र पूर्वश्लोकेये नि
र्दिष्टावेदाडक्वचनादयोर्थास्तानेवब्रह्मज्ञानस्वरूपमात्मोत्पादनतयाविनियुक्ताइतिन्यायेनिरासाया
ह सएषआत्मेविज्ञास्यः समेयेरवमेवतु द्रष्टव्यस्त्वयमंतव्यश्चश्रोतव्यश्चेतिश्रुतिनिः सरवतुयरमात्मा
समस्तैश्चतुर्निरूप्याश्रमैर्विज्ञेयोविशेषतोज्ञातुमिष्टव्यः अत्रपरमात्मविषयविज्ञास्याश्रमान्प्रति
साध्यताप्रत्येतव्याइष्यमाणत्वात् नपुनस्तद्विषयेश्रवाइष्यमाणत्वप्रतिपादनत्वात्प्रधानत्वपदार्थ
तेनसंबध्यतेनगुणः नचप्रत्ययार्थत्वेनेच्छायाएवप्राधान्यवाच्यम् साहिसन्प्रत्ययेनधात्वर्थमी
प्सितमंप्रतिगुणत्वेनैवोच्यते तेनप्रत्ययार्थत्वेपितस्यागुणएवप्रयोजनचाङ्गेचधात्वर्थइष्यते न
सुरावाग्निदत्वरूपेणा तेनब्रह्मवेदब्रह्मभवति नचपुनरावर्तते इत्यादिवचनावगतोपुनरावृत्ति

७४

प्रयोजनं विज्ञानमाश्रमिनोसाध्यमित्युक्तंभवति ब्रह्मज्ञानस्यसप्रयोजनत्वादेवतद्विषयेश्रोमिद्धर्नेछाया
द्विधेयता अप्राप्तविषयत्वाद्विधेः किंपुनस्तज्ज्ञानंवेदितव्यमित्यपेक्षिते उच्यतेद्रष्टव्यइतिदर्शनव्यः साक्षात्कर्तव्य
इत्यर्थः दर्शनोपायस्तयोक्तव्यमंतव्यइतिश्रुतस्ययुक्तिभिरनुसंधानंमननम् तच्चश्रवणमंतरेणनसं
भवतीतिमत्वोक्तंश्रोतव्यइतिउपनिषद्वाक्येभ्योमधारणीयः द्विजातिभिरितिसूत्रंद्रव्यदासार्थम् विहितयो
र्ज्ञानकर्मणोःफलमाह यावन्मेनविंदतियेचारण्यकमाश्रिताः उपासतेद्विजाः सत्यंरूपापरयाश्रुताः कगतिः
संभवत्यर्चिरहःशुक्लंतथोत्तरम् अयनंदेवलोकश्चसवितारंसवैद्यतम् तत्तत्पुरुषोन्नेत्यमानवो
ब्रह्मलोकिनान् ब्रह्मेतिपुनरावर्तिसेषामिहनविद्यते येद्विजातयोनंयरमात्मानमेवंप्रवणमननाभ्यां
विदंतिलभंते ब्रह्माहमस्मीति साक्षात्कुर्वंति येचारण्यकमरण्याध्येतव्यंब्रह्मविद्यात्मकंवेदभागंब्रह्मप्र
माणतयासमाश्रिताः संतः परयाभक्त्योपेताः सत्यंयथार्थंभूतंयरमेश्वरमुपासते ध्यायंति अत्रयेचेत्यु
पासकत्वेनश्रवणमननकर्तृत्वेनसमुच्चयार्थश्चकारोनपुरुषव्यक्तिसमुच्चयार्थः तेनश्रवणमन
नध्यानार्चनवंतोदेहादुत्क्रम्यवक्ष्यमाणार्चिरादिनामानोदेवताः संभवंतिप्राप्नुवंति अर्चिरभिरह
रहिनसः शुक्लः शुक्लपक्षः उत्तरमयनंसूर्यस्योदगयनम् देवलोकसवितृवैद्युताः प्रसिद्धाः तेनवैद्यु
तान्निप्राप्तास्तान्मानवः पुरुषोभ्येति ततोसौब्रह्मलोकिनान्ब्रह्मलोकनिवासिनस्तान्करोति ब्रह्मलोकं
प्राप्तानांनपुनरावृत्तिः जन्मनविद्यते कामकर्मकारिणः प्रत्याहः यस्तेनतपसादानेयेहिस्वर्गजितोन

Indira Gandhi National
Centre for the Arts

रः धर्मनिशाकल्पवल्लंददक्षिणायनमेवच पितृलोकंचेंद्रमसं वाशुक्लपक्षिजलमहीम् क्रमात्तेलक्षवंती हु
नरेवव्रजंतिच फलार्थविहितैर्यस्तपोदानादिनियैर्स्वर्गजितवंतः स्वर्गप्रदधर्मकृतवंतः तेनवर्द्धमाणा
क्रमेणधूमादीन्संजनयंति धूमाद्यभिमानीनीदेवताः प्रादुर्भवंति तत्रचंद्रंयावदवरोहणम् वाच्यंव
रोहणमहीपथिवी तत्रत्यानोषधिवनस्पतीन्संजनयंतीत्यर्थः अतऊषधिवनस्पतीन्भुक्तवतोः स्त्रीपु
रुषयोर्विशुक्रेशुक्रशोणितेयंचधात्रीत्यादिप्रदर्शितमनुसंधेयम् पुनर्यज्ञादनुष्ठानाद्यदेहपातादू
र्ध्वमुक्तक्रमेणायंतायांतिच अतएवोक्तंभगवतागतागतंकामकामालभंते इतिगीतासुउक्तविपर्ययेदो
षमाह एतद्योनविजानातिमार्गद्वितयमात्मनः दंदशूकःपतंगोवत्सवेत्कीटोयवा क्रिमिः उक्तमात्म
नोमार्गद्वयंयोनविजानाति स्वात्मानंचतन्मार्गगमनोपायंनानुतिष्ठति सदंदशूकःसर्पः पतंगःपक्षीक्रि
मिःकीटोवान्नवेत् उपासनेतिकर्त्तव्यतामाह ऊर्ध्वस्थोनानचरणः समेनप्यंतरंकरम् उत्तानंकिंचि
दुन्नम्य मुखंविष्टभ्यचोरसा निमीलितास्यः सत्त्वस्थोदंतैर्दंतानसंस्पृशन् तालुस्थाचलंजिह्वांसं
दष्टास्यः सुनिश्चलः सन्निरुद्धेंद्रियग्रामोनातिनीचोच्छ्रितासनः द्विगुणंत्रिगुणंवापिप्राणायामसुपक्व
मेत् ततोध्येयःस्थितोयोसौहृदयेदेवतत्रभुः धारयेत्तत्रचात्मानंधारणाधारयन्नुधः अनतिनी
चोच्छ्रितेआसने उपविश्यउत्तानोचरणौस्थापयित्वापद्मासनवद्धेतियावत् तद्दक्षंसव्येकरेदक्षिणं ७५
करमुत्तानंनिधायास्यंकिंचिदुन्नम्य वक्षसाचकायंविष्टभ्यास्तिलो निमील्य लगद्दंतादरजत्तमः कार्यं

विरोधीसत्त्वकार्यमनः प्रासादिकमास्थाय दंतपंक्तीरन्योन्यंसंस्पर्शयपरिहरंस्तालुनिजिह्वामचलंकृत्वा नि
संधः सन्विषयेभ्यः इंद्रियाणिप्रत्याहृत्य द्वादशमात्रिकंनीयसः प्राणायामाद्विगुणंत्रिगुणंवाप्राणा
यामंकुर्यात् ततोहृद्योमिहृत्संज्ञकनाडीसंचेदनंप्राणोदीपवदवास्थितआत्मासर्वस्येश्वरोध्येयश्चि
तनीयः ध्यानानंतरंधारणांकुर्वन्नात्मन्यात्मानमात्मायंमनोधारयेन्नियच्छेत् दत्तात्रेयः निवातेवि
जनेस्थानेशुचौचैवमनोरमे निर्जंतुनिरुपद्रवेधैर्यशरावोत्कादिनिःशब्दादिवर्जितेस्थानेशुचिकृत्वा
तुसंसारम् वक्ष्यमाणप्रकारेणप्राङ्मुखोवाप्युदङ्मुखः कृत्वासुसंस्थंतंदेहंसुसमंयोगवित्तमः नमस्कृ
त्यमहादेवंतथा योगेश्वरहरिम् शोधयित्वापुरानाडीःप्राणायामेश्वरक्रमः प्राणायामेश्वरस्तावद्यावच्चि
त्तंप्रसीदतिमहात्मनस्ते यमनियमप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावंगानियोगस्येति ब्रह्म
पुराणे ब्रह्मचर्यमहिंसाचसत्यास्तेयापरिग्रहम् सेवेतयोगीनित्यामोयंतास्यमनोनयेत् स्वाध्याय
शौचसंतोषतपांसिनियतात्मवान्न कुर्वीतब्रह्मणेतथायस्मिन्प्राणेवमनः एतेयमाश्चनियमाः पंचपं
चप्रकीर्त्तिताः विशिष्टफलदाःसाम्यान्निष्कामानांविमुक्तिदाः एवंब्रह्मासनादीनांसमास्थाययुतोयुतः
यमांश्चैवनियमांश्चैवयुंजीत नियतोमुनिः वायुपुराणे पद्ममर्धासनंवापित्थासिकमासनम् प्रा
स्थायप्रयोगीयुंजीतत्कृत्वातुप्राणंवहदिमार्वंडेयपुराणेप्राणायामानिरोधश्च प्राणायामउदाहृतः विष्णु
पुराणे प्राणाख्यमनिलंवपन्नभ्यासक्रियतेहियः प्राणायामःसविज्ञेयः सवीजोवीजवर्जितः

Indira Gandhi National
Centre for the Arts

(२५२)

२
ना०व
०प्रा०प

जप्तमंत्रकः ॐ बीजइनरः मार्कंडेयपुराणेऽयुग्मोच्छ्वासो यावत् प्राणायामस्त्रिधोदितः तत्प्रमाणं वक्ष्यामि तदुत्कर्षणुश्मे लघु द्वादशमात्रकम् द्विगुणः स्तु मध्यमः त्रिगुणोनेषु मात्रानिरुत्तमः संज्ञा हतः निमेषोन्मेषणोमात्रा तोधारस्तथा योगायुक्तवल्पः अंगुलिमोत्रित्रितयं जान्वोः परि मार्जनंवा पि तालत्रयमपित्रा मात्रासंख्याप्रकाशंति देवलः त्रिविधः प्राणायामः कुंभोरेचनपूरणमिति निःश्वसनि रोधः कुंभः अजस्रनिः श्वासोरेचनम् निः श्वासाधमनंपूरणमिति सपुनरेक द्वित्रिनिरुद्धातैर्मृदुर्मध्यस्ती व्रोवासूचति प्राणायानवा नोदानसमानन्नासकर्मनंमूर्धनमास्त्यनिवर्त्तिरुद्घा तः मार्कंडेयपुराणे प्रथमेनजयत्वेदं द्वितीयेन्नुखेपयुम् विषादंतुतृतीयेनजयेदोषमनुक्रमात् मृदुत्वंसेवमानस्यसिंहप्राईनकुंजरः यथायातितथा प्राणोवशेनवर्तियोगिनः वशंसत्तंयथेच्छा तोनागंवहतिरश्मियः तथैवयोगी छंदेन प्राणंनयतिसाधितम् यथाहिसाधितः सिंहोमृगान्हंतिन मानवान् तद्वन्निषिक्तःयवनः किल्बिषंन्हंतिदेहजम् तस्माद्युक्तः सदायोगी प्राणायामपरोभवेद् इ त्यंयोगीयताहारः प्राणायामपरायणः जितेजितेरानैर्मिताहारेन्द्रियमनार्जितम् दोषान्क्ष्यांधितथा मो हंक्रोतान्पुरानिर्जित्य विवर्धयतिनारेन्द्रस्मान्नमनार्जितम् प्रसन्नास्याहृदयेचायत्तीयाच तथोरसि कंठमुखेनासिकाग्रेनेत्रन्मध्यमध्रुवं किंचित्तस्मात्परस्मिंश्चधारणायरमांस्मिता द्वैताः धारणाः प्राप्यप्रीतिंपरांसम्यक्तम् नाध्मातःक्षुधितःश्रांतोनचक्वाकुलचेतनः युंजीतयोगंरा

ज्यंप्रयोगीसिद्ध्यर्थमादृतः नातिशीतेनचैवोष्णेनाम्बुनिलात्मके कालेक्षेत्रेषुयुंजीतनयोगंध्यानतत्परम् शब्देनिर्जलत्वाच्छे जीर्णगोष्ठेचतुष्पथे शुष्कपर्णोच्चयेनैवशस्मशानेससरीसृपे स्तनयेकूपतीरेवाचैत्यवल्मी कसंचये देशेष्वेतेषुतत्त्वज्ञोयोगान्यासंविवर्जयेत् सत्त्वस्थायुक्तयस्तोचदेशाकालविवर्जिते नसतोद ोषेनयोगंतमात्तत्परिवर्जयेत् दोषानेतानजाहृत्यमूढत्वाद्योयुनक्तिवैविप्रायतस्यैतेदोषाजायंतेतान्नि बोधमेवाधिर्यंजडितालोपः स्मृतेर्मूढत्वमंधता ज्वरश्चजायतेमद्यसद्दस्यानयोगिनः प्रमादाद्योगि नोदोषायघ्नंतेसुश्लिष्टंक्षितंतम् तेषांनाशायकर्त्तव्योयोगिनातन्निबोधमे स्निग्धायवागूमत्युष्णांपुरा तत्रैवधारयेत् वातपुत्मप्रशांत्यर्थंपुत्माच्चर्त्तेतथादधि यवागूंवापियवनवापुत्रधीन्प्रीतिक्रियेत् तद्वत्कफोमहाशैलस्थितंतमनसिधारयेत् विघातेवसोवाचिवाधिर्यंश्रवणेंद्रियः तथैवास्फुलंधा येत्तत्पार्श्वेरसनेंद्रिये यस्मिन्यस्मिन्नुजादेशेतस्मिंस्तदुपकारिणम् धारयेद्राणमुत्तेशीतेशीतेहिमं मूर्द्धलेशिरसिसंस्थाप्यकाष्ठेकाष्ठेनताडयेत् तुप्यस्मृतेः स्मृतिःसद्योयोगिनस्तेनजायतेयावत्प्रथिव्या वाघ्रीव्यापिनावधारयेत् अमानुषात्सत्त्वजाताद्बाधस्याद्येचिकित्सयेत् अमानुषंसत्त्वमतर्कयोनि नंप्रविशेद्यदि वायुर्निधारणादेवंदेहसंस्थंविनिर्दहेत् एवंसर्वात्मनाकार्यारक्षायोगविदान्यः धर्मो र्थकाममोक्षाणांशरीरंसाधनंयतः प्राणायामादयोह्येषांधारणासाभिधीयते ह्येषांरूपंस्मृतोयोगो योगिनिसत्त्वदर्शिभिः तथावैयोगयुक्तस्ययोगिनोनियतात्मनः सर्वेदोषाः प्रणश्यंतिसत्त्वंश्चैवे

Indira Gandhi National Centre for the Arts

पद्यायते ईद्दोत्सर्वत्रलप्रकृतांश्चगुणान्क्रमेण त्यक्त्वोमादिपरमाणुं श्रुतथात्मानमकल्मषम् त
था त्रादिभ्यो निवर्त्तान्नियतेन्द्रियाणियतात्मनि प्रत्याहरेयंतेयोगेन प्रत्याहारस्ततः समनम् हारित्र
एत्वात्त्राह्यवाच्चापलाद्यो योगेत्रस्यमनसः पुनः समानीयार्थे योजनं प्रत्याहारः विष्णुपुराणेत्रा
दादिभ्यनुरक्तानिसम्यगक्षाणियोगवित् कुर्याच्चित्तानुकारीणि प्रत्याहारः सउच्यते वस्तुतापरमार्थे
णजायतेविवशात्मनाम् इंद्रियाणामवश्यैस्तैर्न योगी योगसाधनः देवलःशरीरेंद्रियमनोबुद्ध्यात्म
नाधारणाद्धारणा त्रत्रात्मा हंकारः रोखः मनः संयमनात्तद्धारणेतिनिगद्यते मार्कंडेयपुराणे योग
युक्तः सदायोगीलघ्वाहारोजितेंद्रियः सूक्ष्मान्बुद्धारणाः सप्तत्रराद्यामूर्द्धिधारयेत् धारणात्रयंयोगी
गंधसौम्यंप्रपद्यते त्रात्मानं मन्यतेपृथ्वीतद्भूत्वजहातिसः तथैवापःसंस्पृशंतद्रूपंचतेज
सि स्पर्शेवायोतथात्तद्भिन्नंतत्स्यधारणाम् व्योम्नः सूक्ष्मप्रवृत्तस्पर्शवंतद्भूत्वाहातिसः मनसासर्व
भूतानांमनआविशतेयदि मानसीधारणाविघ्नम नः सौम्यंजहातित्व तद्बुद्धिमशेषाणांसत्वात्मा
मेत्ययोगवित्त पात्यजति संप्राप्यबुद्धिसौम्यमनंतरम् एतासांधारणानांतुसप्तानांसौम्यप्राप्त
वान् दृष्ट्वादृष्टततः सिद्धिंत्यक्त्वात्मकायंत्रजेत् एतान्येवचसंधायसप्तसूक्ष्माणिपार्थिवः भूतादी
नांविशेषात्रसज्ञावस्यचमुक्तये विष्णुपुराणे प्राणायामेनयवनेप्रत्याहारेणचेंद्रियैः वशीकृतंत
त्तः कुर्यात्स्थितंचेतः श्रुत्याश्रयेतद्रूपप्रत्ययायैकसंततिः सान्यनिःस्पृहः तध्यानंप्रथमैरंगैःसा

हारेणचेंद्रियैः वशीकृतंतत्तः कुर्यात्स्थितंचेतः श्रुत्याश्रयेतद्रूपप्रत्ययायैकसंततिः सान्यनिःस्पृहः तध्यानं
प्रथमैरंगैः षड्भिर्निष्पाद्यतेनृप अयमर्थः त्रलरूपप्रत्ययात्मिकासंततिप्रवाहः साविषयांतरासंस्पृष्टम
तीध्यानमित्युच्यते तस्यैवकल्पनाहीनस्वरूपग्रहणंहियत्र मनसाध्यानंनिष्पाद्यसमाधिः सोनिधीय
ते तत्त्रलएव कल्पनाहीनंध्येयध्यानंध्यातेतिभेदप्रत्ययरहितंध्यानजनितसंस्कारसहितेनमनसा
निर्विकल्पकंत्रह्मत्रलास्मीतिप्रत्यक्षसमाधिःध्रियमाणशरीरस्यत्रह्मसाक्षात्कारोपिसनस्य इत्यनिप्रा
णायामनसेत्युक्तम् मुक्तावेवत्वयंप्रज्ञोत्रलीनावःशरीरपातोत्तरकालंचमुक्तिरित्यतोवाक्याऽम्प
ते विष्णुउद्गस्योत्तानवरणःसव्येकरेकरंत्यस्य तालुस्थाचलजिह्वोर्दनासस्यरान्नस्वनासाग्रंस्वर
दिशत्वनवलोकयन्नविनीःप्रशांतात्मा चतुर्विंशत्यात्मतत्त्वैर्व्यतीतंचित्तयेत् नित्यमतींद्रियगुणात्रा
द्यस्यशरीरस्यरूपंगंधात्तीतंसर्वस्थामति सूक्ष्मंसर्वस्यमतिसूक्ष्मम् सर्वतः पाणिपादांतंसर्वतोक्षिशिरोमु
खम् सर्वतः शक्तिमेवंध्यायेत् ध्याननिरतस्यसंवत्सरेणयोगाविघ्नोवानवति तथानिराकारेलक्ष्यंव
धंकर्तुंनशक्नोति तदाएषिव्यतेजोवाधाकारणादिमनोबुद्ध्यात्मावस्तुपुरुषाणांपूर्वपूर्वधारणात्व तत्त्रल
ध्वलक्ष्यंसंपरित्यजेत् त्रपरमपरध्यायेत् एवंपुरुषोयोगमारोहेत् तत्राप्यसमर्थोहृदयपद्मस्यमध्ये
दीपवत्पुरुषंध्यायेत् तत्राप्यसमर्थोनगवंतंवासुदेवंकुंडलिनंगदिनंवनमालाविभूषितोरस्कंसु
रूपचतुर्भुजंशंखचक्रगदापद्मधरंचरणमध्यमगतंवसुधध्यायेत् यद्यद्भ्रायति तत्तदाप्नोतीतिध्याने

Indira Gandhi National
Centre for the Arts

पुरुषम् तस्मात्सर्वमेवपरित्यज्याक्षरमेवंध्यायेत् नपुरुषंविनाकिंचिदप्यस्तीति तंप्राप्यमुक्तो न
वति पुरमध्यास्यसकलंशेतेयस्मान्नहाप्नुः तस्मात्पुरुषइत्येवप्रोच्यतेतत्त्वचिंतकैः प्राग्नायरात्रे
षुयोगि नित्यमतंद्रितः ध्यायतेपुरुषंनित्यंनिर्गुणंपंचविंशकम् एतज्ज्ञानंहितंसर्वनिः श्रेयसकरंपरम्
अस्मादप्रच्युतो विप्रः प्राप्नोतियरमांगतिम् एवंस्वभावानुदेवलोकानांहितकाम्यया धर्मस्यपरमंगुह्यम
मेदंसर्वमुक्तवान् सर्वमात्मनंपश्येदात्मस्थश्चसमाहितः सर्वमात्मनिसंपश्यन्नाधर्मेकुरुतेमनः आ
त्मैवदेवताः सर्वाः सर्वमात्मन्यवस्थितम् आत्माहिजन्मयत्येषांकर्मयोगंशरीरिणाम्रक्षसंनिवेशये
त्वेतच्चेष्टनस्थूलंनिलम् पांतिदृष्टेःपरंतेजः स्नेहोयोगाच्चमूर्त्तिषु मनसीद्रेदिशः श्रोत्रेक्षांतेविषु
वलेहरम् वाच्यग्निंमित्रमुत्सर्गेप्रजनेचप्रजापतिम् असंहितारमेतेषांमणीयांसमाणुरपि रुक्षात्तंस्वप्न
धीगम्यंविद्यात्तंपुरुषंपरम् एतमेकेवदंत्यग्निंमनुमन्येप्रजापतिम् इंद्रमेकेपरेप्राणमपरेब्रह्मशाश्वत
म् एषसर्वाणिभूतानियंचनिर्व्यूयमूर्त्तिभिः जन्मवृद्धिक्षयेनित्यंसंसारयतिचक्रवत् यावंतसर्वभू
तेषुपश्यत्यात्मानमात्मनाऽसर्वसमतामेत्यब्रह्माप्येतिपरंपदम् योगसिद्धेर्लक्षणमाह अंतर्धानं
स्मृतिर्कीतिर्दृष्टिश्रोत्रज्ञतातथा निजंशरीरमुत्सृज्यपरकायप्रवेशनम् अर्थानांछंदतः सृष्टियोग
सिद्धेस्तुलक्षणं सिद्धेयोगेत्यजन्देहममतत्वायकल्पते अंतर्धानमदृष्टशरीरत्वम् तच्चाणुपरिमा
णत्वेतत्स्थत्वतिचक्षुषः तच्चाणिमात्वगुणप्राप्त्यास्मृतिर्जन्मांतरानुवृत्तात्मविषया कांतिः कमनीयत्वं ७८

दृष्टिरतीतानागतव्यवहितविप्रकृष्टार्थविषया श्रोत्रज्ञता श्रोत्रेंद्रियसाक्षात्कारित्वम् अनेनचात्मव्य
तिरिक्तबुद्ध्यहंकारपंचतन्मात्रैकादशेंद्रियपंचभूतानांसाक्षात्कारित्वमुपलक्ष्यते निजस्वकीयश
रीरेपरकायशरीरंदृष्ट्वोत्सृज्यपरकायंप्रविश्यतदंतर्गततत्तद्व्यवहितविप्रकृष्टविषयोपभोक्तृत्वम् अर्थानांपरिवादीनां
सृष्ट्यानांस्वेच्छयास्वातंत्र्येणोत्पादनम् एतद्योगसिद्धेर्लक्षणलिंगम् एतल्लक्षणमेवयोगसिद्धे
र्नप्रयोजनम् प्रयोजनत्वमतीनावाप्तवे तदाह सिद्धेयोगेत्यजन्देहममतत्वायकल्पतेइति त्यज
न्देहमितिवचनसामर्थ्यात्शरीरेनासिमुक्तिरितिदर्शयति एवंचैतन्मुक्तिर्हिवेधात्मनावःवेधश्चोपाधि
र्नतांतःकरणसंबंधःशरीरत्वंवध्यतेतःकरणेन शरीरीतिनोपाधीयतेइतिव्याहतम् रागद्वेषमोहादीनां
प्रत्यस्तंगतधर्मादिगुणोदयेनमोक्षः प्रत्युतमोक्षस्यांतरायः अतएववतन्त्राशक्तियोगिनापरिहरणी
येतियतःशास्त्रकारैरुच्यते एतत्सर्वयतिंप्रत्यनुहितम् वानस्थंप्रतीदानीमाह अथवाप्यरण्य
स्थन् वेदंन्यस्तकर्मावनेवसन् अथाचिताग्नीमितभुक्परंसिद्धिमवाप्नुयात् चतुर्णीवेदानामेकंवे
दमेकांशाखामरण्येविजने अथाचिताग्नीस्वयमुपनतान्नाग्नीमितभुक्प्राणधारणायैवभुंजानः
न्यस्तकर्मा त्यक्तकाम्यनिषिद्धक्रियः अथवाब्रह्मणिनिष्ठावरुपक्रियः परांसिद्धिमवाप्नुयात्
इदानींगृहस्थंप्रत्याह न्याय्यार्जितधनस्तत्त्वज्ञानेनिष्ठोतिथिप्रियः श्रद्धालुस्त्यवादीत्यगृहस्थोपि
विमुच्यते न्यायेनानिषिद्धकर्मणार्जितं स्वीकृतधनंयेनसन्न्यायार्जितधनः तथातत्त्वज्ञाने निष्ठा

Indira Gandhi National
Centre for the Arts

तत्करोतीतिश्राद्धकृत् नूतर्हितार्थवाक्यंसत्यम् तद्वदतीत्येवंशीलः सत्यवादी एवंविधोगृहस्थोपि
विमुच्यते अपहृज्यते अपिशब्देनान्येप्याश्रमिणोलक्ष्यंतेगृह्यंते अत्रचन्यार्य्यर्जितधनत्वादिनिर्वर्णी
श्रमधर्मानित्यनैमित्तिकाश्रोयलक्षितात्मज्ञानसहितामुक्तयोविधीयंते तदेतद्व्याख्याने केचिन्नानुम
न्यंते अतएवतदर्थायाः स्मृतेरस्याः श्रुतिविरोधः स्यात् तथाहिनकर्मणानप्रजयाधनेनत्यागेने
केनामृतत्वमानशुः परेणनाकंनिहितंगुहायांविराजतेयद्यतयोविशंतीति अनेनगृह्यधर्मीणां
यागादिकर्मप्रजोत्पादनादीनाममृतत्वप्राप्तिहेतुत्वंप्रतिषिध्यतीत्यनेवप्राप्तिर्विधीयते तेनात्रत्या
गशब्देन ब्रह्मचर्य्याश्रमत्रयकर्मणांत्यागादमृतीभावइतिप्रतियाद्यते तथाव्यतिरिक्ताश्रमिणांपुण्य
लोकप्राप्तिः यतेरेवामृतत्वप्राप्तिरितिछंदोगोपनिषत् सर्वएतेपुण्यलोकाभवंति ब्रह्मसंस्थोमृतत्व
मेतीति ब्रह्मसंस्थोनिंदितः तथापिहोत्रादीन्यावद्यज्ञकर्मणिदुरितक्षयायश्रुत्याविहितानिमुक्तये
विदधानास्मृतिः श्रुत्याहिरुध्यतएवयदुच्यते श्रुत्यैवविविदिषंतीति यत्तुनदानेनतपसानचैके
नेत्यादिकयावर्णाश्रमकर्मणोमुक्तौविनियुक्तानितन्नब्रह्मज्ञानेछायामेवतेषांश्रुतिः कर्मणोविनियो
क्तृनमुक्तौनापितत्साधने ज्ञानेइच्छापिचविधेयप्रतियोगिनीभवति यथानेषजादिरोषस्यदुःखा
नन्वनप्रधानेन्यङ्गिधीयते नन्वेविविदिषंतीत्यत्र वेदमिश्छाप्रतिप्रधानम् तेनाविद्यायामेवम
न्याधेछाप्रतिकर्मीनूतायाकर्मणोनियोगो नेछायाम् यथा अश्वेनजिगमिषतीति अश्वस्यगतौ

नन्वनस्तदिर्ज्ञयामित्युच्यते सत्यम् प्रधानेन्यङ्गिनेयुज्यते प्रधानंतुद्विविधम् शाब्दमार्थंच तत्रशाब्द
मन्वयउपयुज्यते नार्थम् अतएवराजपुरुषमानयेति पुरुषस्यानयनेसंबध्यते नराजा अर्थतः
प्रधानस्योपि सहितशब्देन विशेष्यतयाप्रधानंनूतंपुरुषप्रतिविशेषणतांनीयते सन्नंतेषुच
शब्देषु इच्छयैवप्रत्ययार्थत्वात्प्रधानम् तेनतत्रैवयज्ञादिविनियोगः अश्वस्यतुगत्यन्वयः प्रमा
णांतरवशात्तनशब्दतः प्रसिद्धहेतुकायामपिविविदिषायांवैदिकोयज्ञादिरुपायः पशुप्रासविंव
चित्रादिः चित्रयायजेतपशुकामइत्यत्रापिचकर्मणिकुर्वता अहंकर्त्ताकर्मणांफलस्योत्पाद्येतिप्रत्य
यार्थमत्रत्वनीयम् तत्त्वज्ञाननिष्ठेनपुनर्स्त्वेवप्रत्ययस्यमिथ्यात्वमायाद्यम् ततश्चज्ञानकु
र्मणोर्विरोधादसमुच्चयः षोडशिनइवग्रहणग्रहणयोः किंच परमकार्यानेदे अवांतरव्यापारानेदे
तु द्वारद्वारिवांतरेणसमुच्चीयते यथाकूपार्थैकहायिन्यापिंगाक्ष्यसोमंक्रीणातीत्यत्राकूपमेक
हायिन्यानधुरन्नवांतरव्यापारभेदेनहिन्नीहयोयवैः समुच्चीयते तुल्यंचज्ञानकर्मणोर्दुरितक्षय
णमवांतरकार्यम् नचज्ञानस्याविद्यानिवृत्तिरेवकारणंनतुकर्मक्षयइतिवाच्यम् नहिकर्म
जन्यायाम्रविद्यायाःकर्मापक्षयेज्ञानेननिवृत्तिःशक्यावक्तुम् तस्मान्न्यायविरुद्धमपिस
मुच्चयस्मरणंस्मर्त्यंतरविरुद्धंच तत्रमहाभारतेशुकउवाच यदिदंवेदवचनंकुरुकर्मत्यजे
तिच ज्ञानंविद्यतेयातिब्रह्मयज्ञतिकर्मणा एतेचान्योन्यवैरूप्येवर्त्तेतेप्रतिकूलतः इत्युक्त्वा प्र

तु वाजसनेयपराशरशारसुतः सुतम् कर्मविद्यासमुच्चयवादौ तौ स्वाख्यास्यामिस्तरादौ यादृशं विद्यया याति
तादृशं तिकर्मणा प्रेष्यशिष्यकमनाः पुत्रगुरुरेवेत्तरम् कर्मणावध्यतेजंतुर्विद्ययाचप्रमुच्यते त
स्मात्कर्मनकुर्वंतियतयः पारदर्शिनः कर्मणा जायतेप्रेत्यमूर्तिमान्पोडशात्मकः विद्ययाजायते
नित्यमव्ययोरूपवयात्मकः कर्मत्वेकेप्रशंसंति स्वल्पबुद्धितानराः तेनैतेदेहजातानिरमयंत
उपासते येतुबुद्धिपर्यंप्राप्ता धर्मनैपुणपदाश्रिनः नतेकर्मप्रशंसंतिकृपणत्वेपिवनिव कर्मणाफलमा
प्नोतिसुखदुःखेनवानवो विद्ययातदवाप्नोतियत्रगत्वानशोचति यत्रगत्वानम्रियते यत्रगत्वा
नजायते नहीयतेयत्रगत्वायत्रगत्वानवर्धतेइति मार्कंडेयपुराणेपितापुत्रसंवादे तवसंसार
चक्रेस्मिन्नमतानातसंकटे ज्ञानमेतन्मयाप्राप्तं मोक्षसंप्राप्तिकारणम् विज्ञातेयत्रसर्वेयमाय
ज्ञःसामसंज्ञितः क्रियाकलापोविष्णोर्नसम्यक्प्रतिभातिमे तस्माडुत्थत्नवोधर्मंवेदैर्मिप्रयो
जनम् वक्ष्यति: सत्यंज्ञानंतपोदानमेतद्धर्मस्यसाधनम् धर्मात्सुखंचज्ञानंचज्ञानान्मोक्षोधिग
म्यतेइति तस्माडुक्तविरोधपरिहारायस्मृतिरियमेवव्याख्यातव्या गरस्थोपिविधिविहितकर्मकारीसु
त्तमनरोपितत्त्वज्ञाननिष्ठोहिमुच्यते किंपुनर्निष्कः कर्मत्यागीतत्त्वज्ञानेवनिष्ठइति तदेतदन्येनानु
मन्यंते नहिसमुच्चयविधायकस्मृतेः श्रुतिविरोधादप्रामाण्यमस्ति तथा विद्याचाविद्याचयस्तद्वे
दोभयंसह अविद्यया मृत्युंतीर्त्वा विद्ययामृतमश्नुते विद्याग्रहणंज्ञानं अविद्याकर्म तदुभयंसह ८०

मुच्चयं चोवेदानुशासनपर्यंततयाजानाति सकर्मकामृत्युंतरतीत्यादिश्रुतिरपिविद्यासमुच्चयं
मश्नुतेइतिप्रसिद्धार्थमेव अत्रचविद्याशब्देदेवतात्मज्ञानपरत्वेनकेचनव्याचक्षते तदयुक्तम् प्रक
रणान्याप्रकृतप्रक्रियाप्रसंगात् ईशावास्यमित्यादिनापरमेश्वरस्यैवप्रकृतत्वात् एवमत्रमंत्रेवि
द्याकर्मणोरमृतत्वसमुच्चयः तदुपपादकतयाचावांतरव्यापारभेदोविद्यामृत्युतरत्वेतिकथि
तः तत्प्रत्ययेनचविद्याप्रतिकर्मणोंगभावः एवमेतदेवस्पष्टयति विविदिषंतियज्ञेनेत्यादिश्रुतिः
यद्यप्यत्रविविदिषाप्रत्ययार्थत्वाच्छब्दतःप्रधानम् तथापिनतत्रयज्ञान्वयोवाक्यप्रमेयोर्थसिद्धत्वात्
तथाहि नहिविविदिषासंबंधमंतरेणविद्यार्थतायज्ञादीनामस्ति नचनिष्पद्यमाणंप्रधानंभवति
तेनयज्ञादीन्प्रतिविद्यायाः प्राधान्यंहिविविदिषान्वयस्तेषांगम्यमानोनविधेयः किंतुविद्यान्वयएव
अप्राप्तत्वात् यष्टेत्तयानाद्यक्रमंयाजयेदित्यत्रयाजनान्वयमनद्य यागान्वयएवप्राप्तोनाद्य
क्रमस्यविधीयते अतएवश्येनजिगमिषतीत्यत्रश्येनगत्यन्वयश्रुतएव अतुवाविविदिषेव
यज्ञादीन्प्रतिप्रधानं किंतुविविदिषाप्रयोजनीभूतयाचविद्ययाविशिष्टेष्टाविविदिषोच्यते तच्चप्र
योजनतत्तांग तच्चप्रयोजनस्यापि यथाग्निचित्वासौत्रामण्यायजेतेति अत्रसौत्रामण्या अग्नीप्रयो
गेनवंति तत्प्रयोजनंयागंप्रतिचांगंयाति विद्यापिचायवर्गेणफलेनफलवतीसती इच्छायाःप्रयो
जनंभवति नकेवला ततश्चविद्यागभावेनजंतोपिविद्यादयोऽपवर्गंडाक्तायांति विद्यायाश्चायव

Indira Gandhi National
Centre for the Arts

र्गः फलं ब्रह्मविदाप्नोति परम् ब्रह्मवेदब्रह्मैव भवतीति वाक्यप्रसिद्धः नच वाक्यम् यथादानमाहवनीयादिस्वरूपोपत्यंगं नतत्कार्यान्तरत्वार्थम् तथापि यज्ञादयोपिविद्यात्वरूपमुत्पादयंति न तुतत्कार्यमपवर्गंकुर्यैतीति युक्तंयाधानस्याहवनीयादिस्वरूपोत्पत्तिमात्रशेषत्वम् नयाधान विनियोगदशायां यदाहवनीयेजुहुतीत्यादिनिराहवनीयादीनांप्रयोजनवत्त्वावगमोस्ति प्रसिद्धेस्ता हवनीयादेस्तत्प्रयोजनावगमोनावति तत्प्रसिद्धिश्चाधानविनियोगायत्ता तेनपूर्वमाधानमग्निषु विनियोज्यं पश्चाज्जुहुयात् तेनगत्वाविनियोज्यमाणास्तीद्रियाहवनीयादिस्वरूपशेषताधान स्याश्रीयते नतुगतिसंज्ञवेसंज्ञवति चात्रगतिः यज्ञादिविनियोगात्प्रागेव विद्यायाअपवर्गतास्ति नात्र विद्यास्वरूपस्यचैंद्रियकत्वात् नचयथायज्ञादीनांप्रमाणमात्रतादृष्टिपुरुषार्थंनाजानाज्ञात्वो दितपायोऽविधीयते तथाविद्यायांयज्ञादिरितिवाक्यम् तस्याःप्रमाणतस्तुपुरुषार्थत्वावेदनात्तस्मा द्यज्ञात्प्रावगम्यापवर्गहेतुत्वतायांविद्यायांसाक्षादिज्ञाद्वारेणवायज्ञादयोविनियुज्यंतेइति सिद्धम् त तश्चसकीर्णेवावरुद्धकानिवर्णाश्रमकर्माणिमोक्षसाध्येज्ञानेनसमुच्चीयंते नकर्मणोत्पादयात्मकर्मणा मोक्षोपायत्वनिषेधाज्ञानरहितकर्मविषयाः अन्यथासमुच्चयविरोधः स्यात् अतएवमंत्रेणा विद्याज्ञात्वाचंकर्मकेवलंनिंदित्वाविद्यापिकेवलानिंद्यते अंधंतमःप्रविशंतियेविद्यामुपास ते ततोभूयइवतेतेतमोयेउविद्यायांरतइतियदपिच सर्वएतेपुरुषलोकानवंतीतिवाक्यम् त

दपिकेवलकर्मविषयम् ब्रह्मसंस्थोमृतत्वमेतीति अस्यायमर्थः प्रकृतानामाश्रमिणांमध्येयोब्रह्म संस्थोब्रह्मप्रवणः ब्रह्मज्ञानोगन्तव्यंकर्मकरोतितियात्तत्सोमृतत्वमेतीति नपुनर्ब्रह्मसंस्थशब्द मत्रिन्नुच्चारयते तस्यतत्संज्ञत्वेप्रमाणाभावात् योपिविद्याकर्मणोर्विरोधउक्तः सोपिनोपासना त्मिकयाविद्यायाकिंतुज्ञानात्मिकयातथाचोक्तम् निंदतेतंयएषिष्ठुंयंतेसर्वसंत्रायाःक्षीय तेचास्यकर्माणितस्मिन्दृष्टेपरावरइति तस्माद्ब्रह्मस्थोपिविमुच्यतेइतिस्मृतिर्नानेनवाक्येन गृहस्थ स्यतुमुक्तिरुक्ताछांदोग्ये कुटुंबीश्वचौदनोवेदमधीयानोधार्मिकान्विदधदात्मनिसर्वेंद्रियाणिसंप्रतिष्ठा पयंहिंसन्सर्वभूतानि अन्यत्रतीर्थेभ्यः सरन्वैवंवर्त्तयन्यावदायुषंब्रह्मलोकमभिसंपद्यते नपुन रावर्त्तेइतिविहिताहिंसातीर्थानि ब्रह्मैवलोकोब्रह्मलोकःमुक्तोज्ञानकर्मसमुच्चयस्मृतिराश्वाङ्गः तत्रनःसुखान्युदयकेचेतनेःश्रेयसिकर्मैवचप्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकम् इहवा मुत्रवाकाम्यप्रवृत्तंकर्मदीर्घंतेज्ञानपूर्वंतुविद्वद्भिर्निवृत्तमुपदिश्यते प्रवृत्तंकर्मसंसेव्यदेवानामेति सात्मतांनिवृत्तंसेवमानंतुनृतान्पशूंश्चपितृंश्चवै वशिष्ठः यथान्नंमधुसंपृक्तंमधुचान्नेनसंयुक्तम् एवंतपश्चविद्याचसंयुक्तोनेषजंमहान् योगयाज्ञवल्क्यः परिज्ञानाइवेत्युक्तिरेतदालम्बनत्वेनकर्मा यत्नेशक्तया त्रैवकर्मनेतिपंडिताः ज्ञानकर्मसमायोगात्परमाप्नोतिपूरुषः पथ्यशीवानसिध्येत्तज्जित स्मात्समाश्रादित्यादितन्त्रन्यायाज्जितधनस्यादिस्मृतिर्मुख्यतयैवव्याख्यातव्येति तदनयोर्मंत्रयो

Indira Gandhi National Centre for the Arts

र्वन्यायप्राप्तमिति॥ ॥इतिश्रीविद्याधरवंशप्रभवश्रीरिनाहारनरेंद्रजीसूतवाहनान्वयप्रसू
तश्रीमदयरादित्यदेवविरचितेयास्मदीयधर्मशास्त्रनिबंधेमोक्षप्रकरणंसमाप्तम्॥ ॥ ॥ ॥
॥ ॐश्रीगणाधिपतयेनमः॥ ॥ॐथापदायायप्रायश्चित्तानिविधास्यंतेदुःखफलत्वेनन्वयात्पस्यतत्र
दयार्थतात्प्रायश्चित्तमनुष्ठानस्यप्रयुज्यते इतितत्फलत्वंपापस्यतावदाह ॐमहापातकजान्घोरान्
नरकान्न्यायगर्हितान्वर्मक्षयात्प्रजायंतेमहापातकिनस्त्विहब्रह्महत्यादिमहापातकप्रभृतिपापनि
मित्तानरकान्सामिस्कादीन्घोरान्सुदुःसहान्गर्हितानन्यंतहेयान्प्राप्योत्तरयानरकदेशोपभोगंप
दुःखविशेषंस्वकर्मणःक्षयान्महापातकशेषवंतइहलोकेकुत्सितयोनिषुवक्ष्यमाणासुजायंते न
रकभोगीतीव्रतप्तव्रतरदुःखप्रदानकरणेकर्मणःक्षयःस्वल्पदुःखप्रदानकारणावस्थानमिति कर्म
णःक्षयोमहापातकित्वंचेतिहयमविरुद्धम् सामान्यतउक्तमर्थंविशेषतआह मृगश्वसूकरोष्ट्र
णाब्रह्महायोनिमश्नंति खरदुघ्नसेवनानांतुरापोपिनसंशयः मृगादिजातीयेशरीरंब्रह्महा
खरादिजातीयंचसुरायः प्राप्नोति शुक्रसेवनेप्रतिलोमजविशेषो किंच कृमिकीटपतगत्वंस्वर्ण
हारीसमाप्नुयात् तृणगुल्मलतात्वंचक्रमशोगुरुतल्पगः कृमिर्विष्ठादिविप्रहेमहारी गुरु
तल्पगस्तृणगुल्मादिक्रमशः स्यात् दुष्टेनिप्रापकत्वंपापस्यानिधाय्यकुशरीरप्रासकत्वमयी
दानीमाह ब्रह्महादयोगीस्यात्सुरायः श्यावदंतकः स्वर्णहारीतुकुनखीदुश्चर्मायुरुतल्पगः योये

नसंपिवत्येषांसतल्लिंगोनिजायते क्षयरोगीराजयक्ष्मीदुष्टीवास्यावदंतकः स्वर्णावाल्कलदंतः कुन
खीकुनखः दुश्चर्मीदुःस्तितचर्मापंडोवा ब्रह्महादिसंसर्गीपापरोगादिलिंगः किंच अत्रहत्तीमयोवो
स्यान्मद्योद्वेगापहारकः धान्यमिश्रोतिरिक्तांगः पिशुनः परतिनासिकः तिलतैलपायी स्यात्पतिवक्त्रस्तु
सूचकः अन्नहर्त्तीप्रजतिरामयाव्यादिर्नवति आमयावीअन्नमंदाग्निर्मद्यो वाग्घीनः वागपहारोव
क्ताध्ययनंपुस्तकंचौर्ययंपरिव्रतग्रंथस्यात्मीयतयाख्यापनंवा धान्यमिश्रः व्रीह्यादेः द्वोद्रवादिनामिश्र
कारी अतिरिक्तांगः षंडंगुलिः स्थूलैकचरणइत्यादिः पिशुनःपरदोषप्रकाशकः प्रतिनासिकोदुर्गंध
घ्राणः तैलपायीप्राणिविशेषः सूचकः परदोषवादी पिशुनस्तुनेत्रवक्त्रादिचेष्टयापरदोषख्यापक
इतिनपौनरुक्त्यम् किंच परस्वयोनितगत्वात्रसस्वमपहृत्यच अरण्येनिर्जनेदेशेजनवतिब्रह्म
रादासः निगदव्याख्यातमिदम् हीनजातौप्रजायंतेतन्नामनामापहारकः पत्रशाकशिखीहत्वा
गंधोत्कुछुंदरिः शुनाव्र मूषकोधान्यहारिस्याद्घरिनमुष्ट्रः फलंकपिः जलंजवःपयः काकोगृह्ण
रीलवणंस्वरम् मधुदंशः पलंगोगोधानिवकस्तथा श्वित्रीसंशारसंतुचोरीलवणहारकः
हीनजातिःशूद्रादियोनिः तत्रत्यानामपहारकाजायंतेतत्रानिपतनरागादीनि पत्रशाकहारिप्रजतेः
शिखीत्यादिःस्यात् छुछुंदरिर्गंधमूषकः धानभक्षादिःजवःक्षतिविशेषः गृहकारीप्राणिविशेषः उपल
रोगहोपस्करणम् पलंमांसगोधाविलेशयः शिशुमारसदृशः प्राणिविशेषः श्वित्रीश्वेतत्वमारसः वीरा

Indira Gandhi National
Centre for the Arts

दि: चीरीप्राणिविशेष: प्रसिद्ध मनुष्यत उत्क्रम्य मात्सर्यमत्वयमेवाह प्रदर्शनार्थमेतत्तुमयोक्तेषु
यकर्मणि द्रव्यप्रकारोहिंसयाप्तैव प्राणिजायतय: यदुक्तमेतदपहारकएवं विधोनवतीति तन्न
नियमार्थमविज्ञातुप्रदर्शनार्थम् यतोयथा अपहार्यद्रव्याणिनंतानि तथातदपहारकस्यप्राप्तय
जातिविशेषाअपिनंता: अतोनतेकमत्स्यैर्निरूपावक्तुम् पापस्यनरककुयोनिकुशरीरत्वाप्ति
फलमुक्तम् तस्यसमुच्चितस्यफलमिदानीमाह यथाकर्मफलंप्राप्यतिर्यक्त्वंकालपर्यायात्र जा
यंतेलक्षणत्रष्टादरिद्र: पुरुषाधमा: यथाकर्मकर्मानतिक्रमेणपापेनरकंप्राप्यतत्वंनुतिर्यक्त्वंम
गत्वादिव्रात्यपर्यायात् कालक्रमेणोत्पन्नय: नष्टश्रुतलक्षणादरिद्रादिदोषोपेता अधमा: पुरु
षाजायंते ततोनिष्कृष्टीभूतकुले महतिभोगिन: जायंते विद्ययोपेताधनधान्यसमन्विता: ततउत्प
न्नोपनीतादीनपापाधर्मशेषेणयुक्तवतिकुले विद्यापुराणन्यायमीमांसादिकयाधर्मावितर्के
श्रुतिविषयोपभोगैस्तधनधान्यादि निरूपेताजायंते पापस्यकार्यमुक्तमिदानीकारणमाह विहित
स्याननुष्ठानान्निंदितस्यचसेवनात् अनिग्रहाच्चेंद्रियाणांनर: पतनमृच्छति विहितस्यावश्यक
स्यानुष्ठानान्नदन्यानुष्ठानात् निंदितस्यानिषिद्धस्यसेवनादनुष्ठानात् अनिषिद्धेऽपिविष
योपभोगेषुइंद्रियप्रसंगनिवारणात् नरउपनीतोऽनुपनीतोवापतनंपापमृच्छतिप्राप्नोति अ
स्मादेवकाम्यानित्यकर्मणामकरणेप्रत्यवायोदयइतिगम्यते तत्प्रत्यवायप्रागभावोर्थश्चावश्य

केषुकर्मसुपुंसांप्रवृत्ति: अनुपायोपिप्रत्यवायप्रागभाव: श्रोक्तनिवृत्तिर्नवति प्रयोजनंत्वधाश्रोक्ति
तनिवृत्तिर्व्याधिप्रागभावोमेषजक्रियाया: अथवोपात्तदुरितक्षयएवावश्यकानांकर्मणामनुष्ठा
नेप्रयोजनंच अत्रैवपदेविहितस्यानुष्ठानान्नर: पतनमृच्छतीतिकथंनुपात्तदुरितस्याविनाशेन
वपातक्षोदयत्वेनकथंचित्क्षयंते एवंचसतिनैमित्तिकानांकर्मणामकरणनिमित्तप्रत्यवायपरिहारउ
पात्तदुरितक्षयोवाप्रयोजनमितिसिद्धम् ननुक्तंनित्यानांफलंविनाप्यनुष्ठानंनित्यानामित्य
तसुफुटम् कामानांस्वफलार्थंतुदोषघातार्थमेवतत्र नैमित्तिकानांकरणंत्रिविधंकर्मणांफलम्
क्वचंकेचिदुपात्तस्यदुरितस्यप्रचक्षते अनुत्पत्तिंतथाचान्येप्रत्यवायस्यमन्वते नित्यक्रियांता
थाचान्येअनुषंगफलश्रुतिम् अस्यार्थ: नित्यनैमित्तिककाम्यानित्रिविधानिकर्माणितत्रकदाचि
त्कर्मणोरागविषयीकृतफलमुद्दिश्यकाम्यानामनुष्ठानम् ननुनित्यानांनैमित्तिकानांतुव्रतलवधा
दौनिमित्तेविहितानांदोषोपघात: फलम् नित्यानांतर्हिकिंफलमित्युच्यते उत्तरम् उपात्तदुरि
तक्षय: प्रत्यवायानुदयोवातत्फलमिति यत्तुनित्यकर्मणामानुषंगिक: स्वर्ग: फलमिति तदानु
षंगिकत्वादेवप्रयोजनमिति तस्मान्नेनेहकर्त्तव्यंप्रायश्चित्तंविशुद्धये एवमस्यात्तस्माच्चलोक
श्चेवप्रसीदति यस्माद्दु:खफलंपापंतस्मात्तस्यविशुद्धय विगतामयेनविहितानुष्ठानेविमलो
पुंसावश्यमाणंप्रायश्चित्तकार्यम् कृतेहित स्मिन्पापकारिणीतरात्मालोकश्चप्रसीदति नवीनस्य

Indira Gandhi National
Centre for the Arts

ति इः खोपनोग न येलोकासंव्यव हारश्चनिर्वत्तत इत्यर्थः उक्तप्रायश्चित्तस्य विशब्द्यर्थो विशुद्धिः
पापक्षयोमतोच व्यवस्यामाह प्रायश्चित्तेरपैत्येनोय त्तदानकृतेनवेत् कामतोव्यवहार्यसुव
चनादि हजायतेअजानतायत्कृतंपापंपथामुतेनपर्वकात्पतताकश्चिदतः तथावाजलकुंभा
सुरापीतात्तत्प्रायश्चित्तेरपैतिनश्यति यत्तुकामतोरोगान्मर्त्ययकारीस्यात् नतस्यप्रायश्चि
त्तैः पापक्षयः किंतुवचनात् प्रायश्चित्तवचनात् संव्यवहार्यत्तयाजननयोगपत्तान चतिएतच्च
महापातकेष्वेव उपपातकादिकंपापंकामकृतमपिप्रायश्चित्तैः क्षीयते यदाहछागलेयः प्राय
श्चित्तमकामानांकामावात्तेनविद्यते उपपातकृएवस्यात्तथाचात्मोपघातने अयमर्थः कामा
वाप्तोकामपूर्वकृपापेप्रायश्चित्तपापक्षयपर्यंततयानविद्यते उपपातकी
कामपूर्वकेविद्यतेइति यानितुमरणांतिकप्रायश्चित्तानितैः पापक्षयोनवत्येव तथाचापस्त
नः युक्तहत्वाश्रोत्रियंवाकर्मसमाप्तमेतेनैवविधिनोक्ष्वासाच्चरेत् नास्मिंल्लोकेप्रत्यायत्तिर्वि
द्यते कल्मषंनिर्हन्यतेइति यमोपिमहापातककर्त्तारश्चत्वारोप्यविरोषतः अग्निंप्रविश्यशु
द्धंतिस्वात्वामहतिवक्रातावितिं युक्तचैतत् अन्यथाप्राणांतिकव्रतविधिरनर्थकः स्यात्
गौतमः अथखल्वसौपुरुषोयावेनकर्मणालिप्यते यद्येतदयाज्ययाजनमन्नदप्रतिग्रहणमव
क्षवदनंशिष्टस्यात्क्रियाप्रतिषिद्धसेवनमिति तत्रप्रायश्चित्तंकुर्यात्तनकुर्यादितिमीमांसतेन ८४

कुर्यादित्याहुः नहिकर्म क्षीयतइतिकुर्यादित्यर्थेपुनस्तोमेनेष्ट्वा पुनः सवमायांतीतिविज्ञायते व्रा
तस्तोमेश्वेष्ट्वात्तरतिसर्वंपाप्मानंतरतिव्रह्महत्यांयोस्यमेधेनयजतेअग्निष्टुन्निरुप्यमाणयाज्ञ
वेदितिच नहिकर्मक्षीयतेफलमदत्त्वेतिशेषः कुर्यादित्यत्रमतमसिद्धंतेइत्यर्थः अत्रप्रायश्चि
त्तस्यसंव्यवहारपापक्षयोफलमित्यत्रश्रुतिः प्रमाणंतयोदाहरति नपुनस्तोमेनेष्ट्वेत्यादयः पुनस्तोमः
प्रायश्चित्तकृत्वंत्वापुनः सवपुनर्यज्ञक्रियामायत्तीति अनेनयाव्यत्वलक्षणंसंव्यवहार्यतांप्रा
प्नुवंतीतिदर्शयति व्रात्यस्तोमैः स्वकालानुपनीतंप्रतिविहितैः प्रायश्चित्तकृतिः सर्वपाप्मानंव्रात्यता
लक्षणंतरतीत्यादितोपपातकप्राय श्चित्तानापापक्षयफलत्वंनिदर्शितानत्वेवलंव्रात्यादिकृमुप
पातकमेवप्रायश्चित्तैः क्षीयते अपितुमहापातकमपीतिवक्तुमुदाहरणांतरमाह तरतिव्रह्महत्यायो
ऽश्वमेधेनयजतेइति अत्रचत्रिसत्रन्यायेनार्थवादिक्योः संव्यवहारपापक्षययोः स्वीकारः अत्रच
प्रायश्चित्तैरपैत्येनइत्युपक्रांतवाक्यज्ञानतोव्यवहार्यत्वंतुपसंहर्त्तव्यम् तदुपक्रमवशाज्ञानत
इतिमत्वाकामतइत्युक्तवान्न तुतश्चायमर्थोलभ्यते ज्ञानतः कामतश्चेत्यस्यप्रायश्चित्तेव्यवहा
र्यत्वंक्रियते यस्तुज्ञानतोनकामतः पापकारीस्यात् सप्रायश्चित्तैरपापोभवत्येवयथाम्लेच्छहतारसु
रापायितः कामाद्यज्ञवतितद्धेतिपूर्वकात्प्रमाणपूर्वकात्प्रभवति तत्रचकामतोव्यवहार्यइत्य
नेनप्रमाणपूर्वकात्कामइति एवंपरंवेदितव्यम् ज्ञानतःपूर्वकंकामकृतंपापंप्रायश्चित्तापनेयमे

Indira Gandhi National
Centre for the Arts

वयथाहरस्येब्राह्मणेस्यापुत्रोत्पादनेयतएवनोतिपूर्वकरागकृतपापप्रायश्चित्तहेयम् अस्माद्वाहमनुः अकामतःकृतंपापंवेदाभ्यासेननश्यतिकामतस्तुकृतंपापंप्रायश्चित्तैःपृथग्विधैरिति अज्ञानंसंशयोविपर्ययश्चमोहः महापातकजातीरानित्यत्रनरकदुःखभोगःपापक्षयतयोक्तः तमन्वयं तामिस्रादिसंज्ञकानेकविंशतिनरकानाह प्रायश्चित्तमलमित्यत्रस्मृतिःप्रमाणंतयोदाहरति ननुनस्तोमेनेष्ट्वेत्यादयः पुनस्तोमः प्रायश्चित्तंकृतुःतंकृत्वापुनःसवंपुनर्यज्ञक्रियामायंतीति अनेनयाव्यत्वलक्षणासंव्यवहार्यतांप्राप्नुवंतीतिदर्शयति प्रायस्तोमैःस्वकालानुपनीतंप्रतिविहितैःप्रायश्चित्तक्रतुभिः सर्वपापमानंप्रत्यतालक्षणंतरंतीतिवदंतीयपातकप्रायश्चित्तानांपापक्षयफलतानिदर्शित नकेवलंब्रह्महादिकमुपपातकमेवप्रायश्चित्तैःक्षीयतेअपितुमहापातकप्रायश्चित्तानांपापक्षयफलतानिदर्शित नकेवलंब्रह्महादिकमुपपातकमेवप्रायश्चित्तैःक्षीयतेअपितुमहापातकमपीतिवक्तुमुदाहरणांतरमाह तरतिअश्वमेधेनयजतेइतिअत्रचरात्रिसत्रन्यायेनार्थवादिकयोःसंव्यवहार्यत्वक्षयोःस्वीकारः अत्रप्रायश्चित्तैरपेत्येनइत्युपक्रांतंचाद्यज्ञातोजातायस्त्रियंपुंसंहंतव्यम् तदुपक्रमबलाज्ज्ञानतइतिमत्वाकामतइत्युक्तंनतुज्ञानतोयमर्थोनवतिज्ञानतःकामतश्चैनंस्त्रीप्रायश्चित्तैर्व्यवहार्यःक्रियतेयस्तुज्ञानतोनकामतःपापकारीस्यात्सप्रायश्चित्तैरपापोभवत्येवयथाम्लेछैर्हठात्सुरापायितःकामघ्नइतितंज्ञेयं ६५

पूर्वकृतकामकृतपापप्रायश्चित्तापनेयमेवयथाहरस्येब्राह्मणेस्यापुत्रोत्पादनेयतएवनोतिपूर्वकरागकृतपापप्रायश्चित्तहेयम् अतएवाहमनुः अकामतःकृतंपापंवेदाभ्यासेननश्यतिकामतस्तुकृतंपापंप्रायश्चित्तैःपृथग्विधैरिति अज्ञानंसंशयोविपर्ययश्चमोहः महापातकजातीरानित्यत्रनरकदुःखभोगःपापक्षयतयोक्तः तमन्वयं तामिस्रादिसंज्ञकानेकविंशतिनरकानाह प्रायश्चित्तमलमित्यत्रस्मृतिःप्रमाणंतयोदाहरति ननुनस्तोमेनेष्ट्वेत्यादयः पुनस्तोमः प्रायश्चित्तंकृतुःतंकृत्वापुनःसवंपुनर्यज्ञक्रियामायंतीति अनेनयाव्यत्वलक्षणासंव्यवहार्यतांप्राप्नुवंतीतिदर्शयति प्रायस्तोमैःस्वकालानुपनीतंप्रतिविहितैःप्रायश्चित्तक्रतुभिः सर्वपापमानंप्रत्यतालक्षणंतरंतीतिवदंतीयपातकप्रायश्चित्तानांपापक्षयफलतानिदर्शित नकेवलंब्रह्महादिकमुपपातकमेवप्रायश्चित्तैःक्षीयतेअपितुमहापातकमपीतिवक्तुमुदाहरणांतरमाह तरतिअश्वमेधेनयजतेइतिअत्रचरात्रिसत्रन्यायेनार्थवादिकयोःसंव्यवहार्यत्वक्षयोःस्वीकारः अत्रप्रायश्चित्तैरपेत्येनइत्युपक्रांतंचाद्यज्ञातोजातायस्त्रियंपुंसंहंतव्यम् तदुपक्रमबलाज्ज्ञानतइतिमत्वाकामतइत्युक्तंनतुज्ञानतोयमर्थोनवतिज्ञानतःकामतश्चैनंस्त्रीप्रायश्चित्तैर्व्यवहार्यःक्रियतेयस्तुज्ञानतोनकामतःपापकारीस्यात्सप्रायश्चित्तैरपापोभवत्येवयथाम्लेछैर्हठात्सुरापायितःकामघ्नइतितंज्ञेयं

Indira Gandhi National Centre for the Arts

वर्तकः यानुस्तान् त्रस्यकर्तुरनुकूलमाचरन् साध्यक्रियां साधयति सप्रयोजकः तत्र स्वातंत्र्येण
प्रेरकत्वं तत्रिरप्रलुहेति शब्दोत्तरगत्वादेवाच्छेदेन तु प्रयोजकत्वं हिरण्यत्वादिलिङ्गात् यदा
हयंसवः प्रयोजयितानुमंता च कर्मणेति स्वर्गनरकफलेषु कर्मसु फलनाभिसंधिः योन्यश्चात्म
तेतस्मिन् फलविशेषइति नचानुमंतुः कथंकर्तृत्वमकर्तुत्वमकर्तुश्च कथंस्वर्गनरकफलयोग
इतिवाच्यम् प्रयोजकतयातस्यापिकर्तृत्वात् प्रवर्तनेहिदंडप्रणेतरिराजादौतेनानुमंतः सत्यपि
प्रेरणेघातेन तंत्रयत्नात्करणेकर्तुम् अनुमंतुश्चान्येयादिति वधादौनवत्यनुमंतुः प्रयोजक
कर्तृत्वम् गोवलीवर्दन्यायेनप्रयोजककर्तुः पृथगनुमंतोपात्तःप्रदर्शनार्थश्चैतत् ततश्चयेनवि
नाहंतत्क्रियामनिनिष्पाद्य तत्कर्तुम् ससर्वोपिहननसिद्धेत्यप्रियमाणोपिनवतिघातकः
अतएवाहपैठीनसिः हंतानुमंतापुपदेशकर्त्ता प्रोत्साहकः संप्रतिपादकश्च आरंभकसहायश्च
तथामार्गानुदेशकः आश्रयदाताचनात्मदाताविकर्मिणाम् चुद्योपदेशकश्चैवतद्विना
शप्रदर्शकः उपेक्षाकारकश्चैवदोषवत्तानुमोदकः अनिषेद्धाक्षमोयश्च सर्वेतत्कार्यकारिणः
यथाशक्त्यनुरूपंवैदंडंतेषांप्रकल्पयेत् नात्मदायादकादयः परमरणमभिसंधायदिनात्मादि
प्रयच्छति तदावधहेतवोननात्मादिदानमात्रेणयदितन्मात्रेणापिहेतुतास्यात्तदापित्रोरपिपुत्र
जनयितृत्वंकर्तृकासुकूलाकूलक्रियासुहेतुतास्यात् धर्मार्थंनिर्मितकूपादौच प्राप्तोधर्मो ६६

तिब्राह्मणमत्युहेतुत्वात्कूपकर्तुर्नदुष्यते नचैवमस्तिकारणकारणत्वेनाकारणत्वात् वधमुद्दिश्यापि
परेणकृतोव्यापारोयदिवधमाचरतःकर्तृविशेषविशिष्टत्वनापेक्ष्यतेतदानवत्येवतत्रहेतुः यथा
हमनेनाकृष्टस्ताडितोनिर्धनोवाकृतइति आत्मानंहन्मीत्यभिसंधायात्मनिव्यापादितेनवत्यात्को
शादिकर्तुस्तद्व्यापारोहेतुतानपुनःकूपादावेवम् नहितत्रनवति यस्माद्देवदत्तेनायंकूपोनिर्मितस्तस्मा
दहमत्रपतामीत्यभिसंधिःनायियस्मादन्यापितत्यासहमृत्यादितस्तस्मादिमांक्रियांकरोमीति पुत्रस
क्रोशादिकर्तुश्चब्राह्मणवधनिमित्ततामाह विष्णुः आकृष्टस्ताडितोवापिधनैर्वाविप्रयोजितःयमुद्दिश्यप्राण
जेत्प्राणांस्तमाहुर्ब्राह्मघातकम् यत्र त्वक्रोशताडनादिसंबंधमंतरेणान्योद्दिश्यब्राह्मणंआत्मानंहंतितदाहंतुरेवदोषोनेद्दशस्य
त्याहमनुः असंबंधेनयः कश्चिद्द्विजः प्राणान्समुत्सृ
जेत् तस्यैवतद्वेत्यापनुदेयंपरिकीर्त्तयेत् आततायिनमायांतंहन्याद्ब्राह्मणमपिहतवान्नब्रह्महत्यामिति
सआहआततायिनमायांतमपिवेदतयारणम् जिघांसंतंजिघांसित्वानास्तेनब्रह्महानवैरम्रूणहत्यापि
पाठः तत्रभ्रूणहाब्रह्महेत्यर्थः मनुः गुरुंवावालवृद्धौवाब्राह्मणंवाबहुश्रुतम् आततायिनमायांतंहन्या
देवाविचारयन् वशिष्ठः स्वाध्यायिनंकुलेजातंयोहन्यादाततायिनम् नतेनब्रह्महानवतिमन्युस्त
मन्युमृच्छति बृहस्पतिः आकृष्टस्तुसमाक्रोशन्नाततायितः प्रतिताडयन् विनाशार्थिनमायांतंघातयन्ना
पाप्नुयात् विष्णुः परदारारतांश्चारदोषप्राप्तांश्चयेद्विजाः अन्योन्यंवाहतायुद्धेनतेनब्रह्महानवैतम

Indira Gandhi National
Centre for the Arts

(2456)
३
या० व
अ० प

नु शस्त्रं द्विजातिनिर्ग्रहे धर्मोयत्रोपदिश्यते आत्मनश्च परित्राणे दक्षिणानां ---- वैधायनः षड्स्व
आततायिषु तानाह वशिष्ठः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहर
श्चैव षडेते आततायिनः गरदो विषदः मत्स्यपुराणम् गृहदो ग्नीदिहर्त्तारं तथापत्यनिगामिनम् अ.
ग्निदं गरदं चैव तथा चान्युद्यतायुधम् अनिचारचङ्कुर्वाणराजगामिचपैशुनम् एतेहि कथिताःषोढ
धर्मज्ञैरततायिनः व्यासः उद्यतासिविषाग्निश्चापोद्यतकरस्तथा आथर्वणोनहर्त्तारपिशुनंचैवरा
जनि नार्यापहारिणंचैवषडाहुरततायिनः अत्रचचर्त्तमानाग्निदारादिव्यापाराततायिनउच्यते
तद्व्यापारनिवारणंचयत्रवधमंतरेणानसंभवति तत्रैवतद्धानुज्ञा यत्रतुदंडशस्त्रादिप्रहारमन्त्रेणैव
रक्षोनिवारयितुं तत्रतद्धोदोषनिमित्तमेव अतएवोक्तंबृहस्पतिना आक्रुष्टस्तुसमाक्रोधाच्छस्त्रा
दितः प्रतिहतउभयनित्यादि एतदेवमत्वासुमंतुनाप्युक्तम् नाततायिवधेदोषोन्यत्रगोब्राह्मणादितिए
वंसतियत्रगोब्राह्मणहते तत्प्रहारमन्त्रादिनाशक्त आत्मानंतु तत्रतद्धकारीब्रह्महत्यादिपात
कवान्नवत्येवततस्तूपाततायिवधेदोषस्मृतयः प्रायश्चित्तस्मृतयश्चताः सर्वाः पूर्वोक्तविषया
ज्ञेयाः तस्मादेवविधोब्राह्महा मद्यशब्दोक्तसुरावचनोग्राह्यंतथाचमनुः ब्रह्महत्यासुरायानंस्ते
यंगुर्वंगनागमम् महांतिपातकान्याहुः संसर्गश्चैवतैः सहसुरात्वपेयमेव यदाहमनुः गौड्यपै
ष्टीतथामाध्वी विज्ञेयास्त्रिविधासुरा यथैवैकातपासर्वानयातव्याद्विजातिभिः एकापेष्टीहशंती

५७

कृत्वसर्वस्वंब्राह्मणप्रतियाननिषेधंकुर्वन्नेकामुख्यांगौणीतरेतिदर्शयति एवंचब्राह्मणास्यतिस्तोय्य
ज्ञेयाः क्षत्रियवैश्ययोस्तुपेष्टीवयदाहसाव सुरासैवमलमन्नानायाश्चमलमुच्यते तस्माद्ब्राह्म
णराजन्यवैश्यश्चन सुरांपिबेत् अन्नमलत्वंचब्रीह्यादिपिष्टमप्याश्रित्यैवचनसंभवति गौड्यमाध्वी
नहिगुडमधुनोरन्नेअन्नंतुब्राह्मणैव ततश्चपेष्टीपानंद्विजानांप्रतिषिद्धम् येषांतुतरयोश्चब्रा
ह्मणास्यतिमंतव्यम् अतएवाहविश्वामित्रः ब्राह्मणोनचहंतव्यः सुरापेयानचद्विजैः ब्राह्मणास्व
र्णास्यहरणेनकर्त्तव्यंकदाचन गुरुपत्नीनगच्छेज्जसंसर्गंतैश्चनाचरेत् महापातकिसंज्ञानितु
दिष्टेषामनीषिभिः तेयशब्दोब्राह्मणसुवर्णस्तेयवचनेदृष्टव्यः पंचमहापातकान्याचक्षते गुरु
तल्पंसुरायानंब्रह्महत्याब्राह्मणसुवर्णहरणंपतितैस्तसंयोगश्चेति स्वयमपियाज्ञवल्क्यः तेषांतु
हारीतोविति गुरुपितातल्पंतल्पगामीगुरुतल्पगः एतैरितिनिर्देशाच्चतुर्णामेवानुपपत्तेर्न
संसर्गीमहापातकी नतुतेनापियः संसर्गीमहत्वेनचविशेषणं यतितांतत्रत्यंपापंदोषमहत्त्व
ख्यापनार्थम् तेनपतितस्योदकार्यमित्यादिकमेषामिवयतितांतरापीमितिगम्यते अतएवाह
देवलः पंचैतानिमहापातकानिकृत्वाब्राह्मणः सद्भिर्ननिर्भाष्योनानुयोज्योनिरास्तसर्वकर्मप
रिवर्जितः यतितत्समाचरन्नितिब्राह्मणग्रहणंसुवर्णब्रह्मणार्थम् अन्यथापतितानांसंतिय
दाहगौतमः ब्रह्महासुरापएतत्संसर्गमात्रेतियोनिसंबंधागतेनानिर्दितकर्मत्यागा

Indira Gandhi National
Centre for the Arts

